पनेनमानमिति परास्तम्। हशेशेइति। आश्रयात्पूर्वत्रासिद्धमिति सूत्रस्य पूर्वग्रहणे नरोरिति पदग्रहणेपि हश्यदं प्रत्यसिद्धत्वस्य दुर्वारत्वात् इति भावः। ननु वर्णग्रहणे जा
तिग्रहणं यत्नेन साधयता ऽन्यत्र जातिग्रहणदुर्लभमिति चेन्न। अनुकरणे चेति सूत्रे भाष्ये ऽनुकरणाकृतिर्निर्दिश्यते। यथा तेप्राग्धातोरित्यादौ गत्याकृतिरित्युक्त्या तद्भाष्यप्रा
माण्येनान्यत्र जातिग्रहणवदेतद्भाष्यप्रामाण्येनात्रापि जातिग्रहणस्य सुलभत्वमित्याशयात्। यदि तु रोरुच्चारणप्रसङ्गे उः प्रयोक्तव्य इत्यर्थात् ज्ञाने श्रोच्चारणप्रसङ्गाभावेनेह

किंतु सकारद्वयस्यापि रुत्वे कृते ऽतोरोरित्यनेन न एक एवउकारो भविष्यति। विधेयविशेषणस्यैकत्वस्य पश्वेकत्ववद्विवक्षितत्वाद्रोरिति जातिपरनिर्देशेनातः परत्वस्य
पूर्वत्वस्य च संभवात्। नच परत्वाद्धशि चेति प्रथमस्यैव रोरुः स्यादिति वाच्यम्। रुत्वस्यासिद्धतया हशः परत्वाभावात्। नचाश्रयात्सिद्धत्वमिति वाच्यम्। स्थान्यंशेनयात्वेपि
निमित्तीभूतहशंशेन तदसंभवादिति संक्षेपः। विस्तरस्तु शब्दकौस्तुभे बोध्यः। अपृक्तस्य हल इति। यत्तु प्राचोक्तम्। अपृक्तस्य सार्वधातुकस्येति। तन्न। एधि षिद्ध्यादाववनिव्याप्तेः।
सार्वधातुकग्रहणव्यावर्त्याभावाच्च। आतः ऽसिज्ग्रहणमनुवर्त्तते। सिच आकाराच्च परस्य झेर्जुसिति। तत्र प्रत्ययलक्षणेन सिचः परत्वम्। आकारात्तु श्रुत्या। एवं स्थितेफलितमा
द्धासिज्लुकीति। पूर्वसूत्रेण सिद्धे नियमोयमित्याह। आदन्तादेवेति। प्रागेवेति। न परतोनापिव्यवहितादिति भावः। अतएव च्छन्दसि परेपि व्यवहिता चेति सूत्रितम्॥

क्रि ३

शे विषये जात्याश्रयणमशक्यं ध्वनितं चेदं नपुंसकस्य झलचः इति सूत्रे भाष्ये तदास्तु संसोत्रः सुलोपः द्विसकार इति तु पर्यालोचनकालापेक्षया इदं चोक्तव्याख्यानेप्यावश्य
कसा संहितायां सद्द्वयस्य तत्त्वस्याभावात् तदाह। विसर्गस्त्विति। निलोडित्येवेति। आङ्विशिष्टस्य तु यदागमा इति न्यायेन सिद्धिः। उपसर्गनिस्तु नग्रहणं नेर्गदेत्युनरसूत्रेपुनर्नि
ग्रहणात् पृथ्यातोँ ऽनिनिस्यावयवेन नत्वेप्रधानिरित्यत्रतु न दोषः। लोडन्त्वाभावात्। लाक्षणिकत्वाच्च। अनित्यतां ज्ञापयितुमिति। इदं भाष्ये क्वापि न दृश्यते ऽतस्तत्रैकामस्ये।
त्यादेरसाधुत्वमेवोचितम् किंचज्ञापितेचारितार्थ्यमपि दुरुपपादम्। आडागमस्यान्यप्रयोगात्। प्रसिद्धेः आग्रहणात्तु लोड्ग्रहणवदिति तत्त्वम्। उपसर्गग्रहणादिति चयाश।
ब्दस्य क्रियावाचकत्वाभावेन तं प्रतिप्रशब्दस्योपसर्गत्वाभावा[illegible]दिति भावः। प्रभवाणीत्यादौ आनिं प्रत्यनुपसर्गत्वेन तदर्थे प्रत्युपसर्गत्वात्तु सतिः। निरासमतानानयतितत्कुलं
निरानिइत्यादौ लोड्ग्रहणाभावे उपसर्गार्थवत्त्वयोः सत्वेपि नणत्वं प्रत्यया प्रत्यययोरिति परिभाषया प्रत्ययस्यैव ग्रहणादिति बोध्यम्। ध्वनितं चेदमत्रभाष्ये॥ ९

आकरविरुद्धमिति। गतिश्चेति सूत्रस्य भाष्यविरुद्धमिति भावः। रमसेति। नह्विरोधादेवेति भावः। प्रनिचस्वादेति। प्रनिषेस्यतीत्यादे रप्युपलक्षणमिदम्॥ प्रनिचक शेइति। अयंहि आदेशोपदेशस्वादिः स्थान्युपदेशेषान्तश्चेति भावः। अत्रचज्ञापक इति। अर्थसहितधातुपाठः पाणिनीय इतिपक्षस्ये त्संज्ञा प्रकरणस्य भाष्यसंमतत्वादितिभावः। उपलक्षणमेप्यर्थसहितपाठः क्रियावाचित्ववोधार्थ इतिबोध्यम्। अर्थरहितोपिपाठः पाणिनीय इतिधातु।

आनिलोट्। निलोडित्येवसिद्धे आनिग्रहणमागमशास्त्रस्यानित्यतांज्ञापयितुं तेनसागरन्तर्तुकामस्येत्यादिसिद्धम्। लोड्ग्रहणंस्पष्टार्थम् प्रकृष्टावपायेषान्तानिप्रवपानिमांसानीत्यत्रतूपसर्गग्रहणादर्थवद्ग्रहणाच्चनभविष्यति। दुरः पत्वेति। यत्तुप्राचोक्तं दुरः परस्यणत्वंनेति केचि दिति। तन्नास्वं हिसिद्धान्तेणत्वस्यानच्चाकरविरुद्धमितिभावः। यदपिभवत्येवणत्वमितिव्याचख्युः। तदपिरभसमात्रम्। अन्तःशब्दस्येति। अन्तःशब्द। स्याङ्कि-धावित्यप्युपसंख्यायतेतत्तुप्रकृतानुपयोगादुपेक्षितम्। भिदादिपाठेनप्रज्ञाश्रद्धेतिनिपातनेनेनवागतार्थत्वाच्च। शेषेविभाषा निर्गदनदनेस त्रापे इयाशेषइत्याह। गदनदादेरिति। उपदेशेकिम्। प्रणिचकार। प्रणिचस्वादेत्यत्रापिनिषेधोयथास्यात्। अषान्तेकिम्। प्रतिपिनष्टि उ पदेशग्रहणात्प्रनिचकृशेऽत्रापिनिषेधः। उपलक्षणमिति। कुर्दखुर्दक्रीडायामेवत्यवकारोत्रज्ञापकः। यागादिति। भूवादिसूत्रेधात्वानांभ वनइतिसूत्रेचाकरेस्पष्टमिदम्। टित आत्मने। प्रकृतैस्तिवादिभिरात्मनेपदानां विशेषणान्नेह। पचमानोयजमानः। एवंतुटितस्लङ्लोटेरित्येव वक्तुमुचितम्। आमः। लक्षणप्रतिपदोक्तपरिभाषयानेह। अम्। गत्वादिषु। आमआमतुःतिवाद्यपवादत्वाच्छ्रावस्थायामेवायंलुक्। तेनाम। न्तस्यातिङन्तत्वाच्चनिघातः। ततः परस्यनिघातश्च। लिटः कृत्वाच्चप्रत्ययलक्षणेनकृदन्ततयाप्रातिपदिकत्वमामन्तस्याव्ययत्वात्सुपोलुक॥

सन्ज्ञासूत्रेभाष्येतिवादिभिरिति अतद्गुणसंविज्ञानबहुव्रीहिणातादिभिरित्यर्थः। लक्षणानि। संनिपातपरिभाषयाप्रत्ययग्रहणपरिभाषयाचेत्यपि बोध्यम्। अपवादत्वादिति। अनन्तरस्यानुपीतिन्यायाच्चेत्यपि बोध्यम्। अव्ययत्वादिति। आमइत्यनेनैवलुक् तत्रहिलेइतिनानुवर्तते। अतएवविदांकु र्वन्वित्यादौलोटोलुक्सिद्धिरित्यन्ये। सुपोलुगिति। तेनतस्यपदत्वान्नकारयाञ्चकारेत्यादौपदात्परत्वनिबन्धनमप्रकारेत्यस्यनिघात इतिभावः॥

मु

कथंतर्हीति। अनुप्रशब्दाभ्यां विपरीतव्यवहितप्रयोगनिवारणादिति भावः। सकर्मत्वादिति। फलव्यधिकरणवाचित्वादिति भावः। एवमकर्मकस
मभिव्याहारेकृञोप्यकर्मकत्वं बोध्यम्। अन्यत्र कर्मप्रत्ययसमभिव्याहारे फलव्यापारयोर्व्यत्यासेपि आम्समभिहारे न व्यत्यास आमन्तार्थस्यापि व्यत्या
सो वेति ना भेदान्वयानुपपत्तिरिति वदन्ति। सार्वधातुकएवेति। ता सि साहचर्यादस्तेरपि सार्वधातुकएव एतिहत्वमित्यर्थः। एतत्सर्वं सत्यभिधाने।

कृञ्चानु। कथंतर्हीति — पातयांप्रथममास पपात पश्चात्। संयोजयांविधिवदास समेन बन्धुः। प्रभ्रंशयांयो नहुषञ्चकारेत्यादि। प्रमा
दएवायम्। नचविपरीतप्रयोगनिवृत्तिमात्रे सूत्रस्य तात्पर्यमस्त्विति वाच्यम्। विपर्यासनिवृत्त्यर्थे व्यवहितनिवृत्त्यर्थञ्चेति वार्त्तिकविरोधात्। अमे
दान्वय इति। एवञ्चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलम्। अतएवानुप्रयुज्यमानयोर्भूस्त्योरामन्तवशे
न सकर्मकत्वात्ताभ्यां कर्मणि लिट्। तथाच माघः। तस्यातपत्रं विभरांबभूवे इति। श्रीहर्षश्च। तपर्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्विभरां
बभूविरे इति। अस्तेस्तु भावकर्मणोरन्तु ङिरएशि इटि च रूपे विप्रतिपद्यन्ते। तथाहि। उभयत्रापि हएनीति हादेशे कृते राधामाहे ईक्षामाहे इ
ति केचित्। तासि साहचर्यादिहैव हत्वमित्यन्ये। साहचर्यादेव सार्वधातुकएव तानिहत्वम्। ननूक्तद्वयेपि। तेन राधामासे ईक्षामासे इत्येव
रूपमित्यपरे। वाक्यभेदेनेति। अत्र चाम्प्रत्ययवदिति वचनमेव प्रमाणम्। अन्यथा पूर्ववदित्यनुवृत्त्यैव सिद्धे किं तेन। द्विर्वचनेचि। द्वित्वनिमित्तेची
ति। द्विर्वचनशब्दस्य तन्निमित्तलक्षणा। तां विना अचा सामानाधिकरण्यायोगादिति भावः। यद्वा द्विरुच्यते स्मिन्निति द्विर्वचनम्॥ वोध्यम्। सिद्धे इति। ए
धाञ्चकारेत्येन द्वावृत्तौ सिद्धायामित्यर्थः। एतेनैधाञ्चक्र इत्यादौ परगामिनि क्रियाफले प्राप्तस्य विधानेपि इन्दाञ्चकारेत्यादौ कर्त्तृगामिनि क्रियाफले प्रा
प्तस्य निवारणमशक्यमित्यपास्तम्। लक्षणायां जघन्यत्वादाह। यद्वेति। अधिकरणे ल्युडिति भावः। इदमेवयुक्तम्। अन्येपि वृत्तिद्वयकल्पनागौरवात्॥

उ॰ म॰ श॰ १५

सर्वमिति। एवञ्च द्वित्वेऽजादिप्रत्ययस्य निमित्तत्वेऽभ्यवायित्वं यण्यचो निमित्तत्वेन दादिप्रत्ययस्यापीति भावः। तद्भावेति तस्मात्सत्त्विच तद्भवतीत्येतावता नि
मित्तत्वं न तु तत्प्रयोजकत्वेनेति भावः। यद्यत्रस्यानिवत्त्वं न स्यात् स्यादेव तस्य द्वित्वमिति काल्पनिकं च गृह्यत इत्यपि बोध्यमिति सन्यङोरित्यत्र भाष्ये

अथवा द्विर्वचनमस्त्यस्मिन्नित्यर्श आद्यच्। इह तन्त्रावृत्त्याद्याश्रयणेन कालावधारणमपि क्रियत इत्याह। द्वित्वे कर्त्तव्ये इति। ऊर्णोतेस्तु द्वि
त्वे यथायथमादेशः स्यादेवेत्यर्थः। द्वित्वनिमित्ते किम्। दुद्यूषति। नत्र ऊठ् द्वित्वनिमित्तम्। नन्वेवं च ऊर्णुनूरित्यत्र यण् स्यादेव। अत्र तु सो द्वित्वनिमित्त
त्वे प्यकारस्य तथात्वात्। सत्रन्तु च क्रे इत्यादौ सावकाश मिति चेत्सत्यम्। इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकं
सर्वं गृह्यते लक्ष्यानुरोधात्। एतच्च ऊठ्सि कइति सूत्रे कैय्यटग्रन्थे स्पष्टम्। अत एव ऊर्णोतेः सनि सनीवन्तेती दृ पक्षे विभाषोर्णोरिति ङित्त्वविरहे
भावितामात्रेण इहनिमित्तत्वमिति। नन्वेवमरिरिषतीति न सिद्ध्येत्। ऋधातोस्सनि स्मिपूङ्रञ्ज्वशां सनीति इट्। इक्रेते इस शब्दनिमित्तकस्य गुणस्य नि
षेधे अजादेर्द्वितीयस्येति इसो द्वित्वप्रसङ्गात्। इष्यते तु रिस शब्दस्य द्वित्वमासत्यम्। नेह इस शब्दो द्वित्वनिमित्तम्। कार्यित्वात्। नहि कार्यी निमित्ततयाश्री
यते। स्थण्डिलाच्छयितरि व्रते इति ज्ञापकात्। अन्यथा शीङो ङित्वेन ङ्कित्ति चेति गुणनिषेधापत्तेः। न चैवं सन्नन्तस्य कार्यित्वादूर्णुनविषतीत्यपि न
स्यादिति वाच्यम्। मत्वर्थीयेन इनिना कार्यमनुभवत एव कार्यित्वलाभात्। ऊर्णोतेर्हि नु शब्द एव द्वित्वरूपं कार्यमनुभवति न तु सनाऽरिरिषती
त्यत्र तु रिस शब्दः कार्यभागिति वैषम्यात्। अचीति किम्। जेघ्रीयते। देध्मीयते। शाशय्यते। इह ई घ्राध्मोरितीकारः। अयङ्यि क्ङितीति यङादेशश्च

निमित्तद्वित्वप्रसङ्गः॥ रा॰ म॰ १५

सष्टम इति नेति। ज्ञापकस्य सजातीयापेक्षत्वेनेत्यपि बोध्यम्। कार्यित्वलाभादिति। तथा च तस्यैव निमित्ततयानाश्रयणमिति भावः। द्वितीयाजवधिकस्येति। नट
भार्यावद्धञ्जनानीतिद्वधिकस्य द्वित्वमिति षाष्ठभाष्योक्तेरिति भावः॥ ०॥

द्वित्वनिमित्तत्वाभावेन१

द्वित्वनिमित्तत्वाभावादिति। नचयङि परतईत्वमितितन्निमित्तस्ययङोविशिष्टस्यद्वित्वनिमित्तत्वमस्त्येव। अवयवस्यकार्यित्वेपिनतस्येत्वंप्रतिनिमित्त।
त्वंनहिकार्यीनिमित्तत्वेनहात्रापियथाकथंचिन्निमित्तत्वंकार्यित्वञ्चगृह्यतइत्यत्रमानमस्ति जेघ्रीयतइत्यादेः प्रत्युदाहरणत्वप्रभाष्यप्रामाण्येनत।
त्रनिमित्तकार्यिपदयोर्मुख्यार्थत्वस्यैवांगीकारादितिवाच्यम्। अरिरिषतीत्यस्याप्यसिद्धेः। नहितत्रगुणनिमित्तस्याईधातुकसन्नसेसशब्दस्याकारविशि
ष्टस्य द्वित्वंप्रतिकार्यित्वंशपितरीत्यत्रापिऋकारस्यैवकार्यित्वेनज्ञापकस्यशिथिलत्वापत्तेश्च। यदितत्रेगन्ताङ्गस्येत्यर्थात्सर्वस्यकार्यित्वंतर्हित्रापिया
ङ्तस्यद्वित्वमित्यर्थोतुल्यम्। तस्मात्तर्हिकार्यीत्यत्रापियथाकथंचिन्निमित्तत्वादिगृह्यतइतियुक्तम्। अचीतिव्यर्थमित्यस्यजेघ्रीयतइत्याद्यर्थंव्यर्थ
मित्यर्थः। अधिजगेइतितुप्रयोजनङ्गाङ्लिटीत्यत्रद्विलकारकनिर्देशाश्रयणात्स्यलावस्थायांप्रवृत्तेः। नचतस्यविषयसप्तमीत्वाङ्गीकारेण नैमिति।

वस्तुतस्तु अचीतिव्यर्थम्। घ्रीयू धीत्यशप्यइतिद्वितीयाजवधिकस्यैकाचः कार्यितयायङोद्वित्वनिमित्तत्वाभावात्। अचः किम्। असु।
षुपत्। इहस्वांपस्वेङोतिसंप्रसारणेनिषिद्धेऽभ्यासेउवर्णोनस्यूयेन। नचद्वित्वेकृतेपुनःसंप्रसारणम्। नसंप्रसारणादितिनिषेधान्॥ ॥

कत्वंतद्भावभाविता मात्रेणेवनवृद्धिभावभाविता मात्रेणापिनिमित्तत्वस्ययुक्तत्वादतस्तत्रोपात्तलिङ्वृद्धिभावएवनिमित्तमित्यजनिमित्तत्वाभावः॥
सर्वत्रैववात्रशास्त्रेबुद्धिकृतमेवनिमि त्तत्वमितिस्पष्टंवृद्धिगोर्लुगितिसूत्रेमनोरमायाम्। अतएववाङ्गाधिकारेआर्धधातुकइत्यादीनांविषयसप्तमीत्वे
पिपरदेशस्यविषयकबुद्धिभावेनजायमानतयापरनिमित्तत्वेननतद्विषयेचःपरस्मिन्निनिस्थानिवत्वप्रवृत्तिः। इदमेवाचीतिईदृशनिमित्तत्वाश्रयणेलि
ङ्ध्वनितञ्चेदंप्रकृतसूत्रेऽचोयदितिसूत्रेचभाष्येदत्यन्यत्रविस्तरःनिविद्धइति। द्विर्वचनेचीत्यनेनेतिभावः।पुनःसंप्रसारणमिति। घुतिस्वाप्योरित्य।
नेनेतिभावः। निषेधादिति। अस्यचव्यवहितेपिप्रवृत्तिरितिस्पष्टमेवाकरविदाम्। इदमपिप्राचामनुरोधेनसंप्रसारणग्रहणसामर्थ्यादेकवर्णव्यव।
धानेयूनइत्यादावप्रवृत्तिः। प्रकृतेप्रवृत्तौतुनमानमितिवकुंशक्यत्वात्प्रत्युदाहरणान्तरन्त्वन्यत्रोक्तम्॥ ॥ ॥

रूपातिदेशेति। नचात्र पक्षे ङित्वात्पूर्वमियङः प्रवृत्त्या द्वित्वे कार्ये स्थानिरूपातिदेशेपियणितत्त्वेमानाभावेन निन्यतुरित्यसिद्धिरितिवाच्यम्। आभीयत्वे
नेयङस्सिद्धायणः प्रवृत्तेः। संप्रत्युदात्तत्वादिति। नचविहितविशेषणान्निस्तारः। धातुस्वरस्यदुर्वारत्वेनासंभवापत्तेः। अनेकाच्त्वादिति। एवञ्च।
निषेधेनस्यादितिभावः। एकाचोविहितस्येत्यर्थेनापीदंसुसाधम्। नचतदालावस्थायामडितिपक्षेऽकार्षीदित्यादौदोषः। ञ्निसिचोरपिस्यतासि

यद्यपीहाजादेशः स्थानिवत्त्वादिति रूपातिदेशपरतया सूत्रेव्याख्यानंकाशिकादौप्रसिद्धंफलंचतुल्यमेवतथापिस्थानिवद्ग्रहणंनिवर्त्यन
अल्विध्यनुवर्त्यनिषेधपरतयाव्याख्यानमपिभाष्यारूढंलघुचेतिनदेवाश्रितम्। एवंहिसतिस्थानिवदितिशब्दाधिकारप्रयुक्तक्लेशोनास्ति॥
नपदान्तेतिनिषेधानन्तरपाठस्यानुगृहीतोभवतीतिदिक्। उभयान्वयीति। मध्येपाठात्पूर्वोत्तराभ्यांसंबध्यतइत्यर्थः। तत्रोत्तरान्वयफलंक
र्णुङ्नुमित्यादाविणिनिषेधः। निस्वरेणसंप्रत्युदात्तत्वात्। पूर्वान्वयफलन्तुबिभित्सतिपिपक्षतीत्यादौनिषेधः। द्वित्वेकृतेऽनेकाच्त्वात्॥
स्यादेतत्। विशेष्यदलमेवतर्हिमास्त्वितिशङ्कते। एकाचःकिमिति ननुबिभित्सतीत्यादौनेत्याद्यङ्लुक्यपिस्यादेवतत्राह। सरन्निहीति
। श्विपाशपेत्यादि। श्विपायथा। स्यतिहन्तियातिवातिद्रातिप्सातीत्यादि। शपा। सनीवन्तेतिसूत्रेभरेति। अनुबन्धेननिर्देशोद्विधा। स्वरूपे
णइत्संज्ञकत्वेनच। आद्योयथा। शीङः सार्वधातुकेगुणः दीङ्येयुडिति। द्वितीयस्त्वनुदात्तङितइत्यादि। अतएवनाग्लोपिशास्वृदितामितिसूत्रेश्न
सेर्यङ्लुकिनप्रवर्ततिस्वरूपेणानुबन्धनिर्देशात्। सूत्रेशासिग्रहणंप्रत्याख्यायऋशासुइतिऋदित्पठनीयइतिमतेतुइत्संज्ञकत्वेनानुबन्धनिर्देशात्॥

वध्यावस्थायामेवप्रवृत्त्याङ्गसञ्ज्ञानिरपेक्षत्वेनान्तरङ्गत्वादिकरणोत्तरमेवाडादिप्रवृत्तेः स्पष्टंचेदमेकाचोद्वे इत्यत्रभाष्ये। तर्हिमास्त्विति। उपदेशेनु
दात्तस्यैकाचत्वव्यभिचारादितिभावः। नचविधिव्यावृत्त्यर्थमत्। तत्सामर्थ्येनोपदेशमात्रएकाचोग्रहणादितिवाच्यम्। आद्युदात्तनिपातनेनसिद्धेरि
त्यभिमानात्स्वरूपेणेतिशासुइतिपाठात्। सूत्रे नाग्लोपीतिसूत्रे। इत्सञ्ज्ञकत्वेनेति। ऋदित्पदेनतद्ग्रहणादितिभावः॥ रा॰ म॰ २९

नपरत्वंनेइति। यङंतस्यनित्यत्वेनवारणमन्यथायङ्‌लुगन्तेभुवादयइतिसनाद्यन्ताइति धातुत्वंनस्यात् गणनिर्दिष्टत्वात्। अनित्यत्वेमानन्त्वयङो वागुणोयङ्‌लुकोरित्यादि अतएवयङ्‌लुकि हि त्वंभयभावादिसिद्धमिति। एतन्मूलएवयत्रैकाज्ग्रहणं किञ्चिदिति पाठः स्वीदित इतिसूत्रेकैयटेइ त्यन्ये। अनुदात्तपाठस्यैवेति। नचानुदात्तमन्तोदात्तत्वबाधनार्थं। मत्वर्थलक्षणयैवोपपत्तौ शास्त्रबाधेमानाभावात्। सूत्रकारेणेति। भाष्यवार्ति

येनुयङ्‌लुकयपौ च्छन्तितेः शासेरुकारोनपठ्यते। गणेनयथा। वेभिदीति। चेच्छिदीति। रुधादिभ्यः श्नम्। एकाज्ग्रहणंप्रक्रान्तसूत्रे। तेनवेभिदिता। चेच्छिदिता। अत्रेण्णिषेधोन। एतच्चेति। ननुश्निपाशपन्त्याद्यंशेकथमिदंज्ञापकमितिचेत्। एकदेशानुमतिद्वारापूर्वा चार्यपठितपरिभाषायाः। ज्ञापनस्यगतिकारकोपपदानामित्यादौदृष्टत्वात्। अनन्यार्थैः श्निपादिनिर्दिशैर्ज्ञापनसंभवाच्चात इत्यन्त इ ति। नचमत्वर्थलक्षणायांमानाभावः। वसन्त्यादीनामनुदात्तपाठस्यैवतत्रमानत्वात्। वधेरिति। यस्तुनद्याहन्तेयः निदृकारिकास्वदन्त पर्युदा सउक्तोव्याघ्रभूतिनासएवचप्राचानुसृतः सदुष्टोपेक्षितः। सूत्राननुगुणत्वात्। तथाहि। कर्त्ताहर्त्तेत्यादौ सर्वेसर्वपदादेशाइतिन्यायेनकृत्या दिरादेशः। तस्ययथास्थान्युपदेशगृहीतत्वान्निषेधः प्रवर्त्तते। एवंवधादेशेपिप्रवर्त्तमानः केनवार्यताम्। अदन्तपर्युदासस्सामर्थ्येनेतिचेत्। न। सूत्रकारेणादेशेपर्युदस्तत्वादितिभावः। इणः षीध्वम्। इणकारित्यधिकारेपिपुनरिणग्रहणंकवर्गनिवृत्त्यर्थम्। नेनेहन। पक्षीध्वम्॥

कहनोरप्युपलक्षणमेतत्। एतेनवधादेशस्याद्युदात्तत्वनिपातनमूलकः सः। उदाद्यन्तानामितिचादन्तानामप्युदात्तोपदेशत्वाभाववोधनात्। नचकथाद्विष्वस्व नोवधादेशेउदात्तनिपातनसामर्थ्यादित्यपास्तम्। यत्तुहनोवधेत्यत्रासर्वंजनानत्वेइड्विधिर्वाच्यः। अदन्तत्वेतुनदोषइतिभाष्येउक्तं ननुउपदेशेनेका चइत्यन्नितिषेधाभावादिट्सिद्धिरित्येवंपरतया कैयटेनव्याख्यातम्॥

उ· म· श· १७

विहितानामिति। एवञ्चाङ्गादिति न कर्त्तव्यमिति। लाघवमिति भावः। न त्सीध्वमिति। इणन्ताद्विहितानां षीध्वमादीनामित्यर्थः। षीध्वमः साक्षाद्वि
धानासंभवः सीयुटः षत्वस्य च विधानोत्तरकालत्वात्। तस्माद्यस्य विहितस्य षत्वं सीयुडो ऽम्यता न स्येति वाच्यम्। सा च यदि षत्वं न स्यात्। स्या
देव षत्वमिति प्रकृते ऽपेक्ष्येवेत्यभिमानेनेदं विविषीध्वमिति षान्तमिहाङ्गेनेणन्तम्। इणन्तादङ्गादिति। स्वरूपकथनमिदम्। इति केचिदिति। अ

अङ्गात्परेषामिति। विहितानामिति तु नोक्तम्। आदिङ्गमित्यादावव्याप्तेः। लिहदुहनहांढत्व घत्व धत्वेषु लिक्षीध्वम्। धुक्षीध्व
म्। नत्सीध्वमित्यत्रातिव्याप्तेश्च। अङ्गात्किम्। वेविषीध्वम्। अर्थवद्ग्रहणादेव सिद्धे क्वचिदर्थवद्ग्रहणपरिभाषा न प्रवर्त्तत इति ज्ञापना
र्थमिदम्। तेनानिनस्मन्निन्यादि सिद्धम्। एयिषीध्वमिति। इणः षीध्वमिति ढत्वं तु न भवति। षीध्वं भक्तस्येडागमस्य तद्ग्रहणेन ग्रहणादिणन्ता
दङ्गात्परत्वाभावात्। विभाषेट इतीटो विशिष्य ग्रहणात्। गोबलीवर्दन्यायेनेड्व्यतिरिक्तस्य वेणिहग्रहणम् इति केचित्तदाह। इङ्श्चेड्इति ऊढ्
ढ्वेरिति। अकारस्य लोपस्थानिनः तत्वीजत्वात्क्रमेव। ऊदन्ता भूप्रभृतयः। ऋदन्ताः कृत्प्रभृतयः। युमिश्रणामिश्रणयोः। रुशब्दे। रुङ् गतौ। रेषणे
चेत्यपि केचित्। इणु तेजने। शीङ् स्वप्ने। स्नु प्रस्रवणे। णु स्तुतौ। टुक्षु शब्दे। टुओश्वि गतिवृद्ध्योः। डीङ् विहायसा गतौ। श्रि सेवायाम्। वृङ् संभ
क्तौ। वृञ् वरणे। निहताः अनुदात्ताः इत्यर्थः। हलन्ताः कान्तादिक्रमेणाह। शक्लृ शक्तौ। कान्तेष्वेकः। खगघङान्तानसन्त्येव। चान्ता अपि पकाराम्ना
यीना ये वर्णास्तदादयो न सन्तीत्याशयेनाह। पच इति। डुपचष् पाके। षचव्यक्तीकरणे॥ ज्ञारुचिवीजन्तुभाष्येऽस्यादर्शनं सूत्रान्तरस्थेन रम· १७
गोबलीवर्दन्यायग्रहणे च न दृढतरं मानमिति। रेषणे चेत्यपि केचिदिति। अत्रारुचिबीजं तु निरनुबन्धकत्वेन साहचर्याण्चयुमिश्रणे इति लुग्विकरणे।
स्य वग्रहणमुचितम्। परिभाषाद्वयेन तु ग्विकरणपरिभाषाबाधात्। अन एवसन्नसाम्यययोद्वं किन रोष्येसन्त्वहीनवदितिभट्टैः सङ्गच्छते॥ ६॥

ह्यात्वपीति। इदं दुर्गवर्धमानादिरीत्या। अन्ये तु स्तम्भेदित्वमीकारंगणभाष्येनिदिर्त्याडे। ननत्त्वहासंभवात्। अत एव पचिविस्तारवचनइ नित्वुरादेरिदित्वात्

ह्रावपि। फबभादर्यानसन्नीत्याशयेनाहमुच्यते। एवमग्रेपिबोध्यमस्मुच्नू मोक्षणं। रिचिर् विरेके। रिचवियोजनसंपर्चनयोरितियोजादिकस्थ त्वचपरिभाषणं। वुवाविचिरपि। वचिर्योजादिकेपिभ्वादावपीत्येके। विचिर पृथग्भावे। पिच क्षरणे। चान्ताः षट्। प्रच्छ ज्ञीप्सायाम्। छान्त एकः। त्य जहाने। णिजिर् शौचपोषणयोः। भज सेवायाम्। भञ्जो आमर्दने। भुजपालनाभ्यवहारयोः। भुजोकौटिल्य इति च। भ्रस्ज पाके। टुमस्जो शुद्धौ। यज देवपूजादौ। युजिर् योगे। रुजो भङ्गे। विजिर पृथग्भावे। षञ्ज सङ्गे। सृज विसर्गे। जान्ताः पञ्चदश। अद भक्षणे। क्षुदिर् संपेषणे। खिद दैन्ये। खिद्यति। खिन्दति। खिन निश्च। छिदिर् द्वैधीकरणे। तुद व्यथने। नुद प्रेरणे। पद गतौ। भिदिर् विदारणे। विद सत्तायाम्। विद विचारणे। शद्लृ शातने। षद्लृ विशरणगत्यवसादनेषु। रिजि खिदा गात्रप्रक्षरणे। स्कन्दिर् गतिशोषणयोः। हद पुरीषोत्सर्गे। दान्ताः पञ्चदश। क्रुध कोपे। क्षुध बुभुक्षायाम्। बुध अवगमने। बन्ध बन्धने। युध सम्प्रहारे। रुधिर् आवरणे। अनोरुध कामे इति दिवादिः। राध संसिद्धौ। व्यध ताडने। शुध शौचे। साध संसिद्धौ। षिध संराद्धौ। धान्ता एकादश। मन ज्ञाने दिवादिः। हन हिंसागत्योः। नान्तौ द्वौ। आप्लृ व्याप्तौ। क्षिप प्रेरणे। दिवादिस्तुदादिश्च। छुप स्पर्शे। तप सन्तापे। तप ऐश्वर्ये दिवादिः। तपदाहे इत्यपि णिजभावपक्षे। तिप क्षरणे। तृप प्रीणने। दृप हर्षविमोचनयोः। इमौ रधादीवद्धौ। द्रह पाठस्त्वनुदात्तस्येत्ययनदर्थः। लिप उपदेहे। लुप्लृ छेदने। टुवप बीजसन्ताने। शप उपालम्भे। क्षिप प्रशये। सृप्लृ गतौ। पान्ताः त्रयोदश। यभ मैथुने। रभ राभस्ये। डुलभष् प्राप्तौ। भान्ताः त्रयः। गम्लृ गतौ। णम प्रह्वत्वे शब्दे च। यमु उपरमे। रम क्रीडायाम्। मान्ताश्चत्वारः। क्रुश आक्रोशे। दंश दशने। दिश अतिसर्जने। दृशिर् प्रेक्षणे। मृश आमर्शने। रिश रुश हिंसायाम्। लिश अल्पीभावे। लिश गतौ च। विश प्रवेशने। स्पृश संस्पर्शने। शान्ता दश। कृष विलेखने। भौवादिकत्वे तौदादिके। त्विष दीप्तौ। जुष तुष्टौ। द्विष अप्रीतौ। दुष वैरूप्ये। पुष पुष्टौ।

णिजभावेपि न ग्रहणम्। युजिर्योग इति। युजसमाधावित्यस्यापि ग्रहणं बोध्यम्। विनिगमनाविरहात्। भाष्ये युजौ निधानेकदेशे कारविशिष्टस्यैव ग्रहणं नत्विकानिर्दे

उ॰
म॰ श॰ विशिशिषी। औहोत्यादिकरौधादिकौ विषवि प्रयोगे इति कादिरपी तिन्यासः। कचच्छजाईनि। पूर्वार्द्धपाठानानां कान्तचान्ता इत्यादिरर्थः उत्तरार्द्धं कचर्द का॥ १॥
१८ विद्धत्यार्थौ। शिञ्ज विशेषणे। इह जिषु विषु मिषु इति कस्य सस्य षरि येति चरणद्वये पठितो भ्वादीनपि। विषि शिषी प्राह्या विति माधवादयः। ने
निबोपदेवादयः। शुष शोषणे। श्लिष आलिङ्गने। पान्ता एकादश। घस्लृ अदने। शब्विकरणः प्रकृत्यन्तरम्। अनेरादेशस्त्वनुस्यान्नुपदेशेऽनुदात्तेना
पि सिद्धम्। वस निवासे। सान्ता द्वौ। दह भस्मीकरणे। दिह उपचये। दुह प्रपूरणे। दुहिर इति भ्वादिस्तु नेह गृह्यत इति संप्रदायः। णह बन्धने। मिह
सेचने। रुह जन्मनि प्रादुर्भावे च। लिह आस्वादने। वह प्रापणे। हान्ता अष्टौ। कचच्छजादधनपाभमशाः षसहाः क्रमात्। कचकाणटाः खोडोगघञ्जो
स्त्वचाः स्मृता इति संग्रहः। तृप्यति दृप्यती त्यत्र श्यना निर्देशस्य फलमाह। तुदादावितिः। अन्यनिवृत्तये इति। निवर्तनीयास्तु। त्रिफिदासंन्हनमो हनयोः।
परस्मैपदी। सं धनति बाधती चेति भावादिकाः। मनुस्त्ववबोधने। तानादिकः। पुषपुष्टौ। पोषयतिः पुष्णाति च। श्लिषदाहे। भौवादिकः। वस आच्छादने। आदा
दिकः। एते सेटः। युजबन्धने तु क्र्यादिः। अनिट्। तथा। अन्यनिवृत्तये सानुबन्धा निर्दिष्टा इत्यर्थः। तथा हि। णिजिसद्दा वित्यदादिः। ओविजी भयसञ्च
लनयोरिति तुदादिः। शक्लृ तिष्वसेदेव। यद्यपि माधवादयः शकनेरप्यनिट्त्वमिच्छन्ति तथापि चन्द्रगोमिप्रभृतीनां मतेन बोध्यम्। अत एव बोपदेवो
धातुद्वयं न रूपद्वयं फलतीत्याशयेन शङ्कांतिश कन्योर्द्वयोरपि लृकारमनुबन्धमासजन्। विन्दतिरिति। लाभार्थः। इष्टइति। अनिट्त्वेनेष्ट इत्यर्थः।
तथा च चान्द्रसूत्रम् विदेर्लुकदति। भाष्यानुक्त इति। अनुक्ताः ननु मत्याख्याताः। तथा च भाष्यमप्युपलक्षणतया नेयम्। तेन रक्तं रागात्। शुष्कधृष्टौ। क्तेनन
श्चि शिष्टेनानन्। इत्यादि सौत्रव्यवहारात्त्वान्तरसंवादाच्च। अन्तं प्रतिपन्नमित्यादि सार्वलौकिकव्यवहाराच्चेति भावः। शर्पूर्वा इत्यत्र त्रुणसं एम॰
विज्ञानो बहुव्रीहिः। तेन शरां न शेषः। किंतु स्त्रयामेवेति बोध्यम्॥ २२ णा १५ पाण १५ टाः ११ खोडो ३ग ३घ ४ञा १० ठ २१ खजा ८ इत्यर्थः कादयः क्रमेणे। १८
कादि संख्या पर इति बोध्यम्। ओविजीनि। नत्वास्य ईदित्वसामर्थ्यादिवसेट्त्वावधारणे विजिरिति सानुबन्धपाठो व्यर्थ इति वाच्यम्। अत एवैवं पाठात्॥ ९

आस्पदमिति। प्रसिद्धिकरं नामग्रामादि वा। ययामर्यादा प्रतिष्ठा लब्धेति स्थापनेति ययात्वयास्य प्रतिष्ठा कृतेनेति। अवस्थानमिति। यया कृते प्रतिष्ठेति एकत्र
स्थापनं मण्यादेः सूत्रादेर्वा। सन्दर्भ इति। शब्दानामित्यर्थः तन्त्राहृत्यादिनेति। वक्तुः तन्त्रेणोच्चारणं बोद्धुराहृत्या बोध इत्यर्थः आदिनैकशेषादृत्तीनां संभवाच्चेति।
गाधृ। आस्पदं स्थापना अवस्थानं वा प्रतिष्ठा। एकत्र स्थापनं सन्दर्भो वा ग्रन्थः। नाथृ नाधृ। उपतापो रोगः। उपघात इत्यन्ये। आशिष्येवेति। अनु
दात्तेत्वादेव सिद्धे नियमार्थं वार्त्तिकमित्यर्थः। अनसकद्व्ल। तच्चाहृत्यादिना लिटीत्यादेश विशेषणमेतत्स्य निमित्तं चेत्याह। लिण्णिमित्तेति। किति
लिटीति च। यत्तु प्राग्लिट् कृतेनाभ्यासादेशहीनस्येति व्याख्यातम्। तन्न। अभ्यासग्रहणस्याधिकारात्। आदिग्रहणत्यागेन न्यूनत्वाच्च। पेचतुरित्यादौ
हलादिः शेषेणाभ्यासस्यानादेर्हलो लुप्ततया ऽसंभवाच्च। अभ्यासैकदेशस्यादेशः स न तु कृत्स्नस्याभ्यासस्येति चेत्तर्हि व्यावर्त्याप्रसिद्धिः। चक्रणतु
रित्यादावप्येकदेशस्यैव चुत्वादिप्रवृत्तेः। भदि। कल्याणं मङ्गलम्। सुखमात्मगुणः। मदि स्तुति। मोदो हर्षः। मदो गर्वः। स्वप्नमालस्यम्। मदी हर्षे दि
वादौ। हर्षग्लपनयोर्घटादौ। मदत्स्त्रियां गौं चुरादौ। नश मदद। शसु हिंसायाम्। दन्त्यान्तः। अनुप्राचा शशेति तालव्यान्तं पठित्वा शशाप्लुतगता विति।
धाना विदस्सूत्रं संचालितं तदाकरविरोधादुपेक्ष्यम्। गुणशब्देन भावितस्येति। अवयवावयविभावः षष्ठ्यर्थः। भावितत्वं च प्रयोज्यत्वम्। सा
क्षात्परंपरासाधारणम्। तथाहि। शशरतुः पपरतुरित्यादौ गुणशब्देन अर् क्रियतेनेन तदवयवो ऽकारः। लुलविथेत्यादौ तु गुणशब्देन ओकारः
।तस्यावादेशस्तदवयवो ऽकारः। सकर्मक इति। यथा। स्वदस्व हव्यान्यनुभवेत्यर्थः। अकर्मक इति। यथा। अपां हि तृप्तायन वारिधारा स्वादुः सुगन्धिः
स्वदते तुषारेति। न स्वदते न रोचत इत्यर्थः॥ २९। अभ्यासादेशस्यासंभव इत्यर्थः। घटादाविति। अपूर्वो घटादौ पठ्यत इति मतेनेदं यद्वाऽस्य दिवादिप
ठितस्यानुवृत्त इति शेषः। तेन सनाधिक इति भावः। गुणशब्देनारिति। उरण रपर इति सूत्रेणैकवाक्यतया ऋकारान्ताङ्गस्य स ऋकार स्यार्गुणो भवतीति
विधानादिति भावः। तदवयवोकार इति। नशसदद वादिक्रमणामित्येव सिद्धे गुणग्रहणसामर्थ्याद् गुणशब्देन भावितस्यानिकावमादायलुलविथेत्यादावपि

अव्यवहितपराविति। पर्युदासस्य सदृशग्राहित्वादव्यवधानांशलाभः। स्त्यैशब्देइति। स्त्यैष्ट्यैइतिद्वि॰ पाठः पर्युदासेमूलम्। सेक्षूयेष्टेइति द्वयोःपाठ।
५२ न५
धात्वादेःषः। यदितु धानवएव दन्त्यादयः पठ्येरन् तदाण्यन्ताच्चङि॰ असिष्वदन्। सिषेधेत्यादौ आदेशप्रत्यययोरितिषत्वंनस्यात्। अतः
षोपदेशान्यठित्वासादेशः क्रियते। येषान्तुषत्वं नेष्टंन्तेदन्त्यादयएवपठ्यन्ते। सृगतौ विनियथा। एवंस्थितेधातुपाठशुद्ध्यैवनालव्यादिव्यवस्था
वत्। षोपदेशव्यवस्थाप्युचिता। तथापिसाधादिषुसादिपाठस्येवदृश्यमानेयापाठस्यसंकीर्णत्वाल्लक्षणमुखेनषोपदेशत्वव्यवस्थाप
यति। सेगित्यादि। दन्त्यश्चअच्चदन्त्यौ वौ। तौ अन्तौ। अव्यहितपरोयस्यसः। दन्त्याजन्तः। सःसकारआदिर्येषान्तेसकाचःषोपदेशावेद्याःत
थाचषागतिनिवृत्तौ। षिधगत्यामित्यादौपठ्यमानषकारः शुद्धएवसाधादौतुसांप्रतमपठ्यमानोपिषकारःप्राक्स्थितइत्यनुमेयमितिभावः।
दन्त्येत्यादिकिम्। तुस्कुन्दे। एकाचः। किम्। सौसूत्र्यते। सोसूत्र्यते। सृचिसृत्रीचुरादावदन्तौ। अतिव्याप्तिवारणायाह। सेगित्यादि। सेकृगतौ। सृ।
सृगतौ। स्तृञ् आच्छादने। सृजविसर्गे। स्तृञ् आच्छादने। स्त्यैशब्दसङ्घातयोः। एभ्योन्यानुक्तलक्षणेनासङ्ग्रहीतान्यडधातून्सङ्ग्राहिकयासङ्ग॰।
ह्णाति। ष्विष्क्ित्यादि। ष्वष्कगतौ। ञिष्विदागात्रप्रक्षरणे। स्वदआस्वादने। ष्वञ्जपरिष्वङ्गे। ञिष्वप्शये। ष्मिङ्॰ ईषद्धसने। एतेषोपदेशाइत्य
न्वयः। प्राचातुएकाचइतिनोक्तम्। तत्रसृचिसृत्र्यादावतिव्याप्तिः स्पष्टैव। यत्तुव्याख्यातारआहुः। येषां स्वतएवषकारादित्वंपठ्यतेष्ठिवादी
नान्तेषापरवर्गद्वितीयत्वपक्षेपिषोपदेशत्वंननिवर्त्तते। नह्येतएवषोपदेशानान्यइतिनियम्यते। तथाहिसतिष्ठिवाँरिती यष्टकारइतिपक्षेस।
त्वनिषेधोऽनर्थकःस्यात्। नाप्येतेषोपदेशास्वेन्ययोगोपिव्यवच्छिद्यते। सेवतिर्दन्त्यादिरप्यसीतिनिमित्रेयन्यास्सकारादिभिरुक्तत्वात्संभवमात्राभिधान
मेतदितितत्रवक्तव्यम्। ययोगान्ययोगौनव्यवच्छेद्यौ तर्हिव्यर्थमेवेदम्। अविवेकस्यतदवस्थत्वात्। किंच। विवेचनायषोपदेशत्वलक्षणेनबो ने३ १९ध्ययतीतिस्वोक्तावतो
त्वनार्थःप्यसङ्गतेति तथासतिस्यादितिशेषः। लक्षणस्यायोगान्ययोगव्यवच्छेदकत्वस्वभावत्वात्। अन्यथालक्षणत्वमेवहीयेतेतिभावः॥ ॥

व्याहृतैवेति। अयोगेनाव्यवच्छिद्यत इति स्वोक्त्येत्यर्थः। षोपदेशत्वमावेद्यत इत्यस्य तदयोगो व्यवच्छिद्यत इत्यर्थात् इति भावः। अन्याख्यानार्थमेवेति एवं हि तत्र भाष्यं दृशि वे रपि द्वितीयषकार इति सत्वे कृते ष्टुत्वेन सिद्धं नेष्टीव्यत इति नार्हि न सिध्यति। द्वितीयषकारको ऽपि स्वेक्ति यत्ते नेष्टीव्यत इत्युभय

अपि च। धातुपाठेऽयं षामादौ षकारो न पठ्यते साध्यतिस्थलत्यादीनां तेषामनेन षोपदेशत्वमावेद्यत इति स्वोक्तिरपि व्याहृतैवा। यत्त्वन्य-
योगव्यवच्छेदं ष्ठिवेः सत्वनिषेधानर्थक्यं स्यादित्युक्तम्। तन्न। सत्वनिषेधमन्याख्यानार्थमेवाकरे द्वितीयषकार इति पक्षस्य प्रक्रान्तत्वेनेष्टा-
पत्तेः। यदप्ययोगव्यवच्छेदे सेवति निर्देश्यादिरपीति मैत्रेयादिमतेन विरोधोद्भावनम्। तदपि न। से कृष्य इति धातुद्वयपाठवादिनां द्वितीयधातुपा-
ठसामर्थ्येन धातुत्वोपपत्तेः। तादृशयत्नविशेषविरहे योगव्यवच्छेदस्य निर्दुष्टत्वादिति दिक्। ञ्मादी २७ ईदित्वं श्वीदितो निष्ठायामिति ओभा-
वार्थं ह्रादो निष्ठायामित्युपधाह्रस्वः। आह्लत्तः। आह्लत्तवान्। स्वद आस्वादने। २८ अषोपदेशत्वादसिस्वदत्। यकाररहितो ऽप्ययमिति। तथा
च प्रयुज्यते। मधुश्च्युतङ् घृतमिव सुपूतमिति। मन्थ विलोडने ४२ हिंसासंक्लेशनयोरपीत्येके। अयं अपादौ च इह च अग्रे निरनुषङ्ग एव इति। षि
धु गत्याम्। ४७ अयमुदिदिति काश्यपादयः। न इति विरोधादयुक्तमिति माधवः। तथा हि। अनिट्कारिकासु सिध्यतिबुध्यत्योः श्यना निर्देशात्
धितं बुधितमिति निष्ठायामुदाहृतम्। ऊदित्वे तु ऊदितो वेति क्त्वायामिड्विकल्पात्। निष्ठायामिण्न स्यात्। यस्य विभाषेति निषेधात्। अत एव
न्यासपदमञ्जर्योरपि सिधेरूदित्वमनार्षमित्युक्तम्। उपसर्गात्सुनोतीति। सुनोत्यादीनां पञ्चानां निपातनिर्देशाय ङ् लुङि इत्यर्थः। तेनाभिसोषवीतित्या-
((दौ षत्वं नेत्याकरः॥

सिध्यर्थं त्वस्य नर्हि सत्वं प्राप्नोति एवं तर्हि द्विषकारकः सः आद्यस्य सत्वे कृते ष्टुत्वेन सिद्धं स्वल्लिट् ष्ठीवत इत्यत्र तर्हि धुटप्रसज्येत। :अत्राह चिवीजन्तु।
एवं तर्हि यादौ ष्ठिवुस्स्कन्दीति इति। तादृशयत्नेति। धातुद्वयपाठरूपेत्यर्थः। एकधातुपाठे ऽयोगव्यवच्छेदस्य निर्दुष्टत्वादिति भावः। आकार इति
सोतिसोभन्योः शर्पूर्वा इति स्वयः शेषेण नयोः फलाभावेन पञ्चानामित्यसङ्गतमिति॥

तद्धीजानन्तरमप्याह। स्याद्दिष्वेवेति। नचगणनिर्द्देशात्स्यादिष्विन्यस्ययङ्लुकः प्राप्तिः गणपाठप्रसिद्दगणनिर्द्देशस्यैवात्रग्रहात्। अत्रतूपसर्गात्सुनोतीतिसूत्र। स्यस्यादौ नांग्रहणम्। नचाभ्यासेनस्वनिमित्ताक्षेपानन्तरपरेनियमोनचैनयङ्लुगन्तेइतिवाच्यम्। सन्यङ्न्तस्यद्दित्वविधानेनतेनतत्परत्वाक्षेपात्। यङन्तेभ्यासस्यद्दित्वनिमित्तपरत्वासंभवेनतेननदाक्षेपासंभवाच्चनदन्तत्वाक्षेपेतुदोषः एवनेनिदिक्। ण्यन्तादपिनामधातुरितिशेषः। इत्याहुरिति। अत्रारुचिवीजन्तुणिलोपेसतिन्यस्यैकाच्त्वेपिआचारक्विबन्ताद्यङ् लुग्विधानेनमानमसिद्दसूत्रस्थभाष्यविरुद्धंचतदिति। हरदत्तइति। नाद्दशयङ्लुक्सन्वेद्दढतरमानाभावोरुचिः। मतास्थादिष्ववाभ्यासस्यषत्वम्। नतुसुनोत्यादिष्विति नियमेनापिगतार्थमेतत्। सेनयेति। ण्यन्तः। सेनयाअभियातिअभिषेणयति। शपानिर्द्देशोयङ्लुङ्निवृत्त्यर्थः नचानेकाच्त्वेनयङसंभवः। क्वौणिलोपेततःआचारेयङःसंभवादित्याहुः। सिधेति। शपानिर्द्देशोयङ्लुङ्निवृत्त्यर्थोदैवादिकनिवृत्त्यर्थश्चेतिहरदत्तः तेनप्रतिशेषिषीतीत्यत्राभ्यासेषत्वंन। अत्रमाधवेनमतान्तरमुपन्यस्तम्। सिद्ध्यतिनिवृत्त्यर्थएवायंशपानिर्द्देशः श्निपाशपेतिनिषेधस्तुनेहप्रवर्त्तते। सेधतेर्गतावितिनिषेधसूत्रेश्निपानिर्द्देशाज्ज्ञापकात्। सहियङ्लुकिषत्वपरित्राणेनार्थवान्नत्वन्यथेति। इण्कोरित्यधिकृतंतत्रोपसर्गेकवर्गस्यासंभवादिणेवसंबध्यते। तात्स्थ्यानाच्छद्यमित्याह। उपसर्गस्थादिति। इणन्तादुपसर्गादितितुनव्याख्यानम्। निःषुणोतिनिःषेधतीत्यादावव्याप्तेःसिद्धान्तेतुनुम्विसर्जनीयशर्व्यवायेपीतिषत्वंभवत्येव। यत्तुदुष्षुणोतिदुःषेधतीत्यादिप्राञ्चउदाजहुस्तच्चिन्त्यम्। दुरःषत्वणत्वयोरुपसर्गत्वप्रतिषेधात्॥ ११ नरमिति। अत्रारुचिबीजन्तुगत्यर्थेषत्वप्रवृत्त्यातस्यचरितार्थ्येनगतिभिन्नार्थेश्निपाशपेतिनिषेधबाधेमानाभावइति। भवत्येवेति। नवत्तुविरोधानत्संभवएवनस्यादितिभावः। दुरइति। षत्वणत्वयोःरुत्वस्यसिद्दत्वेनविषयोपसर्गत्वप्रतिषेधपरेदुरःत्वेषत्वेति वार्त्तिकेकृतरेफसान्तस्यापिग्रहणेनसान्तयोरपितन्निषेधात्। अतएवसुषामादिषुदुःषूशब्द पाठश्चरितार्थः सद्यपदुःसुषुस्यःकुरितिदुःपूर्वकस्याधातोःकुप्रत्ययेसाधुः। अन्यथादुःपूर्वकादेवकुप्रत्ययमङ्गीकृत्योपसर्गादित्येवषत्वेविसिनदेयर्थ्यस्पष्टमेवानचास्यरूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः। अन्यत्रनरूढेषुनिष्ठादिषुषत्वानापत्तेःअर्थवत्वारोपेणेतिचेत्कृतेपितुत्वंइत्सःपाठस्तुदुरयतइत्यादौरुत्वस्यासिद्दत्वेनलत्वाभावार्थेइरस्तुदुलयनइतिरूपंयत्रतुरुत्वमसिद्दंनिरःकुषइत्यादौतत्र

निपातनादिति।यत्त्वर्थाभावेव्ययीभावस्यनञ्तत्पुरुषेणसह विकल्पादव्ययीभावात्।ष्यत्रसुलभइतितन्नत्रधर्मिपराविदूरशब्देनाव्ययीभावेर्थासङ्गतेः

यत्क्रियायुक्तास्तंप्रत्येवोपसर्गाइत्युक्तम्।तेनेहन।निर्गतःसावकोऽस्मान्निःसावकः।ण्यन्तेतुप्रादीनांप्रकृत्यर्थविशेषकत्वेऽभिषावयति।ण्य
र्थविशेषकत्वेतुसुनोतिंप्रत्यनुपसर्गत्वाभावान्नषत्वम्।स्वंस्नादिष्वप्यूह्यम्।स्यादिष्वभ्यासेनप्राक्सितादितिचवक्ष्यते।तत्रसौत्रक्रम
ज्ञानस्योपजीव्यत्वात्सौत्रक्रमेणैवषत्वप्रकरणंव्याचष्टे।सदिरप्रतेः।षष्ठ्यर्थेप्रथमेत्याह।सदेरिति।स्तंभेः।सौत्रस्यैवेति।स्तन्भुस्कम्भुइतिसूत्रे
निर्दिष्टस्यरोधनार्थस्य।ननुष्टभिस्कभिप्रतिबन्धइतिपठिष्यमाणस्येतिभावः।एतच्चलक्षणप्रतिपदोक्तपरिभाषयालभ्यते।षत्वविधौहिनकारविशिष्ट
रूपमुपात्तंचसौत्रस्यप्रत्यक्षम्।इदितस्तुलाक्षणिकम्।तेनविस्तम्भतेइत्यादौषत्वंन।नन्वेवमुत्तंभतेइत्यादौउदःस्थास्तम्भोःपूर्वस्येतिनप्रवर्त्तेत
इतिचेत्।न।तत्रहिस्थास्तम्भोरितिमकारविशिष्टंरूपमुपात्तंतच्चोभयोरपिलाक्षणिकमित्यविशेषादुभयग्रहणात्।एतच्चसर्वंमाधवग्रन्थेस्पष्ट
म्।ननुसदिस्तम्भेरित्येवकुतोनसूत्रितंतत्राह।योगेति।अवाच्चेतिसूत्रेसदेःसंबन्धोमाभूदितिभावः।नानुवर्त्ततइति।स्तम्भेरित्यत्रेत्यर्थः।तथा
चैतदर्थोपियोगविभागइतिभावः।अवाच्च।आलम्बनमाश्रयणम्।यथायष्टिमवष्टभ्यास्ते।अविदूरस्यभावआविदूर्यम्।ननत्रावर्त्तत्तुरूपादिति
निषेधेप्राप्तेअतएवनिपातनाद्भावप्रत्ययः।वेश्च।विष्वणतिमांसम्।सशब्दंभुङ्क्तइत्यर्थः।भोजनेकिम्।विस्वनतिवीणा।परिनिविभ्यः।षेवसेवने।
षिञ्बन्धने।कान्तः।अजन्तश्चविषितःविषयः।प्रत्ययविशिष्टग्रहणंकिम्।विसिनोति।यत्तुकेचित्।विषिण्वन्तीतिविषयाइतिप्रयुञ्जतेतन्नविप्र
हेषत्वणत्वेप्रामादिके।षिवुतन्तुसन्ताने।षहमर्षणे।सुट्आगमः।परिष्करोतीतियथा।स्तुस्वञ्जोरुपसर्गात्सुनोतीत्येवसिद्धेपर्यादिपूर्वयोरेतयोःसि
वादीनांवाड्व्यवायेपीतिविकल्पार्थंपुनर्वचनम्।स्यादिषु।देवाक्येः।यद्यपिनिषिषेधेत्यादावभ्यासस्योपसर्गात्सुनोतीत्यनेनसिद्धमभ्यासान्यस्यत्वादे

॥(शप्रत्यययोरितिनतथापि॥

धर्मपरेतस्मिंस्तुष्यन्तोवैकल्पिकापत्तिरिति भावः॥

उ॰ म॰ श॰ २१

आद्यंवाक्यमिति। स्थादिष्वभ्यासेनचेत्येनदि त्यर्थः। अत्रव्यवायेपीत्यनुवर्त्तते। अपिनाऽव्यवायेपि। सेनयेति। अत्रसेनाशब्दस्याव्युत्पन्नत्वेनादेशसकाराभा-
वइतिभावः। अवर्णान्तेतितत्रेणपरत्वाभावादितिभावः। नचपूर्वत्रासिद्धत्वस्यद्वित्वेनिषेधात्। पूर्वंधातुरुपसर्गेणेतिपक्षेनत्वङ्गत्वात्पूर्वंषत्वेकृतेनषत्वानामेव
द्वित्वेधिनष्टाविन्यस्यसिद्धिरेतद्वचनंविनापीतिवाच्यम्। पूर्वंधातुः साधनेनेतिपक्षस्यसमुस्यत्वादितिबोध्यम्। एकपदेति। पदस्येत्येकत्वविवक्षणात् असम-

णाद् सं॰

आद्यंवाक्यंफलत्रयार्थम्। तथाहि। अषोपदेशार्थम्। सेनया अभियातुमिच्छति अभिषिषेणयिषति। अवर्णान्ताभ्यासार्थञ्च। अधीसनङ्गेत्रभि
षेधितस्तो। षणिप्रतिसिद्धार्थञ्च। अभिषिषिक्षति। षिचक्षरणे। स्तौतिण्योरेवेतिनियमाद्धि वर्त्तितषत्वंनदृश्युपसर्गमाश्रित्यभवति। अभ्यासस्येति
द्वितीयवाक्यन्तुनियमार्थम्। स्थादिष्वेवाभ्यासस्यषत्वंनसुनोत्यादिष्विति। नत्फलन्तुषूप्रेरणे। अभिसुसूषति। अत्रोक्तनियमादभ्याससकारस्यषत्वंन।
द्वितीयस्यतुस्तौतिण्योरेवेतिनियमाच्च। षोअन्तकर्मणि। अभिसिषासति। इहषणोभावा भ्यासात्परस्यषत्वंपूर्वस्यतुन। उक्तनियमात्। षिधू
शास्त्रे। ४८। शास्त्रंशासनमिति। अन्येतुशास्त्रविषयकज्ञानमित्याहुः। माङ्गल्यंमङ्गलक्रिया। स्वार्थेष्यञ्। झलोझलि। सस्यलोपः स्यादिति। प
दस्येति। वर्त्तते। तत्रप्रत्यासत्तेर्झलः झलिसस्येतिनिर्दिष्टानान्त्रयाणामेकपदसंबन्धित्वेविधिरयम्। ननुसोमसुत्स्थानेत्यादौ। णोपदेशास्त्विति नट
शब्दे। नटअवस्यन्दनेचुरादिः। यस्तुनटनृत्ताविति घटादिः सनेहगृह्यते। नाटीतिदीर्घनिर्देशात्। नाथृनाधृयाच्ञादौ। टुनदिसमृद्धौ। नक्कनाशने ॥ ॥

पदेकपदेत्यर्थः। तेनसोमसुत्स्थितिमित्यादौसमासेतिनेतिबोध्यम्। उरस्येतिज्ञापकाज्झलादौप्रत्ययेस्वायंलोपइत्यन्ये। घटादिरिति। भ्वाद्यनुवादरूपइत्यर्थः। रा॰म॰
नचघटादौचुरादेरे वानुवादइतिवाच्यम्। नान्येमितोहेतावितिज्ञपादिपञ्चकव्यतिरिक्तस्यस्वार्थाणिजन्तस्यमित्त्वनिषेधात्। एवञ्चयस्यनाटीत्येवरूपंतस्या २१
त्र पर्युदासः भौवादिकस्यनटयतिनाटयतीतिरूपद्वयसत्त्वेनप्रनाटयतीत्यादौनाटिरूपेपिणत्वंभवत्येव। वाक्यार्थाभिनयङ्कारयतीत्यर्थइतिभावः॥ :

एधनिरिति। भूसहितस्यधनिरित्यर्थः। महाभ्यादृतीति सत्तारूपब्रह्मस्मारकत्वेन चोभयोर्माङ्गलिकत्वमिति भावः। षोडयनीति। षोडन्तमाचष्टे इति णिचि टिलोपे पवाद्यच्चि षोडमात्मन इच्छतीति क्यचि रूपमिति कैयटः। एतच्चेति सूत्रस्य धातुग्रहणं चेत्यपि बोध्यम्। उपदेशोस्तीति। षकारादिभ्यः। आचारक्विप्।

न्तनयोनृतीगात्रविक्षेपे। सभ्यो भिन्नादित्यर्थः। दन्दशूकक्रियाया मिति। दन्दशूककर्तृका याक्रियायामित्यर्थः। क्लिदि परिदेवने। ७४। अ स्यानुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। स्वरितेत्सु तु पाठो न कृतः। क्रियाफलस्य कर्त्तृगामित्वेपि परस्मैपदं यथा स्यात्। शुन्धशुद्धौ। ७५। अयं शोच इति दिवादावनिट्। प्रथमं माङ्गलिकस्य धनिरुक्तस्तदनुरोधेनैव तवर्गीयान्तान्पठित्वा मातृकापाठक्रमेणाह। अथेति। सुध्यात्विति। सुध्यातूदाहरणं षोडयतिषण्डयतीत्यादि। एतच्च वार्तिकं भाष्ये प्रत्याख्यातम्। तथाहि। धात्वादेरिति सूत्रे उपदेश इति वर्त्तते। न च सुध्यातूना मुपदेशोस्ति। ष्ठिवुष्वष्कतीतु यकारादी। लोपो व्यो रिति यलोपः। यत्तु माचा सुध्यातु ष्ठैव ष्वष्के त्युक्तम्। स्माय तीत्युदाहृतं च। तदुनाकरम्। भाष्यवार्तिकयोः ष्ठैवइत्यस्य सत्वनिषेधाभावात्। स्मः प्रपूर्वस्य। प्रस्योन्यतरस्यामित्यादौ स्त्यारूपापन्नयोरीयोर्ग्रहणमिति वृत्त्यादि महाग्र न्थविरोधाच्च। स्वच्चोभयोरपि स्त्यायति। प्रस्तीतः। प्रस्तीमइत्यादि रूपाणि तुल्यान्येवायत्तु वदन्ति। धातुपाठे स्त्यै ष्ट्यै इति पृथक् पाठसामर्थ्यात्सत्वे नेत्याशय इति। तन्न। तिष्ठ्यासतिभ्रति ष्णपत इत्यादौ षत्वग्रहत्याचरितार्थत्वस्य माधवादिग्रन्थेषु स्पष्टत्वात्। राघृलाघृद्राघृ। अत्र द्राघृ आया मेइत्यपि पठ्यते। आयामो दैर्घ्यमिति कौशिकः। कदर्थनमिति स्वामी। उत्खउत्खि। सत्त्वा ग्रहत्तत्वादिति। यत्तु माधवेनोक्तमभ्यासमात्राश्रयत्वेना न्तरङ्गे हूस्वे कर्त्तव्ये पूर्वपराश्रयस्य वहिरङ्गस्य सवर्णदीर्घस्यासिद्धत्वाद्दूस्वो नेति॥ नास्त्येवान्यथा सुव धातुत्वाभावा। द्वार्तिकारम्भे स्यात्। प्रत्या स्याने तु नेति फलभेदः स्यादिति भावः। द्वयोरिति। आत्वेनोभयोरपि लाक्षणिकतया लक्षणप्रतिपदोक्तपरिभाषानवसर इति भावः। षत्वप्रहत्येति। स्त्यै इत्यस्यति

सि०कौ०टी०ता०॥

तच्चिन्त्यमिति। द्विमात्रवृद्ध्यभावेपि पर्जन्यन्यायेन ह्रस्वो दुर्वार इति भावः। दूषणान्तरमाह। ह्रस्वस्येति। पूर्वं प्रवृत्तिस्तु वार्णादाङ्गं न्यायेनेति मूलेस्य ग्रस्तत्वाद
पीति। हरदत्तादिमते इति भावः। अपिना रुचिर्बोधिता। तस्मादुत्तरकालप्रवृत्तिके ज्ञानन्तर्यमेव तन्मप्रवृत्तिरितिसिद्धान्तविरोधात् प्रागुक्तमेव हेतुरिति

तच्चिन्त्यम्। ह्रस्वस्याङ्गत्वेन बहिरङ्गत्वात्। असिद्धमसमाप्तेरङ्गाधिकार इति सिद्धान्तात्। प्रागभ्यासविकारेभ्य इति पक्षस्यैव तत्रैवेन्त्याद्यसिद्धा
पत्त्या दूषितत्वात्। अत एव नाभ्यासादीनां ह्रस्वत्वे इति वार्तिकं कृतान्तवद्भावप्रतिषेधआरब्धः। किञ्च। यत्रान्तरङ्गे बहिरङ्गे वाचो गानन्तर्यं तत्र
नाज्ञानन्तर्ये इति निषेधस्य सत्वादसिद्धत्वं दुर्वचमिति। इह उ खव उखीति दण्डकानन्तरं त्वगिकम्पने इति पठ्यते तन्न। गनौ प्राक् पठितस्य गति
विशेषेपि वृत्तिर्निर्बोधयितुमा अत एव अनतिप्रयोजनत्वादुपेक्ष्यम्। षच सेचने सेवने च। यद्यपि सेचन इत्येव प्रायेण पठ्यते तथापि सेवनार्थोपि प्रामा
णिकः। यं पूरवोद्व ग्रहणं सचन्तेद्रत्यादौ भट्टभास्करादिभिस्तथैव व्याख्यानादिति भावः। अयं समवाये स्वरितेत् दृश्यते। लोचृ दर्शने। ऋदित्। अ
लुलोचत्। पचि व्यक्तीकरणे। इदित्। अनिदिदिति दुर्गवर्द्धमानप्रभृतयः। न्यासकारस्त्वनिदितं परस्मैपदिनं च मन्यते तथा च निङो गोत्रादी
नीति सूत्रे पच निगोत्रमित्युपादाय पचव्यक्तीकरणे इति व्याख्यत्। एतान्येवैकदेशिमत्तानि गृहीत्वा निष्कारिका व्याख्यायामस्यापि ग्रहणमित्यवो
चाम सं मतकारादयोपि अनिदृप्रसङ्गे इदित्ग्रहणमूचुः। पचि विस्तारवचने इति चुरादौ। ऋज गतौ। अर्जनं प्राधान्येन। उपार्जनं तु प्रासङ्गिकम्। अ
यं पाठो मैत्रेयस्य सीरस्वामिप्रभृतयस्तु अर्जने इति पेठुः। तुडि धाविति। तत्र हि द्वि हल्ग्रहणं इणसे इदशस्य हलः परिग्रहार्थम्। अन्यथा नसान्तु डित्य

बोध्यम्। गतिविशेष इति उत्तरदेशसंयोगानुकूलव्यापारत्वमुभयोः सममित्यभिमानः। एकदेशिमतानीति। अनेन वस्तुतस्तासु ग्रहणमनुचितमिति सूचितम्॥

चारतुरित्यादावपीति। आदेन्यस्याप्युपलक्षणमिदम्। भाष्यकैयटयोरिति। एओङ् सूत्रे इति शेषः। विकल्पितत्वादिति। परेतु फणादिष्वपि भ्राजृ इतिय

नचारतुरित्यादावतिप्रसङ्गः। अभ्यासे च येनैकहल्मध्यवर्तीति संज्ञायां ... यदि भवति तर्हि अभ्यासे च येनैकहल्...एवेति नियमात्। नचास्य अभ्यासमात्रनिवृत्त्यर्थत्वंश

ङ्क्यम्। तथात्वे हि नाभ्र इत्येवं ब्रूयात्। यद्वा। द्विहल्ग्रहणमन्यार्थं व्याख्यायते। अवर्णोपधस्य यदि भवति अभ्यासे च एवेति नियमात्सर्वं सिद्धमिति।

भाष्यकैयटयोः स्पष्टम्। रुजि भृजी। द्वितीय ईदित्। श्वीदितो निष्ठायामिति नेट्। भृक्तः। भृक्तवान्। भ्रस्जपाक इति तौदादिकस्य भृष्टः भृष्टवा

न्। रुग्णात्वक इति। सम्प्रतातरङ्गि पयांसु आनृज्जे इत्युदाहरन्तस्तमामादिकमिति भावः। एजृ भ्रेजृ भ्राजृ। अत्र न्यासकारः। अवश्यपठित

व्येन फणादिके न भ्राजत इत्यादिसिद्धेरिह पाठो नार्थ इत्याह। तन्न। ह्रस्वेति यत्नविरहार्थमिह पाठात्। तत्र हि रभसा हवयात् फणादेरेव ग्रहण

मिति स्थितम्। यद्वा न्यासेऽपि इवशब्देनायमर्थः सूच्यते। इह भ्राजेरीदित्वमनुदात्तत्वमात्रफलम्। भ्राजभासेत्यादिना चङ्परेणावुपधाह्रस्वस्य।

विकल्पित्वात्। अबिभ्रजत्। अबभ्राजत्। अत्रेरेजिरपि क्वचित्पठ्यते। तदनार्षम्। रेजन्ते अग्ने पृथिवीमखेभ्यः। इत्यत्र राजते श्छान्दसमेत्वमि

ति भट्टभास्करोक्तेः। कुच शब्दे। अयं गतावपीति स्वामी। ज्वलादौ तुदादौ चार्थान्तरं वक्ष्यां ग्लुञ्चु षस्ज गतौ। आत्मनेपद्यपीति। हेतुमति सूत्रे यद

भिप्रायेषु सज्जत इति भाष्यप्रयोगादिति भावः। गुजि अव्यक्ते शब्दे। अयमिदिदपीति शाकटायनादयः। गुञ्ज शब्द इति तुदादौ। अर्च पूजायो

म्। अयं युजादौ स्वरितेत्। इह पाठस्तु कर्तृगे फलेऽपि परस्मैपदार्थः। शाकटायनस्त्वयमात्मनेपदीत्याह। प्रयोजनं तु कर्तृगेऽपि फले नङ्। एतच्च

सर्वमिह वमाधवेनोक्तम्। युजादौ तु नैनैवात्र न्यस्तग्रन्थविपरीतमुक्तं तत्र परिनिष्ठितरूपे विवादाभावेऽपि वदस्याघानोद्वर्णरएवेति ध्येयम्॥

४ कुञ्च क्रुञ्च गतिकौटिल्ये इति पठित्वा गतेः कौटिल्ये द्रव्यात्मने चेति क्षीरस्वामी व्याख्यत् अञ्चु गतिपूजनयोः गतियाचनयोरित्यग्रे स्मरितेत् विशेषणार्थो पूजादौ ४ चेति ४

क्ष्यते। एवञ्चास्यानुवृत्यात्‌ रमस्तु गवञ्च भ्राजभावेति सूत्रे भ्राजिग्रहणमास्तु धातुभेदेन रूपद्वयसिद्धेरित्याहुः॥

उ॰
म॰ श॰ समानाश्रयत्वञ्चेति। समानकार्यिकत्वमित्यर्थः। इदंस्वरूपकथनंनतु समानमिमित्तकत्वमित्यर्थः। विभिन्ननिमित्तकेपि इयायेत्यादौ बहुशः प्रवृत्तिदर्शना
२३ दितिबोध्यम। संवीतिरिति। असञ्ज्ञायाङ्कि ननम। असञ्ज्ञायां स्त्रीलिङ्गभावादौ समजेतिक्यपाभाव्यमितिबोध्यम। यङ्नसादिति। हलादित्वाभावात्। धा
त्वन्तरस्यत्वेनतत्समानार्थस्यार्धधातुकं प्रयोगएवनास्तीति भावः। इदञ्चार्धधातुक इति सूत्रे भाष्ये स्पष्टम। विषयेत्वापहारादिति

युच्छप्रमादे। युच्छतीति। अन्तरङ्गत्वात्किश्मलघूपधत्वाच्चगुणः। नचयार्णादाङ्गमवलीयइतिवाच्यम। यत्राङ्गवार्णयोर्युगपत्प्राप्तिः
समानाश्रयत्वञ्चतत्रैवनत्वथेति कैय्यटादिभिः सिद्धान्तितत्वात्। इहचवैपरीत्यात्। उञ्छेइति। उञ्छतीतिसूत्रे उञ्चिनोतीत्यर्थः इतिन्या
सः। वदराण्युञ्छति। वादरिकः श्यामाकानुञ्छतिश्यामाकिक इत्युदाहरणोवृत्तिकारस्यापिव्यापित्वेनोच्चयनार्थत्वमेवाभिप्रेतम। धज
ध्रजि। षडप्येतेतवर्गचतुर्थादयः। नरङ्गिणीकारादयस्तु आदौदन्त्याप्यादीइत्याहुः। तर्जभर्त्सने। अयञ्चुरादावपि। अजेर्वी। दीर्घान्त
आदेशः। ह्रस्वान्तपाठेतु संवीतंसंवीतिरित्यादिनसिध्यत। आर्धधातुकेविषयेइति। तेनप्रत्ययोत्पत्तेः प्रागेववीभावे हलादित्वाद्दडि
वेवीयतेइत्यादिसिध्यति। परसप्तम्यान्तु यङ्नस्यादिति भावः। यङ्लुकत्वस्मान्नभवति। यतोलुकायङः आर्धधातुकस्यविषयत्वा
पहारान्नार्धधातुकाभिव्यक्तिरितिर्वीभावस्यनैवप्रसङ्गः। एतच्चनलुमतेतिसूत्रेकैयटेस्पष्टम। कुसभृ। इकृञ्करणे। कुन्हिंसाया
म। इयोरपिग्रहणम। एवंभृइतिभरतिविभर्त्योः। वृइतिवृञोः। इहकुसभृएषांएकञ्चउपदेशइतिप्रकृत्याश्रयेनिषेधेप्राप्तेवृङ्वृञो
सुश्रुकः कितीतिप्रत्ययाश्रयेप्राप्तेनियमोयमित्याह। क्रादीनाञ्चतुर्णामिति॥ ११ ज्ञानविषयत्वापहारादित्यर्थस्तदाह। नार्द्ध
धातुकाभिव्यक्तिरिति। प्रत्ययलक्षणन्तु ननलुमतेतिनिषेधात्। इयोरपीति। व्याख्यानादितिभावः। नियमोयमिति। अष्टानामपिनियमार्थत्वन्तुन। तुष्टो
येत्यादौ भारद्वाजनियमेनेडापत्तेः सचनेष्टइतिनडुशीत्यत्रभाष्येस्पष्टं नियमाद्विधेर्बलवत्वाच्च। कृसृभृवृइतिचत्वुत्तरषष्ठीकंपृथक्पदं क्रादिषुचतुर्ष्वपिविति

गम न्नाविरिङ्गणमङ्ग्या मेव तियमार्थत्वम॥

एम॰
२३

पत्तप्राप्तिनस्यैवेति। क्रादिषु तस्यैव प्राप्तेरिति भावः। एकमेवेति। अतएवोपदेशत्वनदिति सूत्रे नित्यानि थइत्यस्माज्झिर्व्यावर्त्यत्वेन भाष्ये उक्तः। अन्यथा न।
दभावे क्रतोभारद्वाजस्येति विकल्पः तस्त्वेऽमूदित्वप्रयुक्तविकल्पस्यैव संत्वेन तरसङ्गतिः स्यस्त्वैव। ननु क्रादिनियमेन तस्त्वेऽनित्य इडिति विशेषो स्त्येवे।
निइदमवमनेयुक्तमिति भावः। विपरीत इति। अष्टानामपीति शेषः। अतएव स्तुत इति निर्देशप्रदर्शनमग्रे। नच क्रतोभारद्वाजस्येति नियमप्राप्तिनस्ये

निषेध इति। नेड्वशीति प्रक्रमात् नञ्प्राप्तिनस्यैवाभावस्यायं नियमो न तु विभाषा बलभ्यस्यापि। तेन ससिषेधिय। सिषेद्ध। सिषिधिव। सिषि
ध्वे त्याद्युभयं भवति। केचित्तु यावान् कश्चिदिड्भावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा स सर्वो बाध्यत इति मन्वानाः सिषेधिथेत्यादिरूपमेवरू
पं नत्वनिट्कमपीत्याहुः। ननु विपरीतस्य सर्वनियमोऽस्तु। क्रादिभ्यश्चेदिण्न तर्हि लिटयेवेति। मैवम्। प्रकृतग्रन्थेन मधीष्टो भूतः। परिहृतो रथः। स्तुतसोमयो
रित्यादिनिर्देशविरोधापत्तेः। स्वादेनत। अस्तु प्रकृत्याश्रयस्य नियमः प्रत्ययाश्रयस्य तु न संभवति। वृग्रहणस्य ववर्थेत्यत्राप्राप्तनिषेधप्रापकत्वात्।
नह्यत्र प्रकृत्याश्रयः प्राप्नोति। वृञ उदात्तत्वात्। नापि प्रत्ययाश्रयः। थलो ऽकित्वात्। एवञ्च बभूविवेत्यादौ श्रयुकः किती नि निषेधो दुर्वार इति चेत्।
मैवम्। बभूयाततन्थ जगृभ्म ववर्थेति निगम इति सूत्रेण छन्दसि ववर्थेति निपातनात्। भाषायां वृञः स्य लइटः स्वीकर्तव्यतया वृग्रहणस्य
थल्विषयत्वायोगात्। वमादीनाञ्च किन्त्वेन नियमस्य सुस्थत्वात्। अचस्तास्वत्। उपदेश इति। एतच्चोत्तरसूत्रादिहापकृष्यते। नित्यग्रहणमनि
(ट्टो विशेषणम्॥
दो निषेधाय क्रादिग्रहणं विध्यर्थमिति वाच्यम्। तथा हि सति सुदुस्तुश्रु क्रतो भारद्वाजस्येत्येव पठेदिति भावः। विरोधापत्तेरिति। किंच कृञा
दीनामनुदात्तपाठवैयर्थ्यापत्तिरित्यपि बोध्यम्। न संभवतीति। वृङ मादाय तत्संभवेपि वृञमादाय विधेः संभव इति भावः। अपकृष्यत इति। एतच्च क्रतोभा
रद्वाजस्येति सूत्रस्य स्पष्टमनदपकर्षे च खेडादेर्देधियेत्यादिसिद्धये स्यग्रहणम्। एतेनोपदेशे एजन्तानामात्वविधानेनैजन्तात्वरत्रस्य लोरसंभवेन कृग्रहणमे

अपेक्षायामिति। अजन्तस्य धातोः प्रयोगमात्रावच्छेदेनेड्भावाप्रसिद्धेस्तथापेक्षेति भावः। एवं थल्यपीति भावः नासौ हृष्टस्येड्भावस्य थल्यतिदेशः। तेनादेर्घ्यां
स्तादेशे जघसिथेत्यत्रोऽपि थेत्यत्र च नित्यमिट्। न चानयोः सामानाधिकरण्याभावेन विशेषणाभावप्रयुक्तो विशिष्टाभावोऽस्त्येवेति वाच्यम्। नासि चेत्यतस्तासीत्यस्य न
हृष्टइत्यनेनान्वयानुवृत्त्यैव तासि नित्यानिटस्य थल्येवेत्यर्थे नैव सिद्धे तास्वदित्यनेन यस्य तासावड्भावो हृष्टस्तस्यैव थल्यतिदेशान्न दोषः। स्यानिवद्भावेन तु

कृ नित्यमनिडित्यपेक्षायां तासेः सन्निधानात्तत्रैवेति विज्ञायतेन तासि च कृप इति सन्निहितं वानुवर्तनइत्याह नासौ नित्यानिडिति। नास्वदि
तिसप्रम्यन्ताद्वतिः। यथा तासौ न भवति स एवं थल्यपीत्यर्थः। नित्यमनिटः किम्। दुधविथ नाय न्तासो नित्यमनिट्। स्वरत्यादिना विकल्पितेट्त्वा
त्। अस्य थलि नित्यमिडिति काशिका। एतच्च विकल्पनिबन्धनस्यापीड्भावस्य क्रादिनियमेन निवृत्तिरिति पक्षे बोध्यम्। निषेधनिबन्धनस्यैवेति प
क्षे तु नित्यग्रहणाभावे स्वरतेस्थलीड्विकल्पो न स्यादिति बोध्यम्। किंच। उत्तरार्थमपि नित्यग्रहणम्। तेन क्रमेरपि चक्रमिथेति भवति। नहि क्रमिस्ता
सौ नित्यानिट्। स्नुक्रमोरनात्मनेपदनिमित्ते इति वचनात्परस्मैपदे सेट्कत्वात्। उपदेश इत्यपकर्षस्य फलं तु भारद्वाजसूत्रे स्फुटीभवि
ष्यति। उपदेशेऽत्वतः। उपदेशे किम्। कर्ष्ठ चकर्षिथ अत्वतः किम्। भेत्ता। बिभेदिथ। तपरकरणं ङिःम्। राद्धा। रराधिथ। तासौ किम्। जिघृ
क्षति। जग्रहिथ। नित्यानिटः किम्। अङ्गा। अञ्जिता। आनञ्जिथ। चक्रमिथ। ऋतो भारद्वाजस्य। दीर्घान्तेषु तावत्तायन्निषेधः। ऋत इति।
तपरकरणात्। ह्रस्वान्तेषु अच स्तास्वदित्येव सिद्धः। हृङ्वृङ्ग्रो यद्यपि सेटौ तथापि वृङः स्थल नास्ति। आत्मनेपदित्वात्॥

ननासौ नित्यानिट्त्वा।
निदेशोशास्त्रीयत्वात्। इति भावः। थलि नित्यमिडिति। नित्यग्रहणाभावे भारद्वाजनियमेन विकल्पः स्यादिति भावः। इति पक्षेत्विति तु नावृत्ति विरोधाद्वयं प
क्षः। पु कइतिसूचितम्। अत्वतः किमिति। अत्वतस्तास्वत्थल्यनिटो नित्यमुपदेश इत्येव कार्यमिति प्रश्नः। अजन्तात्तभित्रोज्जान्व्यावर्त्य इत्युत्तरम्॥ ६ ॥

दमि१

दृष्टा भाष्यमिति। न च क्रादनेषु विकल्पेन निषेधार्थमिति वाच्यम्। अचस्तास्वदिति सामान्यसूत्रप्रणयने भारद्वाजातिरिक्तैरप्युदनेनिषेधस्यैवाङ्गीकारेण स्व
त्यन्तरानुसन्धानद्वारा विकल्पस्य वक्तुमशक्यत्वादिति भावः। नस्येति। उपदेशेऽत्वत इत्यस्येत्यर्थः। इहेति। क्रादिसूत्रे। एवं च तत्पदसंबन्धवान्सइण्निषेध

दित्या

ऽत्र स्तुकन्दसि ववर्थेति निपातनाद्भाषायामिट् भाष्यम्। न च ऋ आदिषु परत्वान्नित्यत्वाच्च गुणे रपरत्वे च कृते ऽनजन्तत्वादेव चस्त। स्वदित्यस्याप्र
वृत्तिरिति वाच्यम्। तत्रोपदेशग्रहणस्यापकर्षणात्। तस्मान्नियमोऽयमित्याह। क्रादनस्यैवेति। स्यादेतत्। स्तु द्रु स्रुश्रुवामपि थल्यभारद्वाजनियमादिट्स्या
त्। न च क्रादिसूत्रेऽस्त्वादीनां ग्रहणेनास्य बाध उचितः। येन नाप्राप्तिन्यायेन वृमादौ क्रादिनियमप्रापितस्यैव बाधौचित्यादिति शङ्कामाह। न चेति। न
त्वेवमुपदेशेऽत्वत इत्यस्यैव बाधः स्यात्। क्रादनेषु तस्य प्रसङ्ग एव नास्तीति यदि तर्हि चस्तास्वदित्यस्यैव स्यात्तत्कथं योगद्वयप्रापितस्येत्युक्तम्। अत्रा
हुः। द्वयोरनन्तरमस्यारम्भाद्यौ यत्नात्सो निटस्य त्लीप्निषेधः स भारद्वाजस्य मते क्रादावनस्यैवेति व्याख्यानात्सर्वेष्टसिद्धिरिति। एवं चेहता
स्वन्यत्स्यनिटो नित्यं तासीत्यनुवर्त्तत इति फलितोऽर्थः। यद्वा। क्रादिसूत्रे स्तुप्रभृतीनां ग्रहणमेव द्वयस्यापि बाधकमस्तु। पुरस्तात्प्रतिषेधका
यडकरणसामर्थ्यात्। अनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीनेन प्रनिषेधनयथा वाध्येतेत्येतदर्थं हि तत्। पक्षद्वयमपीदमाकरेऽस्थि
तमिति मूलेऽप्युपनिबद्धम्। स्वजमन्ये। अत्र केचित्कजमद इति पठन्ति। राजृ कम्पने। दीप्तौ त्वात्मनेपदी गतः। टुओ स्फूर्जा। द्वितीयश्च। स्फूर्जथुः। ओ
कारो निष्ठानत्वार्थः। स्फूर्गणः स्फूर्गणवान्। आदितश्चेत्यनिड्भ्म। स्फूर्गणं स्फूर्जितं वानेन। विभाषाभावादिकर्मणोरिति वेट्॥ ॥ इत्यर्थादुक्तार्थलाभ इति भावः
इदमत्रैव सूत्रे भाष्ये ध्वनितम्। इट्द्वयस्यापीति। क्रादिनियमभारद्वाजनियमप्रापितस्यापीत्यर्थः। अनाश्रितेति। न आश्रितो विधानविशेषो येन नाप्राप्तिरूपोऽय।
स्य न इत्यर्थः। इण्मात्रमिति। अनन्तरमनन्तरश्चेत्यर्थः। अनारभ्याधीनेनेति। विधिमनारभ्याधीनेनेत्यर्थः। इदं वस्तेकाजाद्वसामित्यत्र भाष्ये स्पष्टम्। तदाह। पक्षद्वयम
पीति। मूलेपीति। तत्रान्यः क्रादिसूत्रे आद्योऽत्रेति बोध्यम्॥ ॥

उ॰
म॰ श॰ मदनेचेति। मदनश्चित्तविकारविशेषः। गञ्जागुमदिरागृहम्। इत्यग्र इति। प्रथममित्यर्थः। अग्रंपुरस्तादुपरिपरिमाणेपलस्यच। आलम्बनेसमूहेचप्रान्तेस्या
२५

अस्यदीर्घो पदे शेनोपधायाश्चेतिदीर्घस्यानित्यत्वज्ञापनान्मूर्छति। हुर्छति। इत्यपिभवतीतिकेचित्। क्षिस्रये। अस्याजन्तेषुपाठउचितः। क्षिनिवास
गत्योरितितुदादौ क्षीष् हिंसायामितिक्र्यादौ क्षिणुहिंसायामिति तनादौ। वोपदेवस्तुक्षिसैश्वर्ययोरितिभ्वादिम्। क्षिष्हिंसायामितिस्वादिर्वैदि
कं चेत्याह। लजलजि। लज्यात्। लज्ज्यात्। ओलजी ओ लस्जी व्रीडनेइतितुदादौ। लजप्रकाशनइतिकथादौ लञ्जीतिपदद्वयपुदादिदण्डके भाषार्थःतुजि
पालने। भाषार्थीयंयुजादौ। गजगजि। गजमदनेच अयंचुरादावपिशब्दार्थः। गर्ज शब्देइत्यग्रे। वजव्रज। ववजतुः। वव्रजतुः। अट्ट दीपधइति। तथाचन।
न्द्राइतिद्वित्वनिषेधादकारं विहाय टिशब्दस्य द्वित्वेदकारस्यष्टुत्वेचर्त्वेच। अट्टिटिषते आट्टिटदित्यादिसिद्ध्यति। नचपरत्वान्प्रागेवष्टुत्वम्। असिद्धत्वात्।
यदाहुः। पूर्वत्रासिद्धेनास्तिविप्रतिषेधाभावादुत्तरस्येति। नचान्तरङ्गत्वात्ष्टुत्वंस्यादेवेतिवाच्यम्। सत्यपितस्मिन्शास्त्रासिद्धत्वाद्दकारएवायमिति
बुद्ध्याद्वित्वनिषेधात्। नचपूर्वत्रासिद्धीयमद्वित्वेइतिनिषेधःशङ्क्यः। द्वित्वेद्विसः। ननुद्वित्वनिषेधेपीतिभावः। नोपधइति। तथाचपूर्वत्रासिद्धीयमद्विर्वचन
इतिष्टुत्वस्यासिद्धत्वाद्दकारद्वयसहितस्यद्वित्वेहलादिशेषेअटिट्टिषते। आटिट्टदित्यादिसिद्ध्यतीतिभावः। अयमनादरेचुरादिः। घट्टचलने। अयञ्चु
रादावपि। स्फुट। अयंचुरादावपि। विशरणार्थोग्रेपरस्मैपदिषु। भेदनार्थश्चुरादौ। वदिएकचर्यायाम्। एकचर्याअसहायगमनम्। वण्ठरण्डाकल्पइतिइड-
श्वेतिसूत्रेभाष्यम्। अ यमनिदित्स्यात्यार्थः। परस्मैपदिषु। मठिकठिशोके। मठमदनिवासयोः। कठकृच्छ्रजीवनेइत्यग्रेपरस्मैपदिष्वंदितौ। कठशोकइतिचु
रादौ। हिठविबाधायाम्। अमुंपरस्मैपदिष्वपिपठन्ति। विबाधनंशाठ्यम्। कुडिदाहे। वैकल्यार्थःपरस्मैपदिषुपठिष्यते॥ नि न्नपुंसकम्। अधिकेचप्रधानेच्चप्र

यमेचाभिधेयवदितिमेदिनी। इड्श्वेतिसूत्रेइति। सूत्रविषयइत्यर्थः। परिमाणाख्यायामेतिसूत्रे इड्श्वेतिसूत्रमुपादाय ननुयमिडे कएव वण्ठरण्डाकल्पइतिभाष्योक्ते
रेवमुक्तम्। विबाधनमिति। विबाधेतिभावेप्रत्ययइतिभावः॥ ॥

राम॰
२५

ह्रिः पाठस्येति। हुडि सङ्घात इति पूर्वं पाठात्। व्यवहार इति। वश प्रत्याहारस्येति शेषः। सट्टद्विकेति। नित्यं वृद्धियुतस्येत्यर्थः। एतदुपपादितुम्। पठन्त्यन्ता इति ॥
वाल्पार्थः कुटादौ ॥ रक्षणार्थश्चुरादौ। वडि विभाजने। मडि च। अत्र द्वितीयो विशेषनेऽपि। अत एव पृथक् पठितः। मडि भूषायामित्यग्रे परस्मैपदिषु। णौ हर्षे च
भडि परिभाषणे। कल्याणार्थश्चुरादौ। पिडि। अयं चुरादावपि। मडि खण्डनार्थः परस्मैपदिषु। तुडि। अयमनिदित् परस्मैपदिषु। हुडि। वरणं स्वीकारः।
कुडि विकसन इत्येके पठन्ति। युक्तं चैतत्। हुण्डेर्ह्रिः पाठस्य वैयर्थ्यात्। वरणसङ्घातयो रिति पाठस्यैवौचित्यात्। चडि कोपे। अयं चुरादावपि। शडि।
तालव्यादिः। शण्डो सुरपुरोहितः। पडि गतौ। नाशार्थश्चुरादौ। कडि मदे। भेदने चुरादिः। अनिदिदिहैव। तुदादौ च परस्मैपदी। खडि मन्थे। खुडिरित्येके। ख
डि भेदने इति चुरादौ। हेडृ होडृ। हेड वेष्टने इति घटादौ। होडृ गतावित्यग्रे परस्मैपदी। वाडृ। वशादिरिति। पवर्गीयेणैव टनित्त्वं तान्यवहारो न तु दन्त्योष्ठ्ये
न। तथा सति व्यावर्त्यालाभात्। वशायुक्तिर्व्यर्था स्यात्। शाडृ। डलयोरैक्याच्छालते इति काश्यपः। अत एव मैत्रेयेण शालीशालेत्युदाहृतं। शोदवर्गी। अ
स्योणादिषु ईरन्वस्तते। नदेनतदति शौडीर्यं मोडलो मेनेर्न सृष्यतीति कल्पतरुः। यौडृ बन्धे यणादिः। कटे। अयमनिदिदग्रे। किट खिट त्रासे। त्रासो भ-
यो त्पादनम्। किटिर्गतौ पठिष्यते। इह पाठस्त्वर्थभेदात्। केचित्तु हनपठन्ति। चटेइत्येके। जठ झठ। जेटतुः झेठतुः। शटन्तृनौ। णोपदेशोऽयम्। तत्पर्यु-
दासेनाटीति सरट्डिकनिर्देशेनावसेयं नार्थस्य चौरादिकस्यैव ग्रहणात्। हटटी स्त्री। हाटकम्। सञ्ज्ञायाञ्चेति ण्वुल्। वाहुलकात् स्त्रियामपि। षट स
ट। अजन्ताट्टाप्। लुट विलोडने। अयं दिवादावपि। भाषार्थश्चुरादौ। प्रतिघाते घुनादौ स्तेयार्थः। परस्मैपदिषु। डान्तोऽयमित्येके इति। यद्यपीतः प्रभृ-
ति पठन्त्यन्ताः टवर्गतृतीयान्ता इति कैशिककाश्यपादयो वदन्ति तेचा। स्यादेनन्तरं पिडि हुडी तिपठन्ति। तथापि पिट कहाट कचेटी विटप्रभृतिषु टवर्ग
प्रथमस्यैव प्रसिद्धत्वाद्दशान्तरं तन्यमुपेक्षितम्। चिट। टन्। चेटिः। कृदिकारादक्तिन इति ङीष्। चेटी। विट। इगुपधलक्षणः कः। विटः। प्रश्निष्येति। उदा-
हरन्तीति वक्ष्यमाणेनेनं सम्बध्यते। इयत् तुरिति। द्वितेक्तनेऽपरे नेका इति यस्तं बाधित्वा तनरङ्न्त्वात् सवर्णदीर्घः॥

॥ ॥ १९ अदुदुणसंविज्ञानो बहुव्रीहिः। ॥

उ॰
स॰श॰
२६

ननदूयडि॰ति। अचिस्रुधातु इत्यनेन। अभ्यासस्येतितुन। तस्य प्रत्यासत्त्योनरस्वण्डावयवाच्यरत्वस्वप्रवृत्तेरितिभावः। स्थानितयेति। समानकार्यिकत्वमेवसमाना
श्रयत्वंनतुसमाननिमित्तकत्वम्। इयायेत्याद्यसिद्देरितिभावः। अतएवेति। अनेनपूर्वमतस्यायुक्तत्वंध्वनयति। असवर्णेति। तद्दृढितसूत्रारम्भसामर्थ्यादित्यर्थः
तेनेभ्यासस्यकार्येनदुनरस्वखडादेशस्यनत्कार्यप्रतिबन्धकीभूतंस्थानित्वंनेतिज्ञाप्यते॰ तएवारिरिव्रियादित्यत्रस्थानिवत्वेनेयङ्॰भवत्येव। तस्याभावकार्यप्रतिब
हिअ
ननदूयङ्॰। केचित्तुवार्णादाङ्गं॰वलीयइतिदीर्घंवाधित्वायण्। नचेहसमानाश्रयत्वंनास्तीतिवाच्यम्। अभ्यासोनरस्यइकारस्यसवर्णादीर्घयणोप्रति। स्था
नितयातयोः समानाश्रयत्वात्। अतएवदीर्घइणः किंतीतिदीर्घोविधीयते। ननुरात्स्यत्वेः अभ्यासस्येयङ्॰दुर्लभः। तस्मिन्कर्तव्येऽचःपरस्मिन्नितिवृद्धि॰
गुणयोःस्थानिवद्भावेनासवर्णेइतिप्रतिषेधादितिचेन्मैवम्। असवर्णग्रहणसामर्थ्यादेवस्थानिवत्वस्याप्रवृत्तेः। ननुनास्तिसामर्थ्यम्। इयर्ति। इयृनइ॰
त्यादौसावकाशत्वादितिचेन्मैवम्। नह्येकमुदाहरणंयोगारम्भं प्रयोजयति। अन्यथाहिअभ्यासस्यानीविति ब्रूयात्। अकृत्सार्वेतिदीर्घः। ईयात्॥ मडिभू
षायाम्। मरडनेइतिविभागेगतम्। कुडि। टवर्गतृतीयान्तः। प्रथमान्तइत्येके। मुठ डान्तइत्येके। पकारादिडान्तइत्यन्ये। क्षीरस्वामीतुद्वावपिइदितोपपाठ। चुडि
चुटेतिदुर्गः। तुडतोडने। तोडनंदारणंहिंसनञ्च। गडिवदनैकदेशे। टवर्गीयप्रकरणाद्दिद्वावंन्याय्यएव अन्तस्था दिषुपञ्चस्वेतेननतिङ्॰षयादइतिके
षाञ्चिन्मतंसुत्पादयितुंवृत्तिकृद्भिरुप न्यस्तः। लिङ्ङि॰ चावात्मनेपदेषु। अत्रात्मनेपदग्रहणंसिचोविशेषणंनतुलिङः॰ संभवात्। तदाह। आ
त्मनेपदपरः सिचेति। नेष्टकम्पनेच। अस्यपूर्वत्रपाठस्यकुंशक्यः। केचित्तुपूर्वत्रादिष्टदेष्टइतिपठन्ति। केष्ट। यतोचेतिपृथक्पाठसामर्थ्यादिदन्ता॰
भ्यतइतिस्वामी। मेष्टरेष्टलेष्टगताविति। अयंपाठःस्वामिनः। मैत्रेयस्तुनेष्टलेष्टसेचने। रेष्टइवगतावित्याह। हेष्टधेष्टइत्यपिकेचित्॥० ० ॥

न्यकृत्वाभावादिभावः। अभ्यासस्यानीविति। यङ्तु किंतुश्तिपाश्रयेतिनिषेधानित्यत्वान्नदोषः। वस्तुतउरित्येववक्तव्यंयोरित्यनुवर्तते। इणोयणितिसाहचर्या
द्व्याख्यानाच्चकृधातोरेवग्रहणम्। अर्तेरिवर्णस्येयङि॰त्यर्थइत्युचितम्। विस्तरस्त्वन्यत्र द्रष्टव्यः। असम्भवादिति। तस्यात्मनेपदपरत्वासंभवादित्यर्थः

उप्रकृतकातपाणिपरम्परासीमाभिसद्दसासुरत्वमनुभेवंईदृगानेकैतित
तत्सामर्थ्यातस्त्रैसीमाभ्रिपतिन्वितिकैरेईभिमावः॥
स॰सं॰
२६

ना

भट्टभास्करइति। अन्येतु त्रीण्यम्बकानि नेत्राणि यस्येति तद्व्युत्पत्तिमाहुः। उचितमिति। पदलाघवादिति भावः। परन्तु नक्तनमनुदात्तङितइत्यादौ नदनुवृत्तये धातोः कर्मण
इत्यादौ धातुपदार्थसन्देहनिवृत्तये चेति शेषः। उपदेशग्रहणानुवृत्त्येति। एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। तत्र कस्योपदेश इत्याकाङ्क्षायामुपस्थितत्वादार्धधातुकइ
त्येव विभक्तिविपरिणामेन संबध्यत इति बोध्यम्। वार्तिककृतेति। स्यसिच्सूत्रे वधभावात्सीयुटि चिरत्वं विप्रतिषेधेनेति वदतेत्यर्थः। अन्यथा आदेशानामन्तरङ्गत्वेन वि

पृ५

लक्षणः तस्मिन्निति द्वेधा व्याख्यात्। स्वदिमभिव्याप्येति। क्षीरस्वामी तु आङ्पूर्वात्स्वदेः सकर्मकाण्णिजिति व्याख्यात्। एतद्ध्रुवो नाद्रियन्ते। आकुस्मादि
ति। पूर्वसूत्राधृषाद्वा गर्वादिति परत्र चाङोऽभिविध्यर्थतायाः सर्वसंमतत्वे न तन्मध्यपतिते त्रापि तथैव व्याख्याया उचितत्वात्। पोषयतीति। शपृस्मन् आसु
पुष्टो गतः। घाटयतीति। अयं सङ्घातेगतः। पुनः पाठोऽर्थभेदात्। एकदेशिमतेनाह। लडितडनल चेति। लण्डति। ताडयति नालयति। स्वाद इत्येके इति। अस्मिन्म
ते पूर्वत्रापि आस्वादस्सकर्मका दितिदीर्घपाठो बोध्यः। दीर्घस्य त्विति। इदमेव दीर्घपाठस्य फलम्। ह्रस्वपाठेप्युपधावृद्ध्या आस्वादयतीत्यादिरूपाणान्तु
ल्यत्वात्। सत्यत्वेपि सिस्वादयिषतीति रूपन्तुल्यमेव सः स्विदिस्वदिसहीनाञ्चेति सूत्रेणाभ्यासेणः परस्य सकारो न तु षत्वमिति वक्ष्यमाणत्वात्। आ
स्वदीया समाप्ताः॥ अथाधृषीयाः युजादयः। आधृषाद्वा। योग्यताबलाण्णिजिति संबध्यते युजेर्णिजभावेऽ निष्ठान्तं स्य ष्टयितुमुदाहरति। अयोक्षीदिति
षह मर्षणे। अस्येह पाठो वृत्तिकारादीनामनभिमत इति दिवादौ षह षुह चक्यर्थ इत्यत्रावाचामेति माधवः। एतच्च प्राचीनस्वग्रन्थविरुद्धम्। तत्र हि स
यमेवेतद्विपरीतं प्रतिपादितमिति सहृदयैराकलनीयम्॥ गादिति भावः। इदमेवेति। षत्वाप्रवृत्तिरूपमित्यर्थः। सः स्विदीति। न च स्विदिसाहचर्येणास्य हेतुम
ण्णावेव प्रवृत्तिः। निरनुबन्धकपरिभाषयाऽस्यापि तत्र ग्रहणादिति भावः। णिशब्देन च णिमात्रग्रहणमिति बोध्यम् प्राचीनेति दिवादिस्थेत्यर्थः॥ ९ ॥

भाष्यकारोक्तेरिति। लीयंतेरिति रूपासम्भवाच्चेतिबोध्यम्। लुका निर्देशादिति। ख्यातिसाहचर्येणातथा निर्णय इतिभावः। स्यादेवेति। वचिस्वपीतिसूत्रेतुस्वपिसाह-
चर्यंतुश्विकरणपरिभाषाभ्यांव्याख्यानाद्दोभयोर्ग्रहणमितिभावः। मुख्यमनेइति। निष्ठाशीङ्‌स्त्यत्रसाहचर्येणादितएवग्रहणमिति। ननूच्चारणार्थइतिउच्चारणार्थो।

ईरसेय। ईरयति। ईरति। अदादौ ईर्तेर्इतिगतौकंपनेचगतः। लेतिति। विभाषालीयतेरित्त्वात्त्वंनभवति। लिनातिलीयत्योर्यकार्निर्देशइतिभाष्यकारोक्तेःवरी
तेति। इतोवेतिवादीर्घः। इषीष्ट। वरीषीष्ट। अष्टत। अवरिष्ट अवरीष्ट। लिङ्‌सिचोरात्मनेपदेष्विति वेट्। लिङि नलिङीतिदीर्घनिषेधः। आवारिष्टाम्। अवारिषुः
व। सिचिपरस्मैपदेष्विति दीर्घनिषेधः। रिचअनिट्कतां स्पष्टयति। रेकेति। अशिश्रदिति। क्सः यत्तुदेवेनसिचिइटि अशेषीदित्युक्तं तदसानिट्त्वादयुक्तमिति
प्रामाणिकाः। तर्पितेति। सेट्। अनिट् सुश्यनानिर्देशात्। छूदी। ईदित्वान्निष्ठायांनेट्। छृण्णः छृणवान्। ग्रन्थतीतिग्रथ्नातीतिसंदीगतम्। वदसंदेशवचने
। ववदतुरितियजादेरुःऊदतुरितिगतम्। वचतीति। अदादौवक्तीतिगतम्। अवाक्षीदिति। अस्यतिवक्तीत्येङ्‌ नलुकानिर्देशात्। वचिस्वपीतिसंप्रसारणंतु
किन्तुस्यादेव। उच्यात्। मुषतिनिष्ठायाम्। अयमदन्त इतिबोपदेवः तन्माधवादयोनसम्मन्यंते। धृषप्रहसने। शाकटायनस्त्वनिडित्याह। तन्मतेधृष्टः मुख्यम
तेधृषितः। रुषुपशबन्धन इतिनाल्वव्यानंमैत्रेयादयः पठन्ति। इत्याधृषीयाः। अथादन्ता इति। वक्ष्यमाणेषु। धातुष्वन्तोकारोविवक्षितो ननूच्चारणार्थोना।
पीत्सन्त्रकः। अनुनासिकत्वाप्रतिज्ञानादित्यर्थः। यत्तुप्रसादकृतोक्तंधातुसूत्रमेतदिति। तन्न। धातुपाठेअनुपलब्धेः नहृतिकारैरस्पृष्टत्वाच्च। एतेनअ
दन्तत्वविधानार्थमिदमितिप्रत्युक्तम्। यदिक्वचिदुपलभ्येत तथाप्युक्तरीत्या अनुवादस्यैवन्याय्यत्वात्। स्तनगदी। अनेकाच्त्वेनघोपदेशत्वाभावात्षत्वंन ति।
स्तनयिषति। कल्लयति। कलंतइतिशपिगतम्। ननोहितुमर्ण्णो। काल्लयति। साम। सामयति। धात्वन्तरेणगतार्थत्वभ्रमंव्यावर्त्तयितुमुदाहरति। असस्सामदि
ति। पल्पूल। नास्यपल्पूलनेनवासःपल्पूलयेयुरितितैत्तिरीयाणांसंहिता। पल्पूलनंशोधनंद्रव्यमितिभाष्यम्। ऊनपरि चडि नशब्दस्यद्वित्वमिष्ट ॥ सम्प्रसारणम्॥

नामपीत्सन्त्वेतिभाष्यसम्मतंपक्षेनापीत्सन्त्रकइतिअस्यैवव्याख्यानम् पित्त्वार्थे इतिबोध्यम्। स्वोक्तव्याख्यानफलंतु उच्चारणार्थानामित्सन्त्रत्वबोधनमेवधात्वन्त
रेति। षान्त्वसामप्रयोगे इत्यस्य स्थानेषामसांत्वप्रयोगे इति पठतांमतेनेदम्। पल्पूलेति। द्वावपिपवर्गीयौ। शोधनद्रव्यमिति। सावणेतिप्रसिद्धम्॥ ॥

णिचोर्द्वित्वाभावेपिनन्निमित्तकस्याजादेशस्यनिषेधः स्थानिवत्वंवालिंगेनसाध्यतेलिङ्गंचओःपुयण्ज्यि ४

जु

हित्वात्परत्वादिति। अनसङ्गत्वादित्यर्थः। उक्तार्थेज्ञापकमिति। ऊरुरूर्कं अस्त्वप्रभृतिभ्यआचारक्विबन्तेभ्यः सनोनभिधानन्ज्ञापकपरभाष्यप्रामाण्यादितिभावः। उडुडावभ

यिषतीति। इदंत्वास्याद शीक्रत्वादुदाहृतन्नत्वाचारक्विबन्ताणिजादिसंन्वेदृढतरंमानमस्ति। केचित्तुचुलुंपादिवदुडपतिराकाशगमनानुकूलव्यापारार्थकोधातुः पक्षिण

हित्वात्परत्वादच्चोपात्। नचद्विर्वचनेचीतिसूत्रेणद्वित्वेकर्तव्ये अच्चोपस्यस्थानिवद्भावोनिषेधोवेहलभ्यते। णिचोर्द्वित्वनिमित्तत्वाभावादतआह। ओः

पुयणित्यादि। णिचोर्द्वित्वनिमित्तत्वाभावेपितन्निमित्तकस्याजादेशस्यनिषेधः। स्थानिवत्वंवालिङ्गं नसाध्यते। लिङ्गंत्वओःपुयण्ज्यिपरेइतिसूत्रमितियथाश्रुत

ग्राहिणः तेषामयमाशयः। नेनहिसूत्रेणविभावयिषति। लिलावयिषतिजिजावयिषतीत्यादावभ्यासोवर्णस्यत्वंविधीयतेनतुचणिच्येव। पवर्गयण

जानामवर्णपराणांतत्रैवसंभवादिति। नचैतद्युक्तम्। पिपविषतेपि यविषतीत्यत्रसूत्रस्यचरितार्थत्वात्। तथाहिपूङ्सेयोनेश्वसनिस्मिपूङ्रंज्वशामितिसनी

वन्नेतिचसूत्राभ्यामिटि कृतेद्विर्वचनेचीतिसूत्रप्रवृत्त्यासोढाभ्यासेउकारः तस्मात्सं पूर्णसूत्रस्यज्ञापकतोक्तिरसङ्गता। अतआह। वर्गप्रत्याहारेत्यादि। अबीभ

वत्। अमीमवत्। ———— । अरीरवत्। अलीलवत्। अजीजवत्। विभावयिषतीत्यादिसिद्धिर्हिवर्गादिग्रहणस्यफलंवाच्यम्। तच्चाभ्यासेउवर्णस्यदुर्ल

भत्वात्। अकारस्यसन्यतइतिइत्त्वे तद्रूपसिद्धेश्चदुरुपपादम्। अतोवर्गादिग्रहणंव्यर्थंसदुक्तार्थेज्ञापकमित्यर्थः। ज्ञापनफलंतुपत्रओःपुयणित्यस्याप्रा

प्तिस्तत्रबोध्यम्। तद्यथा। चुक्षावयिषति। उडुरिवाचरतिउडवति। ततोणौसनि। उडुडावयिषति। चडि। औडडवत्। तुनावयिषति। अतूतवत्। ऊर्णुनावयिष

ति। और्णूनवत्। पुस्फारयिषति। अपुस्फुरदित्यादि। तदेतत्सकलमभिप्रेत्यभगवताकात्यायनेनोक्तम्। ओःपुयण्ज्यिपरेप्रतिषेधवचनंज्ञापकंणौस्थानिवद्भावस्येति। य

तस्त्वन्नित्तत्सत्पुल्यजातीयस्यज्ञापकमितिपवर्गादेरन्यस्मिन्नपिहल्यवर्णपरत्वस्थानिवत्वमित्यचिकीर्तदित्यादौनातिव्याप्तिरितिसिद्धान्तितम्। अत्रावर्णप

रत्वंङ्गिणित्वप्रवृत्तिवेलायांविवक्षितम्। किंवापरिनिष्ठितेरूपे। नाद्यः चुक्षावयिषतीत्यादौतदभावात्। नद्वितीयः। औननदित्यादौतदभावादित्याशङ्क्याह।

प्रक्रियायामित्यादि। क्वचिदवर्णपरत्वंविवक्षितम्। तत्त्वमुकत्रेवेत्याग्रहेवीजमस्तीतिभावः ॥ १९ उडावयतीत्येवंलोकव्यवहारादितिवदन्ति। सिद्धान्ति

तमिति। तथाचभाष्येउक्तं ओःपुयण्ज्यिपरेप्रतिषेधवचनंज्ञापकंणौस्थानिवद्भावस्ययद्येनतत् ज्ञाप्यते। चिकीर्तदत्रापिप्राप्नोतितुल्यजातीयस्यज्ञापकम्। कश्चतुल्यजा

तीयोयथाजातीयकाःपुयणजयःकथञ्जातीयकाश्चैतेऽवर्णपराइति ॥ ॥ ॥

व्यर्थएवस्यादिति। उवर्णादेशत्वाभावेनतत्रतदप्राप्तेरितिभावः। ननुपरिहारत्वादेवोवर्णादेशइत्यर्थलाभस्तथाहिज्ञापकस्यसजातीयापेक्षत्वेनपुयण्जीनांपरि।
निश्चितस्येस्यैवोवर्णादेशावर्णपरत्वस्यसंभवेनतज्ञाप्यतत्स्तदर्थलाभइत्यरुचेराह। किंचलोपइति। भाष्यस्यावर्णेत्यस्यतथालाक्षणिकतयाव्याख्यानेनमानमित्यपिबोध्यम्
नन्वभ्यासात्पूर्वसन्नियोगशिष्टत्वायेनलोपःप्रवृत्तेः। सासङ्गतैवेत्यरुचेराह। अपिचेति। ननुपूर्ववृत्तिग्रन्थवदयंवृत्तिग्रन्थोऽप्यऽसङ्गतोऽस्त्वित्यतआह। किंचशुष्किकेतिइद ञ्च

यत्तुप्राचांकेचिदेवमाहुरित्यादिनाउवर्णादेशएवस्थानिवत्स्यान्नान्यत्रेतिमतमुपन्यस्तम् तत्रकेचिदित्युक्त्यैवदुर्बलत्वंतस्यसूचितंअवगम्यते। तद्वीजन्तुभाष्यादिवि
रोधएव। तथाहि। अस्मिन्पक्षेअचिकीर्त्तदित्यादौस्थानिवत्वप्रसङ्गएवनास्ति। उवर्णादेशत्वाभावात्। तथाचोत्तरभागेअवर्णाभावादितिभाष्यकारोक्तःपरिहारो
व्यर्थएवस्यात्। किंचालोपःपिबतेरितिसूत्रेअपीप्यदित्यत्रपिबतेर्णौयुकिचङि उपधालोपेचतस्यस्थानिवत्वात्। पापुशब्दस्यद्विरुक्तिरितिवृत्तिग्रन्थोविरु
द्धेत। अपिचपूर्वत्रासिद्धमितिसूत्रेकाशिकायांवहेःक्तान्ताण्णिचिचङिऔजढदित्युदाहृत्यक्तिन्नत्स्यतुऔजिढदित्युक्तम्। तत्रैवन्यासकृतापिऔहतस्यटि
लोपस्यस्थानिवद्भावइतिव्याख्यातन्तदुभयंविरुद्धेत। किंचशुष्किकाशुष्कजङ्घाचक्षामिमानौजढत्वेतिवैयाघ्रपद्यवार्त्तिकमपिविरुद्धेतेतिदिक्। यत्तु
प्राचोग्रन्थव्याचक्षाणैरुक्तंकाशिकाकारमतमुदाहृत्यत्रिमुनिमतमुत्तरपक्षयन्नाहकेचिदेवमाहुरिति। एवंवक्ष्यमाणंकेचिद्भाष्यतत्त्वविदइत्यादितत्सर्वंबो
पदेवग्रन्थश्रद्धाजाड्यप्रवृत्तप्रसादग्रन्थमूलकमितिमूलाभ्रूङ्केवोपेक्षणीयम्। तथाहि। वोपदेवेनकाव्यकामधेनौअङ्धातोर्णिच्यलोपेचङिस्थानिवत्वात्कश
व्दस्यद्वित्वेआञ्चकदितिरूपमेकीयमतत्वेनोपन्यस्यमुनित्रयविरुद्धमितिदूषितम्। द्विर्वचनेऽचीतिहिपाणिनेःसूत्रम्। तत्रद्विर्वचनपदात्कात्यायनेनव्याख्या।
तम्। तथातुष्टावयिषतीत्यादावव्याप्तिस्तेनैवओःपुयण्जीज्ञापकत्वेनपरिहृता। पतञ्जलिनाचावर्णपरएवहल्स्थानिवत्त्वमित्याश्रित्यातिव्याप्तिरुद्धृता। एव
ञ्चवदताउवर्णादेशस्यैवस्थानिवद्भावोभिप्रेतः। किंचकात्यायनेनोक्तपूर्वविप्रतिषेधखण्डनपरभाष्यस्वरसेनाप्ययमर्थोलभ्यते। षाष्ठद्वित्वप्रकरणान्तेहिपूर्ववि

पूर्वस्त्राऽसिद्धमित्यस्यप्रयोजनकथनपरम्। तत्राद्येनिष्ठाकत्वस्याऽसिद्धत्वादुदीचामातइतिविकल्पाभावः। द्वितीयेनकोपधायाइतिपुंवत्त्वनिषेधाभावः। इदम्शिवनंयकोपधप्र
तिषेधेतद्धितवुग्ग्रहणात्। तृतीयेनिष्ठानत्वस्यासिद्धत्वान्मतोर्मस्यवत्वाभावः। क्षामशब्दादिनन्नान्मतुपअन्त्येकुहोश्चुरित्यस्यप्रवृत्तिः। इतिवदतोवर्णेति। अस्याशयउक्तः।

प्रति[illegible]कृति ॥
किंचि[illegible]॥८

वार्त्तिकाशयइति। थियविषतइत्याद्यर्थंवचनावश्यकतोभयोरपिसमा। वार्त्तिकस्यद्विर्वचनेचीत्यस्यानुमानिकस्यच खण्डनतात्पर्यकत्वविरुद्धं।
स्यात् तत्रान्तोलोपस्याऽगणनादितिभावः। ओदौतादेशस्येत्यत्रसमानाधिकरणबहुव्रीहेरङ्गीकारेचुक्षावयिषतीत्यादौदोषः स्यादतआह। ओदौतोरि

तस्यतुः२

द्विर्वचनंयणयवायावादेशाल्लोपोपधालोपणिलोपकिकिणोरुत्वेभ्यइति। तथाचदध्यत्रेत्यादौसावकाशोयण् चयनश्चायकौ। लवनम्। लाव
कइत्यादौसवायवायावः। गोदः कम्बलः इत्यादावाल्लोपः। श्लेष्मघ्नइत्यादावुपधालोपः। कारणाहारणेत्यादौणिलोपः। निपूर्त्तइत्यादावुत्वञ्चेत्से।
तानिनव। विभिदतुरित्यादौसावकाशेनद्वित्वेनपूर्वविप्रतिषेधाद्बाध्यन्ते। तेनचक्रतुश्चिचायलुलाव। चिचयिथ। लुलविथ। पपतुः। जग्मतुः।
जघ्नतुः। आटिटत्। ननुरिजगुरित्यादिसिद्धम्। एवञ्चद्विर्वचनेचीतिसूत्रंनारम्भणीयमितिवार्त्तिकाशयः। भाष्यकारस्त्वाह। उत्करीत्याचक्रतु।
रित्यादिसिद्ध्यतु चुक्षावयिषतीत्यादौत्वन्तरङ्गत्वाद्धृत्वादौकृतेऽभ्यासेइत्वंश्रूयेत। नह्यन्तरङ्गेणसहविप्रतिषेधः। अतुल्यबलत्वात्। तथाचत्व
येत्थंवचनंकर्त्तव्यंओदौतादेशस्यचुडुतुशरादेरभ्यासस्यातउद्भवतीति। ओदौतोरादेशोयस्मिंस्तद्डेः तस्ययोभ्यासः चुडुतुशरादिस्तदकार।
स्योत्स्यादित्यर्थः। चुक्षावयिषति। उडुडावयिषति। तुतावयिषति। ऊर्णुनावयिषति। शुश्रावयिषति। पुस्कारयिषतीत्यादि। एवञ्चसूत्रमतमेवप्र
बलमिति। एवंवदतोभाष्यकारस्यओजढदाञ्चकदित्यादावभ्यासेऽकारोयदिसम्मतः स्यात्तर्हितदर्थंयत्नान्तरंनास्थेयमितिवार्त्तिककारंप्रतिगौरवा।
तरङ्गयन्नापादयेत्। तस्मादल्लोपस्यस्थानिवत्त्वंभाष्यकाराणामनभिमतमितिनिर्णीयते। वामनादयस्तुमहाभाष्यविसंवादादुपेक्ष्याइति। एतच्चसर्वं।
वोपदेवग्रन्थपर्यालोचनयापर्यवस्यतीति। सत्यमेवकिन्तुवोपदेवस्यैवेहमहान्प्रमादः नतुवामनादीनाम्। तथाहि। यत्नावदुक्तंअवर्णपरएवहलिस्थानि
वत्त्ववदतोऽवर्णादेशस्यैवतदभिप्रेतमिति। तन्न। आञ्चकदित्यादावपिद्विरुक्तोप्रक्रियादशायामभ्यासोत्तरखण्डेऽवर्णस्यसुलभत्वात्। ननुनासौप्रयोगेसमवै
तीतिचेत् किन्ततः। नहिप्रयोगसमवायित्वम्॥ २२ ति। इदंद्विर्वचनमुत्परस्यातइत्युत्तरंपाठ्यं नेनोदितिनापूर्वमितिबोध्यम्। फलान्तरम्। वचा
नान्तरकरणस्यसम्। भाष्यकाराणामिति। ज्ञापकस्यसजातीयापेक्षत्वात्सूत्रकारस्याप्यसंमतमितिबोध्यम्॥ ॥

उ·
म·ग्रा·
५२

विशेषणंभाष्ये दत्तमिति। अपूर्वतद्दानेतु गौरवमिति। भावः। ओः पुयण्जिष्विन्यत्र ओरित्युक्तिस्तु सूत्रैकदेशग्रहणान्नाधिकेतिन तद्बलेन कुकल्पनाभिनिवेशः।
कार्यइतिबोध्यम्। विशेषणादानेचपरिनिष्ठितरूपार्थशास्त्रारम्भेणतत्त्वावर्णपरत्वमिवप्रक्रियादशायांशास्त्रप्रवृत्त्यातत्रत्यस्यापि ग्रहीतुमौचित्येनवार्त्तिकेपुस्फारयिषतीति
सिद्धयेचुद्दुतुशरादित्वस्यैवावर्णपरत्वस्याप्यःनियतस्यैव ग्रहीतुमौचित्येनचविनिगमनाविरहेणसर्वत्रप्रवृत्तिरित्याह। एवञ्चेति। बहवइति। नित्यत्वादित्यस्यसिद्धयेइयङ्याठः
कर्त्तव्यांजगत्वा विन्यादिसिद्धयेत्त्वद्विपाठःकर्त्तव्यइत्येवंरूपाइत्यर्थः। अन्यानप्याह। नद्ययेति। आद्ग्रोपादीनामिति। यणोपिनित्यतावोध्या। आरम्भणीयत्वादिति। इष्टानिष्ट

त्स२
विशेषणंभाष्येदत्तम्। एवञ्चतुनावयिषतीत्यादौद्वित्वप्रवृत्तिवेलायामवर्णाभावेपिपश्चाद्भाविनन्तमाश्रित्य यथास्यानिवत्त्वादिकंप्रवर्त्ततेतथेहपश्चात्तद्वि
२३
रहेपिप्रक्रियादशायान्तत्त्वादितिनकोपिदोषः। एतच्चमुख्यातुवृत्तौकौनैयतेर्धातुवृत्तौचमाधवग्रन्थेस्पष्टम्। यदप्युक्तंवार्त्तिकदूषणपरभाष्यस्वरसोत्रमान
मिति। तदपिन। भाष्येहिदूषणदिङ्मात्रमुक्तम्। नतुदूषणान्तरंनास्तीति। तथाहि। बहवस्तत्रदोषाः। नद्ययाविप्रतिषेधएवनावयुक्तः। आद्ग्रोपादीनांनित्यत्वा
त्। द्वित्वस्यानित्यत्वेनातुल्यबलत्वात्किंचपूर्वविप्रतिषेधेसर्वत्रवचनस्यारम्भणीयत्वादिहतुसुतरान्तथेतिकलाघवम्। अपिचक्रियमाणंवचनंनित्यानि
वान्तरङ्गान्यपिबाधेत। ततश्चनिनवनायिषति। देदवनीयिषतीत्यादावप्यभ्यासेउकारः। श्रूयेत। यदितुओदौदादेशस्येत्यादिवचनडुत्वात्तदेवान्तरङ्गाणा।
मबाधेज्ञापकंब्रूषेतर्हितदेववचनंनिनवनीयिषतीत्यादावपिप्रवर्त्ततेतितद्दोषतादवस्थ्यम्॥ तद्धारणाययत्नान्तरमास्थेयम्। एवंस्थितेओजढदि
त्यादावभ्यासेअकारादेशोविधेयःस्यादित्यपिवार्त्तिकमतेदूषणान्तरमस्तु। तस्मादित्थंवार्त्तिकंस्वयमूहनीयम्॥ ९९ विवेकस्यलक्षणैकचक्षुष्कैर्वचनमन्तरे

हित्वापेक्षा१
ण ज्ञातुमशक्यत्वादितिभावः। सुतरामिति। नित्यबाधापेत्यर्थः। एकारःप्रथमस्येत्यादिसापेक्षायायणादीनामन्तरङ्गत्वात्तद्बाधायेत्यपिबोध्यम्। यत्नान्तरमिति। अभ्या
सविशेषणंसनीतिपूरणीयम्। तेननिर्दिष्टपरिभाषयाऽनेकव्यवधानेनदोषइतिभावः। किंचजोःसौत्रात्णिचिसनिलुडिचजिजावयिषतिअजीजवदित्यत्रौदौदादेशस्ये
त्यनेनाभ्यासेउत्वापत्तिस्तदर्थमोःपुयणिन्यत्रजग्रहणंकार्यम्। नचतत्रवचनेचकारएवपठनीयोनतुशब्दइतिवाच्यम्। युङ्घुङ्भ्यांणिचिचङिसन्वत्त्वाऽजुगवदित्या
दौदोषापत्तेः। किन्त्वाऽभ्यासविशेषणंसनीतिकृतेपितुनावयिषतीत्यादौचारितार्थ्येनतुशावयिषतीत्यादावनापत्तिः। षकारेणाधिकेनव्यवधानादितिबोध्यम्। एवंस्थिते

इति। दोषपरभाष्यस्य उपलक्षणत्वावश्यकत्वे इत्यर्थः॥

राम·
५२

कि॰१

णिचइति। उपलक्षणं ॐङोपि तेनासस्वदिति सिध्यति। श्रोत्रियाःयथाश्रुतग्राहिणः। अजन्तस्येति। जकारान्तस्यासङकयणपवर्गपरभिन्नस्येत्यर्थः। तत्र सन्यतइत्यनेनैवसि

श्रौदीदादेशस्य चुटुतु शसादेरभ्यास स्योत्सनि। ततः अह्वोपवतोणिचोत्। अह्वोपवतोङ्गस्याभ्यासस्यणिचोऽत्स्यात्। श्रोजढत्। आञ्चकत्। एवं स्थि
तेवामनन्यासकरादिग्रन्थाः वैयाघ्रपद्यवार्तिकंभाष्याविरोधेनैव समर्थितं भवति। सरस्वतीकण्ठाभरणग्रन्थोप्यत्रैवानुकूलः। यदपि वोपदेवेनो
क्तं वैयाघ्रपद्यवार्तिके श्रौजिढदित्येव पाठः सांप्रदायिकः। श्रोत्रियास्तु प्रमादाज्जिस्थाने जं पठन्तीति तदप्येतेन प्रयुक्तम्। उक्तरीत्या सर्वसौष्ठवे श्रो
त्रियाणांप्रमादइत्यस्यैवप्रामादिकत्वात्। यदपि वोपदेवेन स्वोक्तेर्थे उपष्टम्भकतयोपन्यस्तम्। दुर्गगुप्तेन दुर्गटीकायात्रिलोचनदासेन कातन्त्रपञ्जिका
यांवर्द्धमानमिश्रेण कातन्त्रविस्तरे हेमसूरिणा हैमव्याकरणे। सनतद्धलापकमजान्तस्य पवर्गपरस्यावर्ण एव वेदितव्य मिति प्रदर्शितमिति। अभिनव
शाकटायनेन शब्दानुशासनेणिचनिमित्तादपिप्राग्धिः तद्धावर्णपरइतिप्रदर्शितमिति। तदेतत्सर्वन्नवामनादीनांप्रतिकूलम्। प्रक्रियादशायामवर्णपर
त्वस्यैवोक्तत्वात्। तस्मादञ्चकदित्येव न्याय्यमिति स्थितम्। यत्तुभट्टोजोजिदीक्षितैर्माधवीयधातुवृत्तौ नोनयतिध्वनयतीतिसूत्रे काशिकापदमञ्जर्योश्च।
श्रोनिनदित्यभ्यासइकारसहितं इति व्यक्तमिति। तत्सर्वं प्रमादप्रयुक्तमेव। स्वलितान्तरस्य प्रागुक्तमाधववामनग्रन्थविरुद्धत्वात्। नदेतत्सकलमभिप्रेत्या
ह। प्रकृते निति। श्रीननदिति। नोनयतिध्वनयत्येलयत्यर्दयतिभ्य इति चङि निषेधस्तु नेह कृतः। तत्र गुपेश्छन्दसीति पूर्वसूत्राच्छन्दसीत्यनुवृत्तेः। तस्योदाह
रणान्तु मात्वायतो जरितुः काममूनयीः मात्वाग्निर्ध्वनयीद्धूमगन्धिरित्यादि। अत्रसिचिवृद्धिर्न ह्म्यन्तेति सूत्रेणय्यन्तेन निषेधात्। यत्तु भाष्यादावयमपि लोक इ
त्युपनिबद्धम्। यच्चव्याचख्युः छन्दसीति नानुवर्तते विभाषाधेट्श्व्योरिति विभाषाग्रहणाच्चानुवर्तनइति तन्न। सूत्रेन वेयर्थ्यापत्तेः वृत्त्यादिसर्वग्रन्थविरोधा
च्च। अतएव छन्दसीति नानुवर्तत इति केषाञ्चिदुक्तेः साप्रयुक्तानि याचभट्टिः। येनादिदहैत्यपुरम्पिनाकीनिप्रायुङ्क्त। अतिस्तेनदिति। अनेकाच् त्वेनायोपदे
शत्वात्षत्वन्न। मृग। मार्गयतिमार्गं नीतिमार्गैराधृषीयस्य॥

ऊनयत्यादीनां परस्परसाहचर्याच्चुरादीनामेव ग्रहणम्। श्रादिदहदिति प्रयोगस्तुभ्वादेर्हन्तुमण्णाविति परास्तम्॥ ॥ १९ इरितिभावग्रहयम्। चङ् तन्निषेधरूपम्। अतएवेति। वृत्त्यादिविरोधादेवेत्यर्थः। एतेन नोनयतीतिसू

तदेतत्सर्वमिति भावः अत्र प्रक्रत्यैकाजिति सूत्रेन तदभावेप्रसृद्धृत्यत्र टिलोपनाशकप्रत्याख्यानासिद्धत्वेन समाधानं भाष्ये कृतं नत्वकारोच्चारणसामर्थ्येन टिलोपेपि भयमित्याद्याप्याप्रमेकारोच्चारणं चरितार्थमिति तद्भावः तत्प्रत्याख्याने तु टिलोपं बाधित्वात्रादशसहृदगतावितिन्त्वा
येन पुनः टिलोपप्रवृत्तिरितिवोध्यं परतुअसद्दत्याशिवकारोच्चारणसामर्थ्येन टिलोपसमाधानं तनुशिविश्यादीनामनभिधानमाश्रित्येति नन्नहि रोधः अनएवेशवप्रयोजनकथनावसरे भाष्ये पांचमिकः कनेवगच्छतोनन्तुस्मादयइति बोध्यं॥ २

स्य

अकारफलस्येति। गर्ववान्बभूवेत्यर्थे गर्वाञ्चकारेत्याम्रूपस्येत्यर्थः। अकार इति पक्षपरिग्रह इत्यस्य स्थाने पक्षापरिग्रह इति पठतां मत इदम्। इ-
कारश्चिन्त्यादेः इकारो हजीदित्यं उकारो वञ्चु इत्यस्य। तस्यैव पाठान्तरे ऊकार इति बोध्यम्। ननु वा कथं शेषं समर्थयिष्यामहे संभ्रम प्रार्थने श्चिन्त्यादि प्रयो-
गा ह्यल्लोपाभावस्यैव कल्पनानुचितेत्यत आह। वस्तुतः सोपि नेति। अल्लोपविकल्पोपि नेत्यर्थः। लोपबाधस्येति पाक्षिकस्येत्यर्थः। अन्यथा दादिष्वपि ने-

अदन्तत्वसामर्थ्यादिति। अयंभावः कथयति गणयतीत्यादावुपधावृद्धिनिवारणेन चकथदित्यादावग्लोपित्वाद्दीर्घसन्वद्भावविरहेण सारभा-
सप्रभृतीनामुपधाह्रस्वव्यावर्तनेन ग्रहस्पृगप्रभृतीनामुपधागुणव्यावर्तनेन चादन्तत्वं सार्थकम्। गर्वादीनान्तु अदन्तत्वे प्रागुक्तफलासंभवात्॥
णिज्विकल्पोनुमीयते। युक्तं चैतत्। चिन्तयते अदित्वं सामान्यापेक्षं ज्ञापकमिति मते इहापि अकारफलस्य स्पष्टत्वात्। विशेषापेक्षं ज्ञापकमिति
मतेपि तत्र तत्र आकार इकार ईकारः ऋकार ऊकारश्चेत्यनुबन्धाः यथा ज्ञापकतया स्वीकृताः। यथा च अविशब्दन इति निषेधः तथा अदन्ततापि अस्तु स्वं सति-
मतद्वयेप्येकरूपफललाभात्। यत्तु बोपदेवेनोक्तं अस्तोपित्वं ——— स्यानिवत्वं चादन्तत्वप्रयोजनम्। यत्र त्वेतन्न विद्यते तत्र ह्यल्लोपविकल्पनमि-
ति। अत्रेदं वक्तव्यम्। विकल्पस्तावदनेकदोषदुष्टो निर्मूलश्च। लोपाभावस्यैव सुवचत्वात्। वस्तुतस्तु सोपि न। अन्यच्च कृप्ते णिज्विकल्पे नैव तत्कृतार्थत्वे पू-
र्वस्य लोपबाधस्य कल्पनाया अन्याय्यत्वात्। यत्तु अदन्तत्वे सार्थकत्वाय वाल्लोप इति प्राचां ग्रन्थं व्याचक्षाणेनोक्तं वाचनिकस्य वात्र विकल्प इति तदाह
तम्। निर्मूलत्वात्। यदि वाचनिकः तर्हि अदन्तत्वसार्थक्याय इति कथमन्वियात्। किं च कस्येदं वचनं स्य इलेन वाचनिकतोच्यत इति न किञ्चिदेतत्। एव
ञ्च गर्वापयतइत्याद्युदाहरणमप्यसाध्वेव। अङ्कापयतीत्यादिस्तुतराम्। अङ्कयतेरकारस्य प्रागुक्तरीत्या अग्लोपित्वाभावात्सावर्ण्यश्रवणेन कृतार्थत्वात्॥
एवमर्थापयतेइत्यपि। यत्तु आतिथ्ययतेति प्राचोदाहृतं तत्तुतरामशुद्धम्। आर्तथ्यपतेन्यत्राभ्यासेकारश्रवणात्। चङ्परेण। विरुप्त्यां इं लघुं प्रति वा राम.
स्तुतराम् ·विशेषणतेति पक्षद्वयेपि दीर्घो लघोरिति दीर्घस्य दुर्वारत्वाच्च॥ ५३
पामित्सञ्ज्ञाबाधस्य वस्त्वादिति भावः। मशुद्धमिति। पुकोभ्यासे ह्रस्वस्य चासङ्गतेरिति भावः।
तदुपपादयति। आर्तथ्यतेत्यत्रेति। आकारश्रवणादिति। तस्माद्धेतोरल्लोपबाधे मानाभावेन पुको दुर्लभत्वमिति भावः। आर्तथयतेति क्वचित्को पाठः। अभ्यासे ह्रस्वासङ्ग-

एवञ्चइट्परत्वात्परमपि लघूपधगुणं बाधित्वा बृद्धिः। णिलोपस्य यस्मादिति नियमेन दीर्घेणाप्रवृत्तेः। चङि ऊदुपधाया गोह इत्यस्मात्। तथापि यदत्र लघुपरत्वासंभवइतिभावः।भाष्यस
आवश्यकत्वादितितेनोनधानोऽल्लोपस्यैवाङ्गीकारादितिभावः।वृद्धाविति।परत्वादितिभावः।व्यवधानमिति।एवञ्चइट्परत्वासंभवइतिभावः।भाष्यस्य
स्यतेपक्षदोषास्त्यैवेतिशङ्कते।चङ्परेइति।गृहाणेति।द्विःप्रयोगपक्षेऽनादिष्टादचःपूर्वत्वमस्त्येवेतियदितदाभ्यासस्यकार्येकर्तव्येधात्ववयवादेशस्यनत्प्रतिबन्धकस्या
यदपिव्याचख्युः।हलादेरित्युक्तेर्नदीर्घइतितदपिन।हलादेरित्यस्यनिर्मूलत्वपाठकत्वात्।नन्वेवंगयत्रद्विरुच्यतेइतिमाधवोक्तरीत्यानेहदीर्घइतिचेन्न।न
नमतेअल्लोपस्यावश्यकत्वादितिदिक्।परत्वाद्वृद्धाविति।लोपःशब्दान्तरप्राप्ताऽनित्यः।वृद्धिरनित्येतितुस्पष्टमेव।उभयोरनित्ययोर्हृद्धौकृतायांसोक
रस्यावादेशात्पूर्वमेवपरत्वाद्वार्णादाङ्गंस्यबलीयस्त्वाच्चऔलोपइत्यर्थः।एवञ्चानुग्लोपित्वाद्दीर्घसन्वद्भावौस्तः।नचटिलोपस्यस्थानिवद्भावेनव्यवधानं
शङ्क्यम्।तथाप्यङ्गस्यणिचपरत्वानपायात्।चङ्परेणौयत्रध्वितिपक्षेकथमितिचेन्।अभ्यासस्यादिष्टादचःपूर्वत्वेनस्थानिवत्त्वमेवनास्तीतिगृहाण।अन
एवमुण्डमिश्रेतिसूत्रेहलिकल्योरदन्तनिपातनंभाष्यवार्त्तिकयोराश्रितमितिभावः।वृद्धेलोपइति।शब्दान्तरप्राप्तोऽसत्यामपिकृताकृतप्रसङ्गित्वमात्रेणेह
नित्यत्वंस्वीक्रियते।सुवोवुकोनित्यत्वादित्यत्रयथेतिभावः।इहभाष्यद्वयस्यपरस्परविरोधेपरत्वाद्वृद्धिरितिमुख्यःपक्षः।वृद्धेर्लोपोबलीयानितितुप्रौढिवादः।
मात्रमितिहरदत्तः।तद्विपरीतङ्केयटः।भाष्यद्वयप्रमाण्यद्वृद्धेःपूर्वपक्षाद्वाकामचारेणटिलोपेनरूपद्वयमपिसाध्वितिमतान्तरम्।मतत्रयसपीदंसुध्यातुपृ
तीमाधवेनोपनिबद्धं।अयञ्चमतभेदोणिजभिन्नविषयःणौणिचितुण्यल्लोपाविति पूर्वविप्रतिषेधाच्चिक्ष्कर्षरीत्याअपवादत्वाद्वाप्रागेवणिलोपः।उपधा।
ह्रस्वत्वेसन्वद्भावदीर्घयोश्चणौणिचीत्युपसंख्यानात्ण्याकृतिनिर्देशाद्वाअवीवददित्येवरूपमित्यवधेयम्।लङर्थस्त्विति।तेनण्यन्ताद्भावकर्मणोर्भूत
भविष्यतोर्द्वित्वबहुत्वयोश्चप्रत्ययाःसिद्ध्यन्तीतिभावः।कंसवधमाचष्टेइति।कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणात्कंसवधशब्दःकृदन्तः।ततोणिच्॥
अप्रत्ययस्यलुक्तस्यैवयाप्रकृतिःहनइतितस्याविकारपरित्यागेनस्वेनरूपेणावस्थानन्तदेतदाह।अहनइति॥ ९९ निवर्त्तनेत्यर्थस्याभ्यासस्यासवर्णइतिसूत्र
स्यासवर्णग्रहणेनज्ञापनात्तद्दोषइत्यवधेयम्।अश्विनमिति।एतदर्थज्ञापनार्थमेवेतिभावः।नचययेष्टंनामधातुष्वितिद्वितीयस्यद्वित्वेऽकललदित्यभासेऽकारश्रवणार्थ
नञ्चरितार्थम्।एकाच्त्वयमन्विधानस्वयथेष्टमित्यस्यप्रवृत्तेरित्यन्यत्रनिरूपितम्।रूपद्वयमयीति।लक्ष्यभेदेण्याकृतीति।नेप्राग्धातोरित्यत्रगन्याकृतिनिर्देशवदिति
नेतिभावः१

धा॰वृ॰ ॥

ननुलुप्यमानस्यकृतइति। तथासति। तत्रकृत्यर्थेयादृशंकारकत्वंतादृशंणिच्प्रकृत्यर्थेपीत्यर्थः। स्यात्सचदृष्टः कंसञ्ज्ञानयतीत्यत्रषष्ठ्यापत्तेस्तदाह। तथास।
तीति। अनिर्देशद्वयेनापीति। प्रकृतिवत्कारकमित्येतावतापिधातावनन्तर्भूतत्वबोधनद्वारातद्धितणिजन्तस्यधातुत्वेनतयोः सिद्धिः कार्यातिदेशेनतयो
सिद्धिस्तुस्पष्टैवेतिभावः। असङ्कीर्णेति द्वितीयादिकङ्कारकातिदेशस्यफलं णिचोधातुप्रत्ययत्वाभावात्कुत्वनत्वादिकार्यातिदेशस्यफलमितिभावः। द्वि

स्थितइति। हेतुमण्णिचः प्रकृतेरिति। ननुलुप्यमानस्यकृतः तथासति हेतुमत्सौ यादृशत्वन्तस्यातिदेशो नलभ्येत दृश्यते चसः तथैवभाष्यकारे
णोदाहृतत्वादितिभावः। इहद्वयमतिदिश्यं कारकङ्कार्यञ्च। तत्राद्यद्विर्वचने निर्देशद्वयेनापिसिध्यतः। असङ्कीर्णोदाहरणन्तु द्वितीयादिकम्।
कुत्वनत्वादिकञ्चेतिविवेकः। इहकंसवधसुभद्राहरणादिनिरूढोपाख्यानस्यवर्णितिजिनाग्रहः। किंतुप्रतिपादनमात्रेणेन राजागमनमाचष्टेराजा
नमागमयति। यद्यपीहकृत्प्रकृतौराजाकर्मास्तितथापि गमेर्हेतुमत्सौगतिबुद्धीतिकर्मीभूतः नइत्येहापि। राजानमित्यस्यप्रकृतिभागोयद्यप्यन्तर्वर्ति।
त्यावस्थाप्रत्ययलक्षणेनपदत्वन्तथापिनकारश्रवणंभवत्येव। रूपातिदेशवत्त्वात्। देवदत्तपाकमाचष्टेदेवदत्तेनपाचयतीत्यत्रतृतीयैवभवति।
गतिबुद्धीतिनियमेनकर्मत्वापहारेकर्तृत्वस्यैवस्थितेरितिदिक्। कर्तृग्रहणस्यफलमाह। नन्विति। कर्त्रीति। कर्तृग्रहणाभावेचक्षुषापश्य
तिचक्षुषतीत्यादावेवस्यात्। ननुकरिभिरवबध्नाति अवकरयतीत्यादौलोके इन्द्रियाणामेवकरणत्वेनसुप्रसिद्धत्वादितिभावः। सङ्ग्राम। सङ्ग्रा
मेतिप्रातिपदिकात्। युद्धार्थकदुःअर्थेणिचंतमनेअनुदात्तेदिति। भृशादिभ्योभुवीतिसूत्रे कैयटहरदत्ताभ्यान्तथोक्तत्वादितिभावः। एतेनास्यानु
दात्तेत्वमपाणिनीयमिति माधवोक्तिः प्रयुक्ता। नचैवंभाष्योक्तमुपसर्गपृथक्करणज्ञापकंभज्येतेतिवाच्यम्। युद्धेयोग्रामशब्दइत्युक्तैव॥

तीयादिकमित्यादिशब्दार्थौदेवदत्तेनपाचयतीत्यादौतृतीया। कुत्वनत्वादिकमित्यादिनाराजानमीगमयतीत्यादावल्लोपाभावः। प्रातिपदिकमितिप्रातिपदिकाधि
कारादिदंलभ्यम्। कैयटेति। अवश्यंसङ्ग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या। असङ्ग्रामयतशूरइत्येवमर्थन्तुनियमार्थंसङ्ग्रामयतेरेवसोपसर्गान्नान्यस्मात्सोपस

सामर्थ्यादिति। केवलग्रामशब्दस्य लोके युद्धे प्रयोगाभावादिति भावः। सामर्थ्येन समस्तस्य विशिष्टस्यैवोद्देशात् कोटौ प्रवेशात् सनाद्यन्तादन्यत्र न तदादिनिय
मसत्त्वेपि सङ्ग्रामेति विशिष्टस्य धातुत्वसिद्धिः। न चेदं णिजर्थमित्यनुबन्धासत्त्वे नेमानाभावः। न त्वकरोतीत्येव सिद्धेः। न चास्य समानोपसर्गत्वं ग्रामशब्दार्थस्य क्रिया
त्वाभावादिति वाच्यम्। सोपसर्गादित्यस्य सोपसर्गसमानाकारादित्यर्थेनादोषात्। मैत्रेय इति। अत्रारुचिर्बीजन्तु अनयोरखण्डत्वेनैनदघटकसुदुरोरु

सामर्थ्यात्तं पूर्वस्य लाभेन तद्विशिष्टपाठो ज्ञापक इति भाष्याशयात्। नन्वेवमप्यससङ्ग्रामनेति न सिध्येत्। अस्लोपित्वाभावेनो
पधाह्रस्वापत्तेरित्याशङ्क्याह। अकारप्रश्लेषादिति। स्तोमस्याधायाम्। अग्निष्टोमः। अग्नेः स्तुत्स्तोमेति षत्वम्। सुस्तदुःस्तनक्रि।
यायाम्। तच्छब्देन सुस्वदुःस्व प्रातिपदिकार्थो निर्दिश्यते। प्रातिपदिकाद्धात्वर्थ इति सिद्धेः नयोः पाठः सोपसर्गात्मन्यपार्थ इति मैत्रे
यः। रूपरूपक्रियायाम्। निरूपयतीत्यनेकार्थत्वाद्विचारणेयम्। ग्रन्थान्तर इति। धातुपाठस्यान्ते इत्यर्थः॥ इति चुरादयः॥ १ ॥

इ

पसर्गसमानाकारत्वेपि पूर्वपदत्वाभावः। अतएव दुःखशब्दे इदुदुपधस्येति षत्वं न विसर्गान्तस्य पदत्वाभावात्। व्युत्पन्नत्वे सुखातेर्दुईलधातोः खे त्येधात्वन्त।
स्य विसर्गो बाहुलकात् बहुलमन्यत्रापीति णिलुगिति बोध्यम्। यद्यपि दुःपूर्वात्खननेर्डे दुःखमिति नदापीनएवनिपातनाण्णत्वाभाव इति बोध्यम्। एते।
नात्र षत्वमङ्गीकृत्य दुष्खेनेत्यादौ णत्वाभावः षो पदान्तादिति निषेधादिति जिनेन्द्रादयस्तत्परास्तम्॥ इति चुरादयः॥ १ ॥ ॥

॥ अनुग्राहकत्वेनेति। अचेतनोऽप्यनुग्राहकत्वेन प्रयोजकोऽयथा भिक्षा वासयति कारीषोऽग्निरध्यापयतीत्यादौ पर्यायप्रसङ्ग इति। लोडादिघटितप्र
शब्दप्रयोगरूपा प्रवर्त्तनैव प्रवर्त्तनात्वेन लोड्वाच्येति यद्यपि न पर्यायः प्राप्नोति तथापि कैयटानुसारेणेदम्। वस्तुतः समुच्चयप्रसङ्गः स्वात्र पूर्वपक्षे।

हेतुमति च। प्रेषणादाविति। आदिशब्दादध्येषणेनन्त्समर्थाचरणे च। तत्र भृत्यादेर्निकृष्टस्य प्रवर्त्तनं प्रेषणमाज्ञेत्यर्थः।
गुर्वादेरारध्यस्य प्रवर्त्तना अध्येषणं प्रार्थनेत्यर्थः। तन्त्समर्थाचरणमपि बहुधा। अनुमतिरुपदेशोऽनुग्रहमिति। तत्र य
स्यानुमतिं विना क्रिया न निष्पद्यते। सोऽनुमतिमात्रेण प्रयोजकः। यथा राजा वैद्यादिस्तु ज्वरितः कषायम्पिबेदिति उपदेशमा
त्रेण। यस्तु केनचित्त्रिधा सितं पलायमानं निरुणद्धि सोऽपि हन्तुरनुग्राहकत्वेन। अमी च सर्वे विशेषार्थप्रकरणादिगम्याः।
सर्वानुगतप्रवर्त्तनासामान्यं णिचोऽर्थः। नन्वेवं णिचो लोडादीनाञ्च पर्यायत्वप्रसङ्गः तत स्पृच्छतु मां भवानिति वक्त
व्ये णिजपि प्रयुज्येतेति चेन्न कर्त्तुः प्रयोजको हि हेतुः प्रैषविषयस्तु नाद्यापि कर्त्तृत्वेनावधारितः ॥ २ ॥ ॥

तस्य वलोटोक्तत्वात्प्रेषणस्य णिजन्नेति समाधानान्तरपरं भाष्यं सङ्गच्छते। न हि पर्यायस्य तथा युक्त्या वारणमिति तत्त्वम्। एतेनेष्टसाधनत्वं लोडाद्यर्थ इत्य
पास्तम् णिजन्तेन तदभावात्। कर्त्तृत्वेनेति। स्वव्यापाराविष्टत्वेनेत्यर्थः २॥

॥ प्रवृत्त्युपहितेति। प्रयोज्याविशिष्टप्रवृत्त्यनुकूलेत्यर्थः। प्रवृत्त्याविशिष्टप्रयोज्यविषयेतियावत्। केवलान्विति। तदनाविष्टप्रयोज्यविषयेत्यर्थः॥ द्रव्यमात्रस्येति। व्यापारानाविष्टस्येत्यर्थः। सक्रियस्य। व्यापाराविष्टस्य। प्रयोगः। प्रेरणा। वक्त्रैवेति। तादृशशब्दप्रयोगस्यैव प्रेरणात्वादितिभावः॥

तथाचप्रयोज्यप्रवृत्त्युपहिताप्रयुक्तिर्णिजर्थः केवलातुलोडर्थ इतिविवेकः। उक्तञ्च। द्रव्यमात्रस्यतुप्रैषइच्छादेर्लोड्विधीयते। सक्रियस्यप्रयोगस्तुयद्वासविषयोणिचइति। किंचप्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः। अनियतकर्तृकाणिजर्थः। पचेतिहिवक्त्रैवप्रेरकः पाचयतीत्यादौतुकर्तृभिन्नोपी तिदिक्। अजीजवदिति। जुगतौ। सौत्रोधातुर्जुचङ्क्म्येत्यत्रनिर्दिष्टः। स्रवतिशृ। अपरइत्यनुवर्तनेन। तुपुयण्जीतिपवर्गजकारयोरसंभवात्। यणःसंभवेप्यव्यभिचारात्तदाह। अवर्णपरेधात्वक्षरेइति।

अक्षर—शब्दोवर्णपरः ३॥

॥ वर्णपरइति। ननुचतुरश्छुयतावाद्यक्षरलोपश्चेत्यत्रेवाकृत्स्नसमुदायपरोव्याख्यानादितिभावः ॥३॥

म॰शा॰ उ॰ ५६

॥ इतिमनेचेति। इदमेवभाष्यसंमतमित्युक्तम्। इतिव्याख्याभेद इति। माधवादिकृतइतिभावः। विकल्पोनलभ्येतेति। त्वदभिमतइतिशेषः। तत्र।
हिनैरूप्यद्वयमुक्तम्। वस्तुतोऽस्यलुड्विधानमेवअनएवभाष्येकापुडापुक् पक्षयोर्नफलभेद इतिध्येयम्। यस्यचनसुव्यात्तुत्वंणिचः प्रातिप

॥ ६ ॥ असंस्त्वसार्वविंघ्यादित्युपक्रम्यवर्णग्राहुः पूर्वसूत्रइतिभाष्योक्तेः। मतान्तरेइति। अङ्गस्यत्रहित्रिरूप्य
नेइतिमनेचङ्परेणौयत्वघुइतिमनेचेत्यर्थः॥ यत्तुप्राचोक्तम्। सुध्यातोरनेकाचश्चसन्वद्भावोवेतिकेचिदि
ति। तत्रानेकाचइत्यंशेकामयतावुक्तोङ्स्यनिकर्मणिषष्ठी अवयवषष्ठीचेतिव्याख्यानभेदोमूलमिति
बोध्यम्। यत्तुव्याचख्युः॥ णौपदङ्गस्यह्रस्वइतिव्याख्याभेदोत्रमूलमिति। तन्न। एवंहिसति अर्थमाख्यत्।
आर्तीयपदित्यत्रविकल्पोनलभ्येतनचमुख्यसिद्धान्तरीत्यादृष्टापत्तिः॥ ५॥ ६ ॥

एम॰ ५६

दिकादेवविधानात्। अतोनानेकाजुपक्रमविरोधः॥ मुख्यसिद्धान्तेति। चङ्परेणौयत्वधित्यर्थरूपभाष्यसिद्धान्तेत्यर्थः॥ ५ ॥ ७ ७ ७ ७ ॥

॥ अनेकाच इति। अनेकाचो वेति मूलग्रन्थेत्यर्थः॥ दीर्घः ग्रादिनि। पक्षे दीर्घः स्यादिति भावः। समकक्षत्वमिति। व्याख्याविकल्पेन सन्देह
व वैकल्पिकत्वेनेत्यर्थः। दीर्घाभावं निश्चित्येति। अहलादित्वादिति भावः। परमतेति। भाष्यातिरिक्तमतेत्यर्थः। हलादेरपीति। अनेकाचो

अनेकाच इति व्याख्याय ग्रन्थविरोधात्। किंच सन्देहाभावेन सह दीर्घोऽपि तुल्ययोगक्षेमः। व्याख्याविकल्परूपबीजसाम्यादिति हि एव व्याचख्युः। एवं च ऊर्णोतेरपि चङ्परे णौ दीर्घः स्यात्। न चेष्टापत्तिः। दीर्घो लघोरिति सूत्रे प्राचा हलादेरिति व्याख्यातत्वात्। अशुद्धमपि तद्ग्रन्थं समर्थयितुं प्रवृत्तैर्व्याख्यातृभिरपि तत्र न्यायसिद्धमिदमित्युक्तत्वात्। तत्रैव च कास्तूर्णोत्योः। समकक्षत्वमभिप्रेत्य ऊर्णोतेरदीर्घाभावं निश्चित्य चकासेर्दीर्घोदाहरणं तु परमताभिप्रायेण कथंचित्त्वेयमिति स्वयमेवोपसंहृतत्वाच्च। एवं च हलादेरपि दीर्घाभावे सिद्धे हलादेरित्यर्थसिद्धमिति परमोपक्रमविरोधेनावयवावयवः समुदायं प्रत्यवयवो नेत्यादि तदुपन्यस्तन्यायस्य चातिशिथिलत्वेन तद्ग्रन्थस्यासङ्गततान्नैवावोचाम॥ ५॥ ॥

हलादेरित्यर्थः। परमोपक्रमेति। अजादेरेव दीर्घाभावे हि तदर्थसिद्धं स्यात्। नान्यथेति। हलादेरपि दीर्घाभावे न तद्विरोधः स्पष्ट एवेति भावः। अतिशिथि
॥ लत्वेनेति। प्रत्येकातिरिक्तयत्किंचिद्वर्णसमुदायस्यावयवत्वे मानाभावादिति भावः। ५।

॥ असङ्गततामिति। हलादेरित्यस्यार्थसिद्धत्वाभावात्। परस्परविरोध इति। ऊर्णोतेर्दीर्घस्तत्र बलेन वारितोऽत्र च स्वीकृत इत्येवं विरोध इत्यर्थः। प्राप्तवि

इदानीं तु तत्र त्वात्वन्न तदीयग्रन्थयोरेव परस्परविरोध इति ब्रूमः। यदपि वदन्ति। सन्वद्भावन्यसिद्धेर्नि व्युत्पत्त्यासन्वद्भावस्य
निमित्तयोल्लघुः सचेति व्याख्यानात्। लघुत्वस्यैव विकल्पो निर्दिश्यते। तेन लघुत्वपक्षे दीर्घसन्वद्भावोद्य वपि स्तः। तदभावे तु द्वा
वपि नेति। तदपि न। निर्मूलत्वात्। नहि प्रागुक्तव्याख्याभेदेन लघुत्वविकल्पोल भ्यते। वचनं तु न महतां नास्त्येव। अध्याप्य वीची
नस्य कस्यचित्। स्यात्तर्ह्यतिप्रसङ्गः। अजजागरदित्यत्रापि जाशब्दस्य लघुत्वापत्तेः। ननु प्राप्तविभाषेयमिति चेन्न। उ
भयत्र विभाषात्वस्य दुर्वारत्वात्। लाघवपुरस्कारेण भावनातात्पर्यकतया   मेनाप्राप्तविभाषात्वध्रौव्याच्चे
त्यास्तान्तावत्॥ हयोरिति। ह्रस्वदीर्घयोरित्यर्थः। एतच्च प्रकृताभिप्रायम्। अवीवदद्वीणां परिवादकेनेत्यादौ तु स
न्वद्भावस्यापि द्व्यमेव पूर्वपक्षसिद्धान्तो द्रष्टव्यौ॥ प्याक्ततीति। तथा च णावङ्गस्य चुरङ्गस्य तस्य लोप इति भावः॥ ३६॥

भाषेयमिति। लघुत्व विकल्प इत्यस्य प्रासङ्गस्य विकल्प इत्यर्थ इति भावः। भावनातात्पर्यकेनेति। प्राप्तविभाषायामभावे तात्पर्येण तन् ज्ञाने च प्रतियोगिज्ञानस्य

कारणत्वे गौरवमिति भावः॥ ३३॥

॥ तद्भाष्येति। उभयत्रापि णेर्णिच्युपसंख्यानस्य तत्रोक्तत्वादिति भावः। अर्वाचीनमत इति। पूर्वान्वयि। तत्परत्वाभावाच्चेति। अभ्यासस्येति शेषः॥ ७ ॥ ६

। यत्तु भाचारूपान्तरमुदाहृतम्। अचुचोरदिति। तद्भाष्यविरोधादुपेक्ष्यम्। औनिन्ददिति। अत्र प्रसारणं कृतम्। अजादित्वाद्दी
र्घो लघोरिति नार्वाचीनमतेऽस्मन्मतेनुस्यादेवेति। एवञ्च वदता आटिटत्। आशिशनदित्यादौ सर्वत्र सिद्धान्ते दीर्घो भ
वतीत्युक्तम्। सोयं महान्प्रमादः। चङ्परे णौ यदङ्गं उन्द अदृ इत्यादि तस्येह द्वित्वाभावात् नदीर्घभाजोऽभावाच्च।
चङ्परे णौ यल्लघु तत्परत्वाभावाच्च न दिह माधवहरदत्तकैयटादिसकलमतेपि दीर्घस्योक्तिसंभवाभावे।
कथन्दीर्घ इत्यापत्तिः कृतेति न विद्मः। स्यादेतत्। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति निर्विवादम्। अन्यथा।
आटिटदित्यादौ णिलोपो न स्यात्। एवं स्थिते द्वितीयप्रयोगविषयीभूतञ्चङ्परणिच्प्रतिनदादि
ग्रहणादादिट इत्यङ्गम्। एवं च चङ्परे यदङ्गं तदीयो योऽभ्यासस्तस्येति पक्षे कथन्दीर्घ इति चेत्।
अत्र वदन्ति। लघौ परे हि दीर्घः लघुग्रहणं च तल्लोपः प्रथममेव प्रवृत्तः। नित्यत्वादन्तरङ्ग
त्वाच्च वर्णाश्रयत्वाच्च प्रत्ययलक्षणात्तत्रास्ति। स्थानिवद्भावोपि न भवति। अभ्यासस्यादिष्टाद
चः पूर्वत्वात्। दीर्घविधौ तन्निषेधाच्चेति॥ ७ ॥ ॥

म॰शा॰ उ॰ ५८

ततो णिलोप इति। एवञ्चाभ्यासस्यानादिष्टादचः पूर्वत्वमस्त्येवेति भावः। व्याख्याद्वये इति। एतस्याभिवत्वे निषेधे चेत्यर्थः। पृथगुपादानादिति। निमित्तत्वेनोपादाना
दित्यर्थः। अबाधे चेति द्वित्वे बहुव्रीहिवद्भावेपीति पाठः। कर्मधारयवद्भावेपीति क्वचित्कः पाठो लेखकप्रमादात् तत्तु दधि दानेऽवश्यंप्राप्तेन ऋस्य विधानाद् अचः परे रेफ

अत्रेदं वक्तव्यम्। चङमेव लघुमाश्रित्य तर्हि दीर्घोऽस्तु। किंच णिचः स्थानिवद्भावोऽपि सुलभः। यदुक्तं अभ्यास
स्यादिष्टादचः पूर्वत्वादिति। तन्न। टिशब्दस्य हि द्वित्वम्। ततो णिलोपः। एतच्च द्विर्वचनेऽचीति सूत्रस्य व्याख्याद्व
दि येऽपि तुल्यम्। यदप्युक्तं दीर्घविधौ निषेधादित्यादि तदपि न। निषेधस्याष्टमिकदीर्घविषयत्वात्। अत एव हि पूर्वत्रा
सिद्धीयेन स्थानिवदित्याश्रित्य दीर्घग्रहणं भाष्ये प्रत्याख्यानम्। तस्माद्दीर्घस्य दुर्वारतया नेदं प्रसादखण्ड
नं सम्यगिति किं तर्हि सम्यगिति चेत् उच्यते। दीर्घो लघोरित्यत्र चङ्परस्य णेः पृथगुपादानात् तदितरस्यैव लघुः कार्य्यी। त
क्रकौण्डिन्यन्यायात्। यथा द्वित्वविधौ रहाभ्यामित्युपादानाद्रेफेतरस्यैव परः कार्य्यित्वं तद्वत्। यथा वा तलोपो नञ इति सू
त्रेण ञमित्रस्यैवोत्तरपदस्य निमित्तत्वादाबाधे चेति द्वित्वे कर्मधारय वद्भावेऽपि न नेत्यत्र तलोपो नेति हरदत्तादिभिरुक्तं तत्

पाङ्कार्येत्वप्राप्तेनिमित्तत्वोक्तेर्बाध उचितः। प्रकृतेऽपि चोऽलघोरित्यनेनाग्रहणे कोऽन्यायः। अत एव करोतीत्यादौ गुणः। अन्यथा तेन न्यायेनेक्भिन्नस्यैवार्धधातुका
देर्निमित्तत्वस्यात् तलोपो नञ इत्यत्रापि नञो निमित्तत्वं नावश्यम्भाव्यमिति कथं तत्रैतन्न्यायावसरः। किंच निमित्तभूतस्यापि प्रत्ययस्य भवामीत्यादावङ्गे प्रवेशाद
कृत्स्नस्य णिचोऽपि तदादिग्रहणात्कार्यिकोटौ प्रवेशो दुर्वारः॥ १ ॥ ॥

राम॰ ५८

दृत्यकृचेराह॒ःसञ्ज्ञावेति।अदृनत्वादिति।तन्मध्यपतितन्यायाप्रवृत्त्येत्यर्थः।अन्यथाअन्तरङ्गत्वेनप्रथमोपस्थितमादायैवाङ्गत्वंतुद्वितीयमित्यर्थानङ्गीकारेकिंबहुनेति।तन्म।
ध्यपतितन्यायाप्रवृत्त्येत्यर्थः।न्यायलब्धेति।विरोधन्यायलब्धतन्मध्यपतितन्यायाप्रवृत्तिरूपेऽर्थेइत्यर्थः।अतएवेति।अङ्गत्वाभावादेवेत्यर्थः।तक्रकौण्डिन्यन्यायेनेति।अङ्गत्वम
ङ्गीकृत्यप्रथमोढादौदीर्घस्तथाऽनेनन्यायेनवारितस्तथेत्यर्थः।परेतुअन्तरङ्गस्यप्रथमोपस्थितस्याभ्यासावयवणिचआनर्थक्यात्प्रत्ययत्वाभावेनतमादायाङ्गत्वंदुर्लभम्।किञ्च
वंप्रतीषिषतीत्यादावित्वात्नापत्तिःप्रत्यासत्त्यासन्निमित्तकाङ्गावयवाभ्यासस्यातस्तेनेत्वविधानात्अङ्गत्वेनेतिदीर्घस्तुनहनादिसाहचर्येणार्थवदजन्ताङ्गस्यैवतेननदीर्घवि।

षस्तुतस्तुआटिटदित्यादौणिज्निमित्ताङ्गसञ्ज्ञाप्रथमणिचःप्राचीनस्यैवनतुनहिशिष्टस्य।एकस्यैवहिणिचोर्द्विःप्रयोगः।तथाचाङ्गसञ्ज्ञायान्निमित्तभूतांणिचक
युड्नर्थिकोटौप्रविशत्।सञ्ज्ञावाप्रथमोपस्थितंकथंनिमित्ततयानरहीयात्।अन्तरङ्गस्यापेक्षायांबीजाभावात्।नचद्वित्वात्प्रागेवप्रवृत्ताङ्गसञ्ज्ञातन्मध्यपतित
माध्यस्मिवमप्यवगाहतइतियुक्तम्।द्वितीयेटकारान्तर्भावेणप्रत्ययत्वेनेतिवैपरीत्यस्यापिसुवचत्वात्।ननुयथोभयतआश्रयेनान्त्यादिवत्।विरोधात्तथेहापिप्र।
त्ययांशेअङ्गांशेवातन्मध्यपतितन्यायस्याप्रवृत्तिरितिचेत्।सत्यम्।तावतापित्वदुक्तदोषस्योद्धृतत्वात्।युक्तश्चैनत्।अन्यथाप्रतीषिषतीत्यादौद्वितीयसनं।
प्रतिप्राचीनसनन्तस्याङ्गत्वेऽज्झनगमामितिदीर्घःस्यात्।किंबहुनाजिगीषाजिघांसेत्यादावप्यभ्यासस्यदीर्घःस्यात्।सनःसकारेणविशिष्टस्यद्वित्वे।
धातोर्द्वितीयभागस्यसनन्तर्भावेहलादिशेषेणएकदेशविकृतन्यायेनाभ्यासोत्तरभागस्यप्रत्ययत्वेप्राचीनस्याङ्गताध्रौव्यात्।एवञ्चन्यायलब्धेऽर्थेदिवाजिगी
षायामित्यादिनिर्देशोऽपिलिङ्गंबोध्यम्।अतएवाटिटदित्यादौलघूपधगुणोऽपिन।अन्यथास्यादेवसः।नचणौचङ्युपधाह्रस्वेननिर्वाहः।तक्रकौण्डिन्यन्या
येनदीर्घस्येवह्रस्वस्यापिदुर्लभत्वादितिदिक्॥ ‹‹ धानात्।द्वितीयशब्दपूर्वभागस्याङ्गत्वेऽप्यनर्थकत्वात्।अङ्गत्वंतुविकरणविशिष्टेऽनर्थकेऽपिदृष्टमेवात

स्यादेकाचोद्वेइतिसूत्रशेषभाष्योक्तन्यायेनोत्तरभावमादायप्राक्तनसमुदायस्यैवाङ्गत्वमुचितंद्विःप्रयोगत्वात्द्वितीयंपिततोविहितत्वबुद्ध्यनयायात्।नचैवंस
मुदायस्यैवेतिकुतःपूर्वसनमादायधातोरप्यङ्गत्वेऽज्झनेतिदीर्घापत्तिरितिवाच्यम्।तस्यानर्थकत्वात्।आटिटदित्यादौगुणस्तुबहिरङ्गःस्यचङ्निमित्तद्वित्वसा
सिद्धत्वान्न।दीर्घोलघोरितिदीर्घस्तुनोचङ्परेणौयत्लघुइतिभाष्यमतेऽप्राप्तेर्व्याख्यानान्तरत्वेनदोषादेवासङ्गतम्।यद्वाऽस्यादेवभाष्यप्रयोगाच्चङ्णिभिन्नएवत्व

॥आर्द्धधातुकमध्येऽचामन्तर्भावेपिनाजानन्तर्यइतिनिषेधोनअनित्यत्वातअत्रवायंभाष्यप्रयोगएवमानं १

युक्तत्वराद्यातइतिनदोषइत्याहुः॥९

उ.
म.श.
५९

त्लावस्थायामिति। द्वित्वकारकनिर्देशादिति भावः। प्रथममिति। द्वित्वादिति शेषः॥ द्वितीयस्येति। एकाच इति शेषः। अनुवृत्तिर्मास्त्विति। द्वितीयस्येत्य-
स्यानुवृत्त्या नित्यं द्वितीयस्येत्यर्थलाभ इत्यभिमानः। दकारस्यापीति। रेफस्य तु निषेधे प्यस्य निर्दिति भावः। नचैवमपीति। धातोरादिभूतादचः परा नित्यं द्वितीयस्ये
का चावयवभूताः संयोगादयो न्द्राः द्विर्नेत्यर्थादिन्द्रीयिषतीत्यादौ न दोषः। प्रकृते च निषेधाप्रवृत्तिरूपो दोष इति भावः। पूर्ववर्त्तिमात्रपरमिति। पूर्ववर्त्यचः परा न्द्रा

आर्ध

अजादेरि त्येवेति। नन्द्रा इति सूत्रे अजादेरित्यनुवर्त्तत एवेत्यर्थः। अदिद्रपदिति। ननु त्लावस्थायामेवाडिति भाष्यकारोक्तपक्षे अजादित्वमस्त्येवान्या
य्यश्च प्रथमम् अट् परत्वादन्तरङ्गत्वाच्च। सत्यम्। द्वितीयस्येत्यप्यनुवर्त्तते नित्यं द्वितीयस्येति तदर्थः। धातुसञ्ज्ञाप्रवृत्तिकाले इति यावत्। एतच्च तदनुवृत्तिरस्मा
मभ्युपगम्यते। नचैवमजादेरित्यस्यानुवृत्तिर्मास्तु इति वाच्यम्। इन्दिद्रीयिषतीत्यत्र दकारस्यापि द्वित्वनिषेधापत्तेः। नचैवमपि वन्दिद्रीयिषतीत्यत्र दोषः स्या
देवेति वाच्यम्। अजादेरिति हि कर्मधारयात्पञ्चमीत्युक्तम्। इह च अच इत्येवानुवर्त्यैकदेशे स्वरितत्वप्रतिज्ञानात्। अथवादेरित्यप्यनुवर्त्तनान्न त्वनावय
व्यपरङ्गिन्तु पूर्ववर्त्तिमात्रपरं शब्दाधिकाराश्रयणात्। नन्वेवमुन्नरार्थतया द्वितीयग्रहणस्य सार्थकत्वे स्थिते द्वितीयस्येति न वक्तव्यं भवतीति भाष्यं विरु
द्धेतेति चेन्न। यत्र सूत्रे पठितं तत्र मास्त्विति तदाशयात्। कण्डरणेत्यादि। अत्र प्राचो ग्रन्थं व्याचक्षाणा आहुः। अजीहिडदित्यत्र उपधाह्रस्वे एच इगित्य-
स्यास्थानिवत्त्वाद्द्वित्वेऽभ्यासह्रस्वदीर्घत्वादीनि। तत्र। ओः पुयण्जीति ज्ञापकस्य अचिकीर्त्तदित्यत्रातिव्याप्तिवारणाय विशेषविषयताया भाष्येऽ
वस्यवृत्वेन स्वयमपि प्राक् तथैव वर्णितत्वेन ह्रस्वानिवद्भावायोगात्। विशेषश्चावर्णवदुत्तरखण्डत्वं उवर्णादेशत्वं चेत्यन्यदेतत्। एतेन सौनिष्यो रि-
ति सूत्रे सिषेचयिषतीत्यत्र सिचेर्हेतुमण्णौ गुणे सति इडिगुणायादेशयोः॥ ११ इत्यर्थः॥ अवयवपरत्वे हि धातोरादिभूतादच इत्यर्थः स्यादिति भा
वः। अत्र केचित्। चन्द्रीयतेः सनि न न्द्रा इति निषेधप्रवृत्तौ न मानम्। न च संयोगसञ्ज्ञासूत्रे भाष्ये बहूनां सन्निपाते द्वयोः संयोगसञ्ज्ञायामिन्दिद्रीयिषतीत्यत्र दोष
माशङ्क्य न वाज्भ्यो रितिसमाहितम्। अचः परस्य निषे धविधिरिति तदर्थ इति तदेव भाष्यं मानमिति वाच्यम्। अजादेरिति निवर्त्तत इति तद्व्याख्यानभाष्ये उक्तत्वेन तस्या
ऽमानत्वात्। तस्य भाष्यस्य भङ्क्त्वा व्याख्यानेन मानमित्याहुः॥ ५

एभ.
५९

णौ कृतस्येति। इदं हृत्यनुसारेण। अभ्यासेत्वसन्निपातयोगशिष्ट उपधालोपस्य द्वित्वोत्तरमेव प्रवृत्तेरिति दिक्। तथैवेति। यकारनिर्देश एवेत्यर्थः। इतिवदन्तीति। अ
त्रारुचिरिव औत्सूत्रस्थभाष्यविरोधः अन्ये तु निरनुबन्धकत्वाँत्त्राादेरेव लीत्यस्य ग्रहणे प्रतिपदोक्तत्वाच्च लातेरेव ग्रहणे धातुद्वयेन रूपद्वयसिद्धौ अन्य।
कृतयोर्णौ क्विन तस्य स्थानिवत्त्वेन सिच् शब्दस्य द्वित्वमिति वदन्न्यासकारोपि प्रत्युक्तः। अत एव उक्तन्यासबलेन ज्ञापकस्य सामान्यविषयत्वम्। अ
चिकीर्तदित्यस्य सिद्धये अनित्यताऽऽश्रयणं कुर्वन् सीरदेवोपि प्रत्युक्तः। अजीहिठत् सिषेचयिषतीत्यादिरूपं तु इकारैकारविशिष्टस्य द्वित्वेपि सि
द्ध्यतीति स्पष्टमेव। एतच्च सर्वं सुधीनां प्रपञ्चितं माधवेनेति दिक्। अपीप्यदिति। णौ कृतस्योपधालोपस्य स्थानिवत्त्वात्प्यशब्दस्य द्वित्वे हलादि
शेषे ईत्वम्। इहाग्लोपित्वादलघुपरत्वाच्च सन्वदित्वदीर्घप्राप्तेरीत्वं विधीयते। ब्रेपयतीति। व्रीवरणे। रीङ्क्षये। क्रूयि शब्दे। स्मायी विधूनने। निष्ठ
तेरिति। इहनिष्ठिपदिति प्राञ्चो ग्रन्थं व्याचक्षाणाः णौ कृतस्य तिष्ठतेरित्वस्य स्थानिवद्भावात्स्थाय् शब्दस्य द्वित्वमित्याहुः। तदसद् उक्तरीत्या प्रक्रियायामवर्णैव
द्भुतस्य खण्डनेन वस्तुतः सम्यगेव। किन्तु तेषां परस्परव्याघातावहम्। परिनिष्ठितरूपे ऽवर्णपरतायास्तेरुपजीवनात्। कथमन्यथा उवर्णा ... ।
देवमतं भाष्यमतत्वेन प्रागयूयुजच्चिति सुधीभिराकलनीयम्। स्निपानिर्देशाय ङ् लुङ् निवृत्त्यर्थः। अतास्थपत्। पुकोपवाद इति। एवञ्च पाल रक्षण इति धा
तुना पालयतीति रूपे सिद्धे लुगागमस्य पुग्निवृत्तिरेव फलमिति भावः। एवं वो विधूनने जुगित्यत्रापि बोध्यम्। वाजयतीति रूपस्य वज गतावित्ति धातुना
सिद्धत्वात्। विभाषा लीयतेरिति। आत्वविधायकं स्मारितम्। लिलो। लीयतेरिति। लीश्लेषणे क्र्यादिः। लीङ् श्लेषणे दिवादिः। उभयोरपि यकारनिर्देशात्तु श्य
ना। तथाहि स्मितिलीङ् इत्येवावस्यत्। एतच्च विभाषा लीयतेरिति सूत्रे प्राचाङ्गुत्येस्पष्टम्। लीलोरित्यस्य दृष्टान्तावपि तथैवोचितम्। सर्वेहि लिलीङोर्द्वयोरपि
ग्रहणं निरनुबन्धपरिभाषायाः प्रत्ययविषयत्वात् इति वदन्ति। प्रयोज्यकर्त्रीति। यद्यपि प्रथमणिजर्थप्रतिममनुष्यवागेव प्रयोजिका अतस्तत्त्वं प्रवृत्त
तरस्याङ्गत्वसामर्थ्यादत्रव्यवस्थापकन्यायाप्रवृत्तिरित्युभाभ्यामप्युभयग्रहणं लीलीङोर्लीतेः कृ ((म। तथापि द्वितीयणिजर्थाभिप्रायेणेदमुक्तम्॥ १
नात्वस्यन्तोपतेश्चेति हेतुमण्णावेव पूर्वोत्तरसाह चर्येणास्य प्रवृत्तेश्चौरादिकस्य न ग्रहणमित्याहुः॥ १॥

उ॰
म॰ श्री॰
६०

णिनिमित्तस्येति। विषयसप्तम्यामपि तद्धिते हि गुणिनिमित्तत्ववन्निमित्तत्वमस्तीतिभावः। भाष्यारूढत्वादिति। नन्द्राइतिसूत्रस्थभाष्यारूढत्वादित्यर्थः॥ ६ ॥
अङ्जीगपदिति। इह णिनिमित्तस्य गाङो द्वित्वे कर्त्तव्ये स्थानिवद्भावो निषेधो वा नास्ति। सति हि तस्मिन्नजादेर्द्वितीयस्येति णिच एव द्वित्वं स्यात्। न तश्च न।
प्रक्रियायां न वा परिनिष्ठिते रूपेऽवर्णवदुत्तरखण्डमस्तीति कीर्त्तयति साम्यात्। ज्ञपादिरिति। नेनमित्वाद्ध्रस्व इति भावः। सारेसुमित्वं नास्तीत्युदाहरति। चा
पयतीत्यादि। इतिवार्थ इति। व्याख्यानद्वयस्यापि भाष्यारूढत्वादिति भावः। षकारस्येति। रेफस्य नन्द्रा इत्यनेन वारणादिति भावः। सत्वं ने प्रवर्त्तन इति। य
द्यपि सत्वन्तस्यान्वन्तरं तथापि वचनसामर्थ्यात्तत्र प्रवृत्तिरिति भावः। तृतीयाभावेनेति। इहोपन्यासस्तु आद्यव्याख्यानमादाय प्रकृतोपयोगादिति।
भावः। इह मूलस्वरूपद्वयव्युत्पादनेन प्राचो ग्रन्थोपि अर्थाद्व्याख्यातः। प्राचो ग्रन्थं व्याचक्षाणास्तु तद्ग्रन्थस्य तत्वैत्र ग्रन्थस्य च प्रामादिकतामाह
तामप्रबन्धेन प्रत्ययीपदत्। तथा च तदीयो ग्रन्थः। केचित्तु सेर्षिष्यदिति षकारादेरपि द्वित्वमुदाहृियते। तज्ज्ञान्तप्रशिष्टत्वादुपेक्ष्यम्। अत्रैव च कारणं अथदान्
तीयस्यैकाचः षकारस्येत्यर्थः इति प्राचो व्याख्यानम्। तथाहि। यदि तृतीयवर्णस्येति व्याख्यायेत। तदा ईर्ष्यिषिष्यतीति सनो द्वित्वं न स्यात्। यदि तु तृतीय
स्यैकाच इति यथाश्रुतं व्याख्यायेत ततः कथमेर्षिष्यदिति षकारादेर्द्वितीयस्यैकाचः स्यात्। न च तृतीयस्य वर्णस्येति व्याख्यातुमुचितम्। अथाहा
रप्रसङ्गात्। तृतीयस्यैकाच इति ग्रन्थस्वारस्यभङ्गाच्च। तथा च कस्य तृतीयस्य केचिदाहुर्व्यञ्जनस्येति। अपरे पुनराहुस्तृतीयस्यैकाच इति द्वितीयन्यास
कारहरदत्तौ व्याख्यातास्म। तृतीयस्येति। तृतीयव्यञ्जनसहितस्यैकाच इत्यर्थः। अत्र षकारस्य द्विर्वचनन्न भवति। अपरे पुनरिति। अस्मिन्पक्षे ईर्ष्यतेः
सनि कृते इति व्याख्येयम्। अन्यथा तत्संबन्धिनस्तृतीयस्यैकाचोऽसंभवात्। माधवोप्येवम्। तस्मादेर्षिष्यदित्येकमेवात्र रूपं साधीयो न त्वैर्षिष्य
दिति णिजन्ते तृतीयस्यैकाचोऽसंभवात्। न चाटि कृते तमेवापेक्ष्य षकारादिस्तृतीय एकाजिति वाच्यम्। अन्तरङ्गत्वादाटश्चेति द्विर्द्यानविधानात्। अ
न्तरङ्गत्वादेव द्वित्वस्यासिद्धत्वमपि नास्ति। नापि स्थानिवद्भावः। द्विर्वचने पूर्वस्य पूर्वस्माद्विधेरभावादिति नियुक्तमुत्पश्याम इति। इह केचिदित्यादिना नपु
तुमुत्पश्याम इत्यन्तेन तदीयग्रन्थेन मूलटीकयोः को दोष उपन्यस्त इति विभावनायामुक्तरूपं प्रकृतवार्त्तिकेन न सिद्ध्यतीति मूले दोषः॥ राम॰
६०

सोऽष्ठ वादिति। षकारस्येति सवकार इति वत्समुदायात्कार इति भावः॥ ॥ इति णयन्तप्रक्रिया॥ ॥ प्रवृत्तिभेदेनेति। आवृत्त्येत्यर्थः। अजन्तस्ये
ति। अत्रार्थे प्रत्याहारबहुवचनयोः प्रमाणत्वं बोद्धव्यम्। लाक्षणिकत्वादिति। वर्णग्रहणे पि तत्प्रवृत्तेरोत्स्त्रस्य भाष्यसम्मतत्वात्तत्राऽ प्रवृत्ति ज्ञापकस्या
टीकायां तु षकारस्य तृतीयैकाचृत्वोक्तिरयुक्तेदोष इति लभ्यते। तत्र न तावदाद्यः प्रकृत वार्त्तिकस्य तत्राप्रवृत्तावपि अजादेर्द्वितीयस्येत्यनेन द्व
निरुक्ताभ्यां रूपसिद्धेर प्रत्यूहत्वात्। नापि द्वितीयः स त्वन्नामिप्रायेण टीकाग्रन्थस्य सौष्ठवात्। सर्वत्र्यैतदिह मूलस्य वध्वनितम्। मात्सर्यमुत्सार्य्य
गुणग्रहैरा कलनीयम्। निवृत्तेति। तथा चोक्तम्। निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यते इति। तेनेति। यत्तु चक्षिङो ङिन्करणं अनुदात्तेत्वप्र
युक्तस्यात्मनेपदस्यानित्यतां ज्ञापयतीत्युक्त्वा तेन प्रार्थयन्तीति सिद्धमिति माधवादिभिरुक्तं तदत्ति स्थवीयः। तस्यागर्वादात्मनेपदविधानात्। यद
पि तरङ्गि णयाङ् णकृतमात्मनेपदमनित्यमिति ज्ञापनार्थं चक्षिङो ङकार इति तदपि न। चक्षिङो गण कृतात्मनेपदस्यासंभावितत्वं यामूलशैथिल्यात्। यद त
प्याहुः प्रार्थनं प्रार्थः तत्कुर्वन्ति प्रार्थयन्तीति तदपि न। धातुसञ्ज्ञानिमित्तप्रत्ययेकर्त्तव्ये उपसर्गाणां पृथक्करणस्य ज्ञापयिष्यमाणतया अर्थवैदसत्यानामि
त्यापुकोदुर्वारत्वादिति दिक्॥ इति हेतुमण्ण्यन्तप्रक्रिया॥ धातोः कर्मणः। इच्छायामिति श्रुतत्वात्कर्मत्वं समानकर्तृकत्वं च तदपेक्ष्यमेव गृह्यत इत्याश
येनाह। इषिकर्मण इत्यादि। यिसनो रिति। प्रागुक्त्व्यास्या विकल्पादिति भावः। अङ्गुन। गमः सामान्येन ग्रहणात् गम्लृ गतावित्यस्या स्त्रिं गंसते
इत्यत्रापि स्यादत आह। अजादेशगमेरिति। सनि च इङ् श्चेति सूत्राभ्यां विहितस्य णिङोरादेशस्य। इण्वदिक इति। इक आदेशस्य चेत्यर्थः। एतच्च सूत्रे
ऽजग्रहणाल्लभ्यते। तथा हि। इह सनीत्येव वक्तव्यम्। दीर्घश्रुत्योपस्थितेनाच इत्यनेनाङ्गस्य विशेषणात् अजन्ताङ्गस्य दीर्घः। चिचीषति। ततः हनि
गम्योः एव स्वाजग्रहणमतिरिच्यमानं प्रकृतिभेदेन गमेर्विशेषणार्थमजन्ताङ्गस्य दीर्घो भवति। अजादेशगमेश्चेति। इट्स। कृदन्तादिति। वि
कीर्षतीत्यादौ तु अज्ग्रहणमागमामिति दीर्घत्वे नेदं प्रवर्त्तते उपदेशाधिकारात् लाक्षणिकत्वाद्वा। एवोदाहरति। दुधूर्षतीति। धृकौटिल्ये। अज्झने
नित्यत्वे एवतात्पर्यमिति भावः। सन्निपातपरिभाषाविरोधान्नेत्यपि बोध्यम्॥ ९ ॥ "ति दीर्घेउ दोष्ठ्यपूर्वस्येत्युत्वं रपरत्वं हलि चेति दीर्घः ॥ ९

म.श. कृतश्च संयोगादेरित्यत्रेति। इड्विधायके सूत्र इत्यर्थः। भाष्यमिति। सन्विधायकसूत्रे इति शेषः। शेषे। शेषाधिकारे॥ ॥इति सन्नन्तप्रक्रिया॥ किञ्चेति।
उ. अन्यश्चेत्यर्थः। अनित्यतानेति। अन्यथा गत्यर्थेभ्यः कौटिल्ये विशेषविहितेन यङा क्रियासमभिव्याहारार्थयङः सकृत्कौण्डिन्यन्यायेन बाधे सिद्धे नित्यग्रहणं
६२ व्यर्थं स्यादिति भावः। इदमत्र तत्त्वं कैयटानुरोधेन। परे तु क्रियासमभिव्याहारादेर्यङ्द्योत्यत्वात् इति धातोरित्यर्थेनानुवाद्यत्वं च विधेयत्वं त कौण्डिन्यन्या।

यत्तु प्राचा कृतश्च संयोगादेरित्यत्र लिङ्सिचोरिति प्रकृतेऽपि इट् सनि वेत्यतो मण्डूकप्लुत्या सनीत्यप्यनुवर्त्य दिध्वरिषतीति रूपान्तरमुदाहृतम्।
तन्न। सनीत्यस्यानुवृत्तेरनाकरत्वात्। आत्मनेपदेष्वित्यनुवृत्तेः। परस्मैपदानोदाहरणस्योक्तिसम्भवाभावाच्च। स्मिपूङ्। पूङो ङकारोच्चारणं पूञो व्यावृत्त्यर्थं
तेन तस्य पुपूषतीत्येव। सनि ग्रहेतीण्निषेधात्। जत्रा ज्वरशेरश्च ऊदित्वाद्विकल्पे प्राप्ते पूङ उगन्तत्वान्निषेधे प्राप्ते स्मिङस्तु अनिट्त्वादप्राप्ते वचनम्। सि
स्मयिषत इति। सोनिण्पोरिति नियमात्तषः। शैषिकादित्यादि भाष्यम्। शेषे भवः शैषिकः। अध्यात्मादित्वाट्ठञ्। मतुवर्थे भवो मतुवर्थीयः। गहादित्वाच्छः। म
तुवर्थीस्यास्तीति मतुवर्थिकः। अ तइति ठना विनिठन्॥ इति सन्नन्तप्रक्रिया॥ यस्य हलः। सङ्घातग्रहणमिति। तेनाहर्यीदमव्यीदित्यादौ नातिप्रसङ्गः
। किंच अर्थवद्ग्रहण परिभाषया पुत्रकाम्येत्यत्र नातिप्रसङ्ग इति भावः। यकारपरस्येति। एतेनाय्यमास्यत आरर्यत। इति प्राचामुदाहरणं व्याख्यातम्।
भाष्योदाहरणस्य सामान्यापेक्षज्ञापकत्वात्। नित्यङ्कौ। नित्यशब्दोऽवधारणार्थ इत्याह। कौटिल्य एवेति। न तु कौण्डिन्यन्यायस्यानित्यत्वानेन ज्ञाप्यते
। तेन पूजितो यः सुरासुरैरित्यादौ भूतेक्तः सिद्ध्यति। अन्यथा मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तेन बाध्येत। न तत्र कर्तरि तृतीया न स्यात्। तस्य च
वर्तमान इति षष्ठ्या बाधात्। जपजभदह। पसगतौ सौत्रः। दन्त्यान्तोयमिति। स्पश बाध नस्पर्शनयोरिति धातो माधवः। संचेस्क्रीय त इति। अत्र प्राचो ग्रन्थे
पर्वतेष्वपि बहिरङ्गत्वाच्च संयोगादित्वेन गुण इति। तन्न। परत्वाद्रीङ्ङिकृते ततो द्वित्वे ऽभ्यासव्यवायेपीत्यभ्यासात् परस्य सुटि कृते साभ्यासङ्गस्य संयो
पश्चविधेयविषयोऽचरितार्थं विषयश्चेति स्पष्टमिदं चोक्तं तत्र भाष्ये। नाप्यत्राऽचारितार्थ्यम्। क्रियासमभि गादित्वमदन्तत्वञ्च नास्तीति गुणप्राप्तेर
व्याहारेऽपि सावकाशत्वात्। नित्यग्रहणं त्वनभिधानमाश्रित्य भाष्ये प्रत्याख्यातमित्याहुः। परत्वादिति। द्वित्वादित्यादिः। पूर्वस्यानुः सा धनेनेति भाष्यमनेदम्। राम. ६२

नचेति। हित्वादिति। हित्वनिमित्तयङ इत्यर्थः। परत्वादिति। उक्तश्रुत्वादन्तरङ्गत्वादित्यर्थः। सुटिकृतेइति। ततोयङीतिशेषः। रीङप्रवृत्तेः प्रागिति। अपवादत्वादि
दितिभावः। हित्वाच्चपरत्वादितिबोध्यम्॥ गुणेति। यङिचेत्यनेनेतिभावः। कृतयोरेवसुडिति। सुट्निमित्तोपसर्गयोगइत्यर्थः। स्वच्चपूर्वस्थानुः। साधनेनेति
पक्षस्वेति पूर्वं यङि हित्वेरीङिसुटप्राप्त्या दोषइतिभावः। अत्रैवार्थेज्ञापकान्तरमाह। अतएवेति। संयोगादित्वाभावादिति। पश्चात्सुटिअङ्गस्यसंयोगादि।
त्वाभावादित्यर्थः। भाष्यकृतेति। तेनह्यडभ्यासव्यवायेपीतिप्रत्याख्यायते अत्रपक्षेस्वमतेगुणाभावस्तुयङिचेत्यत्रापिनित्यग्रहणानुवृत्त्या बोध्यः। भाष्योक्त
नचसंकृइत्यस्यामेवावस्थायांहित्वात्परत्वात्सुटिकृतेरीङ्प्रवृत्तेः प्राक् गुणप्राप्तिः शङ्कनीया। अडभ्यासव्यवायेपीत्यस्यारम्भेणाडभ्यासयोः
कृतयोरेवसुट्नप्रागितिनिर्णयात्। अतएवसञ्चस्करतुरित्यत्रसंयोगादित्वाभावाद्गुणोनसिद्ध्यतीतिसंयोगोपधग्रहणंकर्त्तव्यमित्युपसं।
ख्यायते। नचभाष्यकृतापूर्वस्थानुरूपसर्गेणेतिदर्शनेसुटोन्तरङ्गत्वोक्तेः ससुट्कस्यैवद्वित्वाभ्युपगमात् गुणप्राप्तिरितिवाच्यम्। तन्म
तेसुटोबहिरङ्गत्वादितिपरिहारविरोधादित्यास्तान्तावत्। सिचोयङि। अभ्याससकारस्योपसर्गात्सुनोतीतिनतःपरस्यतुस्यादिष्वभ्या
सेनचेतिप्राप्तंषत्वंनिषिद्ध्यति। नकवतेर्यङि। कोरित्येवषाच्येशपानिर्देशस्यफलमाह। कौतिकुवत्योस्त्विति। कुशब्दइत्यदादेःकूङ्श
ब्देइतितुदादेश्चनिवृत्तिःफलमितिभावः। यद्यपिकोरित्युक्तेपितौदादिकस्यप्रसङ्गोनास्तिदीर्घान्तत्वात्। तथापिकौतिव्यावृत्त्यर्थेङ्कीयेमा
णः शपानिर्देशःकुवतिमपिव्यावर्त्तयतीत्यत्रतात्पर्यम्। नचलुग्विकरणपरिभाषयानिर्वाहः॥ ९९ निषेधवचनादेववा। प्रत्ययोत्पत्तिवेलायांसंयो
गादित्वस्यविवक्षणात्सञ्चस्करतुरित्यादौगुणसिद्धिःसस्वरतुरितिवदितिबोध्यम्। निषिद्ध्यतेइति। यद्यप्युपसर्गात्सुनोतीत्यादिनिषेधबाधकन्तथापियेननना
प्राप्तिन्यायेनसात्पदाद्योरितिनिषेधस्यैवबाधकंअयन्तुनिषेधःसर्वबाधकोव्याख्यानात्। एतदर्थमेवोपसर्गादित्यनन्तरंनिषेधप्रकरणङ्गतंआदेशप्रत्य।
ययोरित्येतन्मात्रबाधकत्वेहितत्प्रागेवकुर्यादितिभावः। शपानिर्देशस्येति। यङ्लुग्निवृत्तिस्तुनफलंयङः परत्वाभावात्। नचयङ्न्तादपिभाष्यमतेयङोवयव
लोपाङ्गीकारात्तन्मतेनतद्व्यावृत्त्यर्थःसः। श्तिपा निर्देशेनसिद्धेर्यङ्लुग्व्यावर्त्तकेनेतरव्यावृत्तावपिबाधकाभावाच्च॥ ॥

निरनुबन्धकेति। साप्रत्ययविधिविषयेतिनुभूवादिसूत्रस्थभाष्यविरुद्धत्वादसङ्गतमितिभावः। कुङ् इत्येवेति। नचपर्यायेषुलाघवगौरवाभावः। कवेत्ते
त्येतेनसानुबन्धरहितधातुमात्रार्थत्वेनपर्यायत्वाभावादितिदिक्। कुत्वेनेति। अभ्यासाच्चेतिकत्वेनेत्यर्थः। ननुहिन्योरिकारोच्चारणंनोत्ववाधवत् ह
कारोच्चारणसामर्थ्यात् ह्रीभावेकुत्वंनस्यादितिचेन्न। शास्त्रबाधकत्वस्यनापेक्षयाहकारोच्चारणङ्ग्त्वप्रवृत्त्यर्थमित्यस्यैवकल्पयितुंयुक्तत्वात्। नत्र।
तुयेननाप्राप्तिन्यायेनहिन्योरपवादत्वेनेकारोच्चारणस्यतद्बाधकत्वमेवयुक्तम्। विषयभेदादिति। अपवादत्वेनवाधेविषयैक्यापेक्षणादितिभावः। एक

निरनुबन्धकपरिभाषाया अपिजागरूकत्वेनउभयग्रहणध्रौव्यात्। वस्तुतस्तुकुङ इत्येवसुवचम्। हंनेर्हिंसायामित्यादियद्यपि
ह्रीभावेपिक्ङितेकुत्वेननेह्रीयतेइतिसिद्ध्यतितथापिप्रक्रियालाघवायघ्नीत्युक्तम्। अत्रचदिग्यादेशेनेवघ्नीभावेनद्वित्वंनबाध्यते
विषयभेदात्। यङन्तावयवस्यहिद्वितीयाजवधिकस्यद्वित्वंप्रकृतिमात्रस्यघ्नीति। वेवीयतेइति। हलइतिवा। अकृत्सार्वधातुकयोर्दीर्घः। चा।
यः की। दीर्घोच्चारणंयङ्लुगर्थम्। अतएवनलुमतेतिनिषेधोपितत्रनप्रवर्त्तते। चेकीतः। ईघ्रा। दीर्घोच्चारणंप्राग्वत्। यत्तुवदन्तिप्र
क्रियालाघवार्थमितित न्नाचायःकीत्यत्रापितथात्वापत्तेः। ननुमाधवग्रन्थवलेनवैषम्यंस्वीकुर्मइतिचेन्न। युक्तिविरोधेनतस्यापि।
त्याज्यत्वात्। शाशय्यतइति। परत्वादन्तरङ्गत्वाच्चाय ङादेशेकृतेद्वित्वम्॥ ॥इतियङन्तप्रक्रिया॥ ॥ वा३

कवनेगुणसत्वेनविशेषाभावादाह। चेकीतइति। प्राग्वदिति। नन्वस्यच्चावित्युत्तरार्थन्तदावश्यकमतोनलुमतेतिनिषेधबाधेनमानम्। नचतत्रापि। राम· ६२
च्चाविनिर्दीर्घेणेष्टसिद्धिः। ईत्वस्ययेनानाप्राप्तिन्यायेनदीर्घापवादत्वात्। दीर्घान्तेपिपर्जन्यवल्लक्षणप्रवृत्त्यादीर्घप्राप्तेरितिचेन्न। इष्टापत्तेः। ततध्वनयत्ना
हा। तस्यापीति। दीर्घोच्चारणंप्राग्वदितिवदतोपीत्यर्थः। ननुसंभवरूपविरोधाभावात्परत्वमसङ्गतमतआह। अन्तरङ्गत्वाच्चेति। येकिङितीतिविषयसप्त
मीत्यन्तरङ्गत्वमितिभावः॥ ॥ इतियङन्तप्रक्रियाः॥ ॥ ००७ ॥

ज्ञापकमाश्रित्येति। तच्चपूर्वमुपपादितम्। ज्ञापकत्वाच्चेति। दाधर्त्तीतिसूत्रेहितन्निपातनंभूधातोश्छन्दसिलोट्येवगुणाभावोनान्यत्रेत्येतदर्थमि।
तिस्पष्टंभाष्ये। तत्रसङ्कोचेमानाभावेनयङ्लुक्यपिछन्दसिलडादिवल्लोट्यपिगुणोवोध्यते। नचक्वान्यत्रमाभूत् बोभवतीतिलेटि भाष्यउदाहरणाच्छ
न्दोविषयकएवनियमः स्यादितिवाच्यम्। तस्योपलक्षणत्वादितिदिक्। गुणनिषेधःसिध्यतीति। धात्वंशलोपनिमित्तत्वादार्द्धधातुकस्येतिभा।

यङो। अचीतिनप्रत्याहारोगृह्यतेकिन्तुप्रत्ययः यङःसाहचर्यान्नदाह। अच्प्रत्ययइति। चकाराद्धलमित्यनुकृष्यते। येतुच्छन्द
सीत्यनुकर्षयन्तितेरपिभाषायांयङ्लुकक्वचित्स्वीकर्त्तव्यएव। हुश्नुवोः सार्वधातुकइतिसूत्रेहुश्नुग्रहणंप्रत्याचक्षाणेनवार्त्तिक
कृतातदनभ्युपगमेपिहुश्नुग्रहणज्ञापकमाश्रित्यभाष्यकारैस्तदभ्युपगमात्। यथोत्तरंमुनीनांप्रामाण्यात्। बोभूतुइति। निपा
तनस्यापिज्ञापकत्वाच्च। एतच्चमूलएवस्फुटीभविष्यति। अनैमित्तिकोयमिति। बहुलग्रहणेनक्रियमाणइत्यर्थः। अच्प्रत्ययेवि।
धीयमानस्तन्निमित्तकइतिस्पष्टमेव। तेनलोलुवः पोपुव इत्यादौनधातुलोपइतिगुणनिषेधःसिध्यति। यङन्तत्वादिति। सन्य
ङोरितिषष्ठीव्याख्यानादितिभावः। प्राचातुतत्रससमीव्याख्यायइहानङ्गकार्य्यत्वान्नलुमतेतिद्वित्वानिषेधइत्युक्तम्। तन्नाहतम्। य
तुतत्सौत्रेणव्याख्यानमङ्गाधिकारेऽविहितत्वादित्यर्थइति। तन्न। नलुमतेतिसूत्रेऽङ्गाधिकारेनगृह्यतेकिन्त्वाङ्गमनाङ्गंवाप्रत्ययेपरेपू
र्वस्यविधीयमानंसर्वमितिभाष्यादौनिर्णीतत्वात्। अन्यथाराजपुरुषादौनलोपाद्यसिद्धिप्रसङ्गादितिदिक्। नन्वेकाचइतिविधीयमानंद्वि
त्वंश्लिपाशपेत्यादिनानिषिध्येतेतिचेन्न। गुणोयङ्लुकोरुपिकौचलुकीत्याद्यभ्यासकार्य्यविधिभिर्द्वित्वानिषेधस्यज्ञापनात्। धातुत्वादिति।
((क्विबन्तेष्विवप्रत्ययोत्पत्तेः॥
वः। तन्नाहतमिति। सप्तम्यन्तप्रत्ययेपरतःपूर्वकार्यत्वेनानङ्गकार्यत्वोक्तिर्विरुद्धेतिभावः। नलोपाद्यसिद्धीति। आङ्गस्ये
वनिषेधेयविभमित्यस्यानङ्गत्वान्निषेधाभावेभत्वेननलोपोनस्यादितिभावः। द्वित्वाऽनिषेधस्येति। तत्परिभाषाभावस्यैवज्ञापकमित्यन्ये॥ ः ॥

म॰ श॰ उ॰ ६३

वहारासिद्धेश्चिपामित्यादिनाभावविशेषणाच्च। वर्द्धमानेनेति। द्रव्यवदित्यस्यद्रव्यविशेष्यिकांप्रतीतिञ्जनयतीतिदर्थ इतितदाशयः तदाह। यत्वित्यादिनादिगिति। तदर्थ।
सुरसशब्दस्यद्रव्यपरत्वेकर्मधारयेणतस्यपूर्वनिपातापत्तिः रथन्तरादिवद्रथशब्दस्यरूढत्वाच्चाकिंचसर्वत्रभावएवमेवापत्तौ कर्मणिप्रत्ययविधानेनोपपन्नोभावेप्र

मेदावगमादिति। उपमानानांबहुत्वेनोपमेयेनिङर्थेपिबहुत्वारोपेणप्रत्ययः अन्यथोपमानेबहुत्वोपादानवैयर्थ्यंस्यादितिभावः। ——— ।लिङ्गेति।लिङ्गभावमादायभिन्ननिङर्थत्वात्कर्तृकर्मातिरिक्तकारकत्वाभावमादायचाऽसत्वमिति भावः।व्यवहितान्वय इति।सद्दृग्विस्व च्चेत्येवंरूप इत्यर्थः।पूर्ववा

एकवचनमेवेति।प्रायोवादोयम्। भाष्येउष्ट्रासिकाआस्यन्तेहतशायिकाः शय्यन्त इत्यत्रबहुवचनस्स्वीकारात्। उष्ट्राणांहि आसिकाः॥ स्वरूपतएवविलक्षणाः हताश्चनानाप्रकारंशेरते उत्तानावतानाः विकीर्णकेशाःविस्रस्तवस्त्रा श्यानतश्चयादृशानिहतानांशयनानितादृशानिदेवदत्तादिभिः क्रियन्त इत्यर्थः। अत्रसादृश्याद्यवगमादाआख्यातवाच्यस्यापिभावस्यभेदावगमाद्बहुवचनम्।आसिकाः शायिका इतिचद्वितीयाबहुवचनम्।क्रियाविशेषणत्वेनकर्मत्वात्।नचैवङ्क्लीबत्वमेकवचनत्वेचस्यादितिवाच्यम्।स्त्रियाङ्क्तिन्नित्यधिकारात्स्त्रीत्वावधारणेनसामान्येनपुंसकमित्यस्याप्रवृत्तेः।बहुत्वावधारणेनएकवचनाप्रवृत्तेश्च। नचैवं मममन्वोक्तिर्विरुद्धेतिवाच्यम्।लिङ्गक्रियानाधारकारकयोगाभावमात्रेतात्पर्यमित्युक्तत्वात्।स्यसिचसी।यद्यप्यजादयोद्वन्द्वेननिर्दिष्टास्तथापिउपदेशेइत्यचएवविशेषणन्नहनादीनामव्यभिचारात्तदाह।उपदेशेयोजिति।अत्रप्राचाउपदेशेऽजन्तेभ्योहनादिभ्यश्चपरेषांस्यादीनामिड्वास्यात्।सद्दृग्चिण्वच्चेतिव्याख्यानम्।तन्न।सूत्रेहिस्यादयःसप्तम्यानिर्दिष्टाःअजादयश्चषष्ठ्या।चिण्वद्भावश्चप्रधानशिष्टःइट्तुचकारेणतत्सन्नियोगशिष्टःचिण्वदितिचसप्तम्यन्तादतिः।स्यसिचसीयुट्तासिष्वितिप्रतियोगिनिसप्तमीनिर्देशात्।तन्नचेतस्यसर्वस्यभङ्गेनविपरीतव्याख्यानेबीजमस्ति।चशब्दस्यव्यवहितान्वयोनिर्मूलः। स्यादेतत्।सूत्रस्वरसानुरोधेङ्क्स्येवेट्स्यात्।अजादिवत्।अनडुड्विधिवाक्येस्यादीनामितिविभक्तिविपरिणामआवश्यकः इतिचेत्।सत्यम्।पूर्ववाक्येचरितार्थस्यउत्तरत्रविपरिणामोन्याय्यएव।तत् ११वनुयथाश्रुतविभक्तेरचरितार्थत्वात्अनुचितोविवेक इति। उत्तरवाक्येचेत्यपिबोध्यम्। तत्राद्योदाहरणंहरिःसेव्यस्त्वङ्क्तश्चेति।अन्यस्यतुकर्तृकर्मणोरगु॥ णश्चानिर्दिष्ट इत्यर्थ वत्त्वस्त्रस्यभाष्यप्रयोगः। अचरितार्थ त्वादिति। सर्वथाऽच रितार्थत्वादित्यर्थः॥ ॥

॥ इत्यपिप्रयोक्तुमुचितमिति। स्यायने शब्दप्रयोगे इति भावः। इडप्युदात्तः स्यादिति। एवञ्चेडन्तस्याङ्गत्वाभावात्ततः परस्य प्रत्ययत्वाभावाच्च लुकोऽप्रा
प्तिरिति भावः। प्रत्ययत्वाभ्युपगमादिति। एवञ्च तदादिग्रहणेनाङ्गत्वमपि सुलभमिति भावः। उक्तस्यापीति। इटइवइटः परस्यापि चिणि दृष्टं प्रत्य
स

॥ तथाहि। हरिः सेव्यः तद्भक्ता श्चेति प्रयोगे उत्तरवाक्ये सेव्या इति विपरिणामं दृष्ट्वा न हरिः सेव्या इत्यपि प्रयोक्तुमुचितम्। यदप्याहुः।
विभक्तिव्यत्ययस्यापि बहुलं दर्शनादिति। तदपि भक्तिवादमात्रमिति स्पष्टमेव। किंच। प्राचो व्याख्याने चिण्वदिति तृतीयान्तादृत्तिः। तत्र
यथा पूर्वस्य कार्यं वृद्ध्यादिकमतिदिश्यते। एवं स्वस्य स्वस्मात्परस्य च कार्यमतिदिश्येत। ततश्च चिणि वेडप्युदात्तः स्यात्। चिणः पर
स्येव इटः परस्यापि लुक् प्रवर्तेत। ननु बाधितोऽसावि टआगमत्वेन प्रत्ययावयवतया प्रत्ययत्वाभावादिति चेन्न। कृतेप्यागमेऽवशिष्ट
स्य तया प्रत्ययत्वाभ्युपगमात् भोन्त इति सूत्रे प्राचोग्रन्थं व्याचक्षाणैस्तथैव निर्णीतत्वात्। किन्तु वृद्ध्यादिकार्यस्य प्रत्यये परे विहित॰
स्य इति परे कथं निर्वाह इत्याशङ्क्य चिणि दृष्टस्य सर्वस्यैवातिदेशे प्रत्ययत्वस्याप्यतिदेशात्तद्दोष इति तावत्प्राचोग्रन्थं व्याचक्षाणा एवा
हुः। तत्कथमुक्तस्यापि प्रत्ययत्वं न लभ्येत। यत्तु वदन्ति। चिणो लुकि चिण्वदिटोऽसिद्धत्वादिति। तदपि न। नहि चिण्वदित्यतिदेशं प्रति
इडसिद्धः। अतिदेशस्य निर्विषयत्वापत्तेः। तथा च लुकोपि वृद्ध्यादिसमकक्षत्वेनातिदेशो दुर्वार एवेत्यलमतिक्षोदेन। ननु यदि चि॰
णि दृष्टमात्रस्यातिदेशस्तर्हि हनिणिङ्ङादेशा अपि स्युः। घानिष्यते। आयिष्यते। अध्यापिष्यते इति। मैवम्। अङ्गाधिकारबलेनाङ्गस्यै
वातिदेशात्॥ नचैते आङ्गाः। तदेतदाह। अङ्गकार्यमिति। सीयुट् इति। तथा च सीयुट् शब्देन तद्विशिष्टं लक्ष्यत इति भावः॥ ६ ॥

यत्वमिव चिणः परेपि दृष्टप्रत्ययत्वस्याऽतिदेशसंभवादिति भावः। निर्विषयतापत्तेरिति। चिण्वदित्यस्य कार्यातिदेशतयाऽनेनातिदिश्यमानकार्याणामा
सीयत्वेन तत्रेटोऽसिद्धत्वेऽतिदेशस्य निर्विषयतापत्तिरिति भावः। अङ्गस्येति। अङ्गाधिकारस्यायमित्यर्थः। सीयुण्मात्रस्यार्धधातुकत्वासंभवादाह। तथा चेति॰

म॰शा॰ उ॰ ८६

विधिलिङिति। प्रस्तुवीतेत्ययम्। तत्र हि कर्मकर्तरि नदुहेति यक् निषेधः। प्रकृते च हनादिसाहचर्येणाजन्तधातुरूपाङ्गस्यैव ग्रहणम्। एतेन यक् च्य
वधानादस्याऽप्रवृत्तौ कथं विधिलिङो व्यावर्त्यत्वमित्यपास्तम्। वलादित्वं नास्तीति। लिङः सलोप इति सलोपादिति भावः। निरपेक्षोऽयमसाविति॥
अतो नित्योऽसाविति भावः। परः। सप्तमिकः। अनित्य इति। तस्य सापेक्षत्वादिति भावः। एवञ्च कृ इतोरित्यादेरपि तत्सापेक्षत्वादनित्यत्वं बोध्यम्। नद

॥ आर्द्धधातुक इत्यनेन व्यावर्त्यं स्तु विधिलिङ्। न च तत्र वलादित्वं नास्तीति वाच्यम्। तस्येहानपेक्षणात्। यदाहुः। नित्यश्चायं।
वल्निमित्तो विघातीति। अस्यार्थः। भाविष्यत इत्यादौ भूस्य इति स्थिते परमपि वलादिलक्षणमिटं बाधित्वा चिण्वदिडे
व भवति। सत्यामपि शब्दान्तरप्राप्तौ कृतेऽकृते प्रसङ्गित्वमात्रेण भुवो वुक इव नित्यत्वाद्वलादित्वनिरपेक्षोऽयमसौ॥ परस्तु नित्यः
अस्मिन् कृते वलादित्वविघातात्। एवञ्च नित्यत्वात् स इभ्योऽप्ययमेवेड् भवति। एतेन उपदेश इति किम्। भाविष्यते। अत्र गुणावादे
शयोः कृतयोर्नस्यादिति प्रसादग्रन्थः प्रत्युक्तः। चिण्वदिटो विषयेवल्निमित्तस्याप्रवृत्तेरेवादेशस्यासंभवात्॥ गुणमा
त्रे प्रवृत्तेप्यजन्तत्वानपायात्। उपदेशग्रहणफलं तु मूल एव स्फुटीभविष्यति। चिण्वदिट इति। ननु ण्यन्तस्य धा
तोरुपदेशाभावात्कथमिह चिण्वदिट्। न च णेरुपदेशादुपदेशेऽयोऽजन्तत्वमस्त्येवेति वाच्यम्। आरितास्मारितेत्यादेः प
रत्वान्नित्यत्वाच्च रपरे गुणे कृते चिण्वदिडभावापत्तेः। न हि रान्तस्योपदेशे योजनदन्तत्वमस्तीति चेन्नैवम्॥ ६॥

राम॰ ८६

न्तत्वमस्त्येवेति। अङ्गस्य धातोर्वेति शेषः। न च ण्यल्लोपाविति पूर्वविप्रतिषेधेन गुणं बाधित्वा णिलोपप्रवृत्त्याऽस्त्विधौ स्थानिवत्त्वाभावेनोपदेशेयोऽजन्तदन्त
त्वं तु रूपपादमिति वाच्यम्। गुणात्परत्वादार्द्धधातुकस्येडित्यस्य प्राप्तानित्यत्वे न बाधित्वा चिण्वदिट एव प्रवृत्तेर्न दोष इति भावः। न हि रान्तस्येति। भूती
प्रभृतीनामपि गुणे उपदेशे योच नदन्तत्वाभावाच्चेत्यपि बोध्यम्। उपदेशग्रहणसामर्थ्यादिति। तत्सामर्थ्यादादेशद्वारापि तदन्तत्वं विवक्ष्यत इति भावः॥ ६॥

यदजन्तन्तस्येति। तदन्ताङ्गस्येत्यर्थः। उपदेशग्रहणसामर्थ्याल्लब्धरूपं विशेष्यमादाय वा तदन्तविधिः। तेन चाङ्गस्य विशेषणात्पुनस्तदन्तविधि रिति भावः। मकारान्तरमाहुः। व्यधिकरणेति। एवमन्वयेऽपि तत्सामर्थ्यादेव बोध्यः। व्यपदेशिवद्भाववदिति। तेन णिचौ जन्तत्वमिति भावः। यद्वा अ। ण्यन्तेऽङ्गमेवाङ्गावयवमवस्थेन न्यायेनेति भावः। कारितेत्यत्र तदन्ताङ्गत्वं व्यपदेशिवद्भावेन। आरितेत्यत्रोभयमपि व्यपदेशिवद्भावेन। स्मारिते त्यत्रोभयमपि मुख्यमेव। तदन्ताङ्गस्येति व्याख्यानेऽद्गतिबोध्यम्। चिण्वद्वृद्धिरिति। चिण्वद्भावप्रयोजनं वृद्धिरित्यर्थः। वृद्धिरन्यद्वृद्धिरुप।

॥ उपदेशेयोजिति व्याख्यानेऽप्युपदेशग्रहणसामर्थ्यादेव आरितेत्यादौ प्रवृत्तिस्वीकारात्। अस्तु वा उपदेशे यदजन्तन्तस्येति व्याख्यानम्। अङ्गस्येति व्यधिकरणषष्ठी। अङ्गावयवस्याजन्तस्येति। कारिष्यत इत्यादौ च व्यपदेशिवद्भावः सर्वथापि णिज। न्ते चिण्वद्भावोऽस्त्येव। तदाहुः। चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति। इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चा यं वल्निमित्तो विघातीति। यत्तु ण्यन्तत्वेनाजन्तत्वाच्चि ण्वदिडिति प्राचां ग्रन्थं व्याचक्षाणैरुक्तम्। ण्यन्तत्वात्तत्तरम्। तदुपदेशावस्था। यां भवत्ययमजन्त इति। तन्न्यायविरुद्धम्। स्वोक्तिविरुद्धं च। उपदेशो हि साक्षादुच्चारणं तच्च ण्यन्तस्य न दस्ति। किंच। धात्वादेः षः स इत्य त्र सुब्धातोः प्रतिषेधमुक्त्वा उपदेशग्रहणबलेन तत्प्रत्याख्यानमाकरे स्थितम्। स्वयमपि तत्र तथैवोक्तम्। तदिदानीं विरुद्धेनेति दि। क्। आतो युक्। चिण्कृतोः किम्। चौडिः। बालाकिः। बाह्वादित्वादिञ्। ददौ। अदायि याना मिति। स्याद्योरित्येतन्नाधित्वापरत्वाच्चि ॥ एवदिटि हन्तेऽझलादित्वात्पुनर्नेत्यादि॥

घाद्वृद्धिश्च। दीर्घश्चोक्त इति। शामिता शमितेत्यादौ। अत्र दीर्घे चिण्वत्त्वं तत्रासिद्धमाभीयासिद्धत्वस्यानित्यत्वात्। इ ट्चेति। स च प्रयोजनमित्यर्थः। हशधातौ चिण्वत्सन्नियोगशिष्टेट् प्रवृत्तिरेव चिण्वत्त्वप्रयोजनमित्यर्थः। चादिट् च इत्यत्रोपस्थितत्वादिडेव गृह्यते। एवं च णिलोपमात्रेऽयमसिद्धो नान्यत्र। अत एव तत्सूत्र प्रत्याख्याने चेन णिलोपः साधितो भाष्येऽद्गति बोध्यम्। चौडिरिति। न चाचामादेरित्यनुवृत्त्या निस्तारः। इतरिद्वायकेदोषापत्तेः। ददाविति। औत्वन्तूत्तमेणित्त्वाभावपक्षे चरितार्थमिति भावः। अजझलादित्वादिति। इको झलित्यनस्तदनुवृत्तेरिति भावः॥

॥ अनुवृत्तावप्याह। सत्यपीति। विशेषइति भावइति। वाक्यार्थबोधकाले बाधकाऽभावेनहन्तेरपि सीयुटा संबन्धे न तस्य निरवकाशत्वा द्वा-
ध्य संस्कारवेलोपस्थितवधबाधः। सीयुट्तु तदऽविषये चरितार्थइतिभावः। व्याख्यातइति। निरवकाशत्वरूपस्य बाधबीजस्याभावादितिभावः।

॥ सत्यपि तस्मिन्नेह काचित्क्षतिः। अनिर्लक्षणयाहन्त्यारूपनिष्पत्तेः। आशीर्लिङीति। ननु लुङि तत्रोभयोरपि वैकल्पिकतया
येनना प्राप्तिन्यायाभावादितिभावः। विशेषविहितत्वादिति। लिङीति हि पदद्वयसाधारणम्। सीयुट्त्वात्मनेपदस्यैवेति वि
शेषइतिभावः। एतेनस्यसिच्सूत्रे प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भावइति कैयटग्रन्थो व्याख्यातः। यत्तु तत्र नारायणेनो
क्तम्। अत्र यद्यपि वधादेशोपि प्रतिपदविधिस्तथापि विप्रतिषेधाच्चिण्वद्भावइत्याशयइति। यच्च तत्परिष्कारार्थं प्राचो ग्रन्थं
व्याचक्षाणेरुक्तम्। यद्यपि परादप्यन्तरङ्गं बलीयस्तथापि परशब्दस्येष्टवाचित्वाच्चिण्वद्भावेन व्यवस्थेति तस्याप्याशयइति
तदेतत्सर्वं कैय्यटग्रन्थापर्यालोचनमूलकमिति मूलएव ध्वनितम्। पक्षे वधिषीष्टेति। इह प्राचा पक्षे वधादेशइत्युक्तं तत्
त्सम्यगेव यत्तु तत्र तत्पौत्रेणोक्तं वधादेशइति परमतम्। स्वमते तु वधादेशोत्र न भवत्येव। तथाचोक्तं महाभाष्ये। चिण्वद्भावे
कृते पुनः प्रसङ्गाद्वधभावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा। हनिणिङादेशप्रतिषेध
श्चेति। तदेतद्भाष्यार्थानवबोधविजृम्भितम्। लिङीतिपरसप्तमीम्। स्यसिच्सूत्रे आर्द्धधातुकइत्यस्यासंबन्धञ्च प्रौढिवादेन स्वीकृ
त्य प्रवृत्तं वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति वार्त्तिकं व्याचक्षाणेन भाष्यकृता चिण्वद्भावपक्षे खलु वधादेशाभावउक्तः॥

ग्रन्थार्थेति। निरवकाशत्वरूपेत्यर्थः। परसप्तमीमिति। विषयसप्तम्यामन्तरङ्गत्वेन विप्रतिषेधायोगाइतिभावः। इत्यस्यासंबन्धे चेति। तत्संबन्धे हि सीयुटस्या
त्मनेपदस्य विशेषविहितत्वाच्चिण्वत्त्वस्यापवादत्वेनाऽयुक्तो विप्रतिषेधइतिभावः॥ ॥

रूपाऽऽनन्यस्येति। एतत्सुष्ठुपास्य इत्यत्रोपपादितम्। अष्टत्रिंशत्संख्या सर्वथा दुरुपपादैवेत्याह। अष्टत्रिंशदिति। घटादिरिति। घटादावनूदि। तइत्यर्थः। कैयटग्रन्थे इति। अत्रारुचिबीजं तु ऊकालोच् कर्मणि ङितिसूत्रभाष्यप्रामाण्येन घटादावस्य पाठोऽसांप्रदायिक इत्यन्यत्र निः।

ननु चिण्वद्भावविरहेपि। तत्कथं स्यसिच्सूत्रारूढमपि विकल्पं विस्मृत्य मुद्धमपि मूलमशुद्धीक्रियते। यदपि हनि णिङ्गं देशे त्याद्युक्तम्। तदपि न। अनाङ्ःसाप्यनिर्देशे प्राप्तेवार्तिककृता घानिष्यते इत्यादौ तदुक्तेः भाष्यकृता अङ्गाधिकारबलेन तत्समाधानाच्च। नचलिङि लुङि चसाक्षाद्दृष्टिमृस्य वधेरनिर्देशाये क्षाणि। उदाहृतञ्चात्र वधादेशः भाष्यकारप्रभृतिमाधवान्तैस्सर्वैरेवेति दिक्। अहसातामिति। चिण्वदिटोऽभावे हनः सिजिनिकित्वादनुदात्तोपदेशेत्यनुनासिकलोपः। चतुर्भिरधिकं शतमिति। यत्तु धमलोपोवास्य इति केचिदिति पुनर्द्वित्वमिति चाप्रामाणिकद्वयं सञ्चार्यलोपविकल्पादिप्रपञ्चेनेह अष्टत्रिंशद्रूपाणि भवन्तीति वदन्ति। तत्रोक्तिसंभवं न पश्यामः। पुनर्द्वित्वे रूपानन्यस्य दुर्वारत्वात्। अष्टत्रिंशद्व्याख्यायाएव पुरस्कारे मूलाभावाच्चेत्यास्तां तावत्। अवश्येति। तदपि पूर्वत्रासिद्धमिति सूत्रसिद्धार्थकथनमित्युक्तं न विस्मर्तव्यम्। अस्मिन्निष्कृष्टपक्षे चिण्णमुलोरिति सूत्रे दीर्घग्रहणं कर्तव्यमेव। तथाहि। हेड अनादरे घटादिः। एचइक्। हिडयति। अत्र चिण्णमुलोः कृतयोर्ह्रस्वविकल्पमते।। अहिडि। अहेडी। तिस्यात्। दीर्घस्तु। अहिडि। अहीडि इति भवति। एतच्च चिण्णमुलोरिति सूत्रे कैयटग्रन्थे कर्मणि ङितिसूत्रे हरदत्तग्रन्थे च स्पष्टम्। दीर्घो नास्तीति। यङोऽद्त्रोपस्य स्थानिवत्त्वेन णिच्यरत्वाभावादुपधावृद्धेरप्रवृत्तेरिति भावः। नोदात्तो। कथन्तर्हि हरेर्यदङ्क्ता मिपदैकके नखमिति श्रीहर्षः। प्रमादएवायम्। यदिसमाधेयमेवेत्याग्रहस्तर्हि निहतमेषणात्माक्तनेर्थे णिचि तनतम्बि ण्वोद्व्यः।।

रूपितम्। यङोद्त्रोपस्येति। यङ् लुकि दीर्घो भवत्येव। नहि यङ् यङ् लुकोरर्थे स रेवा विशेष इति भाष्ययोर्नविरोध इति भावः॥ ८०७ ॥

म·श· ॥ सञ्ज्ञापूर्वकेति॥ घञर्थे के साधुरित्यन्ये॥ ॥ इति भावकर्मप्रक्रिया॥ ॥ फलांशेति।व्यापारसमानाधिकरणफलांशेत्यर्थः॥
उ· ॥ किंतु कर्तृत्वमेवेति। कर्तृत्वाप्राप्तेः॥ परत्वाच्चेति भावः। कर्मस्थाक्रियेति। क्रियायाः कर्मणा साधनेन तुल्यत्वासंभवादिति भावः। लकारे॥
८८

कथमुद्यम उपरम इति। सञ्ज्ञापूर्वकविधेरनित्यत्वात्। तथा च निर्दिश्यते। अड उद्यमने। यम उपरमे इति। अथ येद्विकर्मकास्तेषु कृत्यक्तखलर्थाः। किम्मुख्ये कर्मणि उत गौणे किं वोभयोरिति सन्देहे व्यवस्थामाह। द्विकर्मकाणामिति॥ ॥इति भावकर्मप्रक्रिया॥ ॥ प्राक्सकर्मका अपीति फलावच्छिन्नव्यापारपरत्वे हि देवदत्तादिनिष्ठव्यापारव्यधिकरणविक्लित्ति द्विधाभवनन्यग्भवनादिफलाश्रयाणामोदनादीनां कर्मत्वमुचितम्। कर्तुरीप्सिततमत्वात्। व्यापारांशपरित्यागेन फलांशमात्रपरत्वे तु पच भिदि रुहामपि राद्धि द्विधाभवति न्यग्भवतीत्यादिविवरणविषयीभूतानां राद्ध्यत्यादिवदेवाकर्मकता। तद्वस्थामवस्थायामोदनादेः कर्मत्वं संभवति किंतु कर्तृत्वमेव स्वतन्त्रः कर्तेति लक्षणात्। एतच्च गुणेरणाविति सूत्र एव प्रपञ्चितम्। स्यादेतत्। द्विकर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि अपरेण सकर्मकत्वमस्त्येव। स्वयं प्रदुग्धे स्वगुणेरुपस्नुता वसूपमानस्य वसूनि मेदिनीत्यादौ यथेति चेत्। सत्यम् अकर्मकाणामेवाकर्मकतया उच्यमानत्वान्न दोषः। तदेतत् ध्वनयति। प्रायेणेति। अकर्मकत्वमुत्पादनस्य फलमाह। तेभ्यो भाव इति। भावे चाकर्मकेभ्य इत्युक्तेरिति भावः। कर्मवत्। कर्मशब्देन कर्मस्था क्रिया लक्ष्यते तेनदाह। कर्मस्थयेति। लकारवाच्य इति। लकारेणोपस्थापित इत्यर्थः। द्विलकारादिति। अयं भावः। व्यत्ययो बहुलं छिङ्गाशिष्यङिति संहितया पाठे परसवर्णविधिलब्धलकारोपरि लद्वयं न व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषोस्तीति भाष्योक्तेः। य सम· ८८

पोति। लस्यानिकादेशेनेत्यर्थः। लद्वयाश्रवणादाह। न व्यञ्जनयेति॥ ॥ ८९० ॥ (हाम्लुप्तनिर्दिष्टोल्लकारः। लोपस्तु संयोगान्तस्येति॥ ॥

॥ पश्चान्तरेण। यणः प्रतिषेधो वाच्य इति वार्त्तिकादिपक्षेणेत्यर्थः। तदुपस्थाप्यत्वम्। तत्स्थानिकादेशोपस्थाप्यत्वम्। कर्त्तेति पदलाभोपायमाह ॥
कर्त्तरीति। कर्तृस्थतेत्यर्थ इति। यथा दर्शनारोहणाभ्यां। विषयेनत्यभूते। च विशेषानुपलम्भात्कर्तृस्थतेति भावः। अन्येषामित्यस्या न्येषां मत इत्य

॥ पक्षान्तरे तु हस्तेयमामिति। तच्चलग्रहणमिहानुवर्त्तनं पक्षा विपरिणम्यते तेनाभिमतार्थलाभ इति। करणाधिकरणाभ्यामिति।
नन्विह करणत्वाद्यवस्थायां वस्तुतः सत्त्वपि अस्मिस्या स्योर्व्यापारो धातुनानोपात्त इति चेत्किन्ततः। नह्येतस्मिन्सूत्रे साहश्य प्रतियो
गिभूता क्रिया धातूपात्तत्वेन विशेषिता। एवञ्चासति कर्मणोत्यस्मिन्स्यादेवाति प्रसङ्ग इति भावः। अधिगच्छतीत्यादि। श्लोकस्यो
त्तरार्द्धं तु यत्क्वपा वशतस्त्वस्मिन्नमाम्नु गुरवे सदेति बोध्यम्। स्यादेतत्। पचादीनां ङ्म्यादीनां च फलाभिधायित्वे फलस्य च कर्मनिष्ठ
त्वे तुल्ये कथं कर्मवद्भावप्रवृत्त्यप्रवृत्ति व्यवस्था। तत्राह। यत्र कर्मणीति। उक्तञ्च हरिणा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। अन्येषां धातूनां शब्दैः क्रियाव्यवस्था। शब्देन कर्त्तृव्यापारस्यैव प्राधान्येनाव
गमात्कर्तृस्थतेत्यर्थः। उद्देश्यतापि क्वचित्कर्मस्थांशस्य क्वचित्तु व्यापारांशस्येति सापि नियामिका। तथाहि। दर्शनारोहणाभ्यां।
विषयेनत्यभूते च विशेषानुपलम्भात्कर्तृस्थता। उद्देश्यानुरोधाच्च। अहं पश्येयमिति ह्युद्देशो न त्वयं विषयो भवत्विति। एवमहमु
परिगच्छेयमित्युद्देशो न तु हस्तिनोन्यस्मा वा भवत्विति। उपरिगमनरूपस्य व्यापारविशेषो रुहेरर्थो न तु न्यग्भावनमात्रम्। भू
मिष्ठस्य स्पृशांसं हस्ताभ्यामवनमयत्यपि देवदत्ते आरोहतीत्यप्रयोगात्। अत एव हि यद्धि तु परं छन्दसीत्यत्र भाष्यम्॥

र्थमभिप्रेत्याह। उद्देश्यतापीति। यत्र धातोर्यन्निष्ठांश उद्देश्यः स तत्स्थक्रिय इत्यर्थः। उपरिगमनेनेति। आङ्पूर्वस्य रुहेर्गत्यर्थत्वादिति भावः ॥

दिङ्मात्रमिति। अजां ग्रामं नयतीत्येवोदाहरणमित्यभिमानः। यत्तत इति वदन्ति। नचयत्र कर्माकाङ्क्षा स सकर्मक इति युक्तम्। शब्दस्वभावकल्पनापे
क्षयार्थकल्पनस्य युक्तत्वात्। किंच गच्छतीत्यादौ नाम कर्मकृतापत्तिः। तत्र हि केत्येवाकाङ्क्षानुत्कमिति अनुभवसिद्धमिति दिक्। यद्यपीहेति।
रुहिर्गत्यर्थ इति। अत एव चाणौ कर्तुर्णौ कर्मत्वम्। पचिच्छिद्योस्तु विक्लित्तिद्विधाभवनरूपो विशेषः कर्मणि दृष्टस्तदुद्देशेनैव।
चकारकव्यापार इति महद्वैषम्यम्। एवंच्चारुह्यते हस्तीति कर्मवद्भावं प्रदर्शयन्तो भाष्यन्यायविरोधादुपेक्ष्या इति कैयटः।
हरदत्तादयोऽप्येवम्। नन्वेवमिहैव सूत्रे सकर्मकाणां प्रतिषेधोऽन्योन्यमाश्लिष्यत इति भाष्यवार्तिकग्रन्थः संयोगरूपफला
स्य कर्मस्थत्वात्प्राप्तिरिति कैयटादिग्रन्थश्च विरुध्यते। रुहिगमिभ्यां सह श्लिषेर्वैषम्यस्य दुरुपपादत्वात्संयोगाख्यफलस्य स
र्वत्र तुल्यत्वादिति चेत्सत्यम्। उदाहरणदिङ्मात्रं न तु न तत्स्थितोदाहरणमिति तत्त्वम्। स्यादेतत्। ज्ञानेच्छयोरिव यत्नस्या
पि कर्तृस्थत्वान्न द्वाविति नः करोतेरपि कर्तॄन कर्मवत्स्यादित्याशङ्क्य करोतेर्यत्नार्थत्वमेव नास्तीत्याह। करोतिरिति। एतच्च भू
वादिसूत्रे भाष्ये स्पष्टम्। नैतदित्युपलक्षणम्। सकर्मकत्वेवताव त्तस्याद्यतन इति वदन्ति बोध्यम्। एतेनेति। ज्ञानस्य कर्तृस्थ
त्वमुत्पादनेनेत्यर्थः। अनुव्यवस्यमान इति। खण्डनकारप्रयोगः। सकर्मकाणां इति। एतेन सृजस्यात्मानमात्मनेति व्याख्या
तम्। तथाहि। आत्मानमात्मनावेत्सीत्यस्य कर्तृस्थभावकत्वेऽपि सृजसीत्यंशे प्रकृतवार्तिकेनैव निर्वाहः। सृजेः कर्मस्थफलकत्वा
त्। अन्योन्यमिति। स्यादेतत्। यद्यपीह संयोगानुकूलक्रिया कर्मत्वकर्तृत्वोपयोगिनी उभयनिष्ठा च तथापि व्यक्तिभेदोऽस्त्येव। अत एवा
न्यनिष्ठामन्यन्यस्य कर्मत्वम्। अन्यथा उभयोरपि कर्तृत्वमेव स्यान्न तु कर्मत्वम्। इमौ गाङ्गौ स्पृशत इत्यत्र यथा। एवं स्थिते कर्मत्वोपयो
तत्र संयोगः कर्मत्वोपयोगी इतरांशः कर्तृत्वोपयोगीति बोध्यम्। कर्तृत्वमेव स्यादिति। परत्वादित्यादि॥ गिनी या क्रिया न या तुल्यक्रियस्य॥
भेदे तत्र न्यनिष्ठामन्यन्यस्य कर्मत्वमुपपन्नमिति भावः। एवं स्थिते। संयोगस्य कर्मत्वोपयोगित्वेन तदनुकूलव्यापारस्य च कर्तृत्वोपयोगित्वे स्थिते॥

तदीयकर्तुः। कर्मस्थक्रियायाः कर्तुः। इह। कर्तृस्थक्रिया कर्त्तरि। अवस्थाविशेषेति। पच्यमानत्वावस्थातत्प्रागवस्थादिरूपेत्यर्थः। नप्राप्नोत्येवेति। स्पृश।
निगमिवत्। कर्तृस्थक्रियत्वात् दप्राप्तिरित्यपि बोध्यम्। एवं सृजसीति। उक्तरीत्या दोषाभावादिति भावः। किंचात्रोत्पत्तिरूपफलाश्रयत्वं तज्जनकक्रि।

कृ२

तदीयकर्तुर्विधीयमानः। कर्मवद्भावइह नप्राप्नोत्येव। एवं सृजस्यात्मानमात्मनेत्यत्रापि। तत्किं वार्त्तिकारम्भेणेत्याशङ्क्योदाहरणान्तर
माह। अजेति। नयते। द्विकर्मकतया अजारूपस्य कर्मणः कर्तृत्वेन विवक्षायामपि ग्रामरूपेण कर्मणा सकर्मत्वात्तातिदेश इति भावः। स्या
देतत्। कर्मवत्कर्मणेति सूत्रमेव मास्तु नन्वरं वार्त्तिकम्। प्रयोगास्तु सर्वेपि प्रकारान्तरेण व्याख्यास्यन्ते। तद्यथा। एकस्यापि वस्तुनोवस्था
विशेषादिविशिष्टत्वाविशिष्टत्वाभ्यामौपाधिकभेदमाश्रित्य कर्मत्वं कर्तृत्वञ्च औपदेशिकमेव सिद्धान्तेपि क्वचित्स्वीक्रियते। आत्मानमात्म।
नावेत्ति सृजस्यात्मानमात्मनेति। एवं पच्यते ओदन इत्यत्रापि मुख्ये कर्मण्येव प्रत्ययोस्तु मास्तु च निवृत्तप्रेषणता। स्वयमित्यस्यात्मनेत्य
र्थात्। एवञ्च स्थाली पचतीत्यत्राधिकरणइवत्क्त्वन्त्र एव धात्वर्थः कर्मण्यपि लभ्यत इत्यपरमनुकूलम्। कथन्तर्हि पच्यते ओदने।
नेनेति भावे लकार इति चेत्। माभूद्भावे कर्मण्येव प्रत्ययोस्तु। कर्म चात्मैव। न चैवं भेत्तव्यं कुसूलेन भिन्नमीषद्भेदमिति भावे कृत्या।
स्योनस्युः कर्मणि चेदात्मेति विशेष्यानुरोधेन पुंस्त्वं स्यादिति वाच्यम्। सामान्येन नपुंसकसंभवात्। स्वरूपमित्यस्य विशेष्यसंभवाच्च आ
त्मेति विवक्षायान्तु पुंल्लिङ्गतायामुक्तविवक्षया सूत्रपक्षेपि दुर्वारत्वाच्च। अत्रोच्यते। कर्मवत्सूत्रं प्रत्याचक्षाणेन तदुहस्नुःनमामिति प्रतिषे
धआरम्भो न वा। आद्ये। शुद्धकर्मैवास्य विषयः स्यात्। ततो दुह्यते गौर्गोपालेनेत्यादि न सिद्ध्येत्। दुग्धे गोपालेनेत्यादि च स्यात्॥

पाश्रयत्वयोर्युग
पदेकत्रविरुद्धतयोपाधिभेदेन भेदस्यावश्यवाच्यतया मुख्ये कर्तर्येवात्र प्रत्ययो न तु कर्मकर्तरीत्यपि बोध्यम्। नयतेरिति। अजानिष्ठांशस्योद्देश्यत्वात्कर्म
स्थक्रियोयमिति भावः। सृजस्यात्मानमिति। स्थूलोपाधिविशिष्टस्य कर्मत्वं सूक्ष्मोपाधिकस्य कर्तृत्वमत्रेत्यर्थः। क्लन्त्रः। विक्लेदनान्तः। उक्तविवक्षया। औपा

प्र.श. येन चिण्वदिट इति। दुहस्नुनमां न्तजन्ना विन्येव सिद्धे यक्क्रिणा चित्त्वस्यैव यथ्यापने ग्रेत्यपि बोध्यम्। ध्वनितश्चेदमाईधातुके इति सूत्रे पाष्ठे भाष्ये तत्रा
उ. न्यकैयटस्तु प्रसादः तस्मिन् कर्त्तव्य इति। निषेधे कर्त्तव्य इत्यर्थः। कर्तृचिण् ग्रहणयोरिति। मिलितयोरित्यर्थः। चिण्ग्रहणसामर्थ्यात्तु सूपपादमेवेति
९०

द्वितीये तु नमते दण्ड इत्यादिनस्यात्। कर्मणि यक् प्रसङ्गात्। कर्त्तरि तङो दुर्लभत्वात्। किंचाचः कर्मकर्त्तरीति चिण्विकल्पो निर्विषयस्स
वस्यात्। कर्मवदित्यतिदेशस्य विषयीभूतः कर्ताहि कर्मकर्त्ता। नचासौ तत्र वास्ति। त्वद्रीत्यात्मना त्माज्ञायीत्यत्रापि चिण्विकल्पापत्तेश्चान
नु निष्टत्त प्रेषणा नामा श्रित्य भूतपूर्वकर्मणि सांप्रतिके कर्त्तरि चिण्विकल्पं ब्रूम इति चेत्। तर्हि तत्रैव यथायथं लडादिं बादयः स्युः यक्कनस्या पुश
दिति कर्मवत्सूत्रमवश्यारभ्यमेवेति दिक्। सृजियु। श्यनोनित्वञ्चित्यादिर्नित्यमिति स्वरार्थे॥ यकि तु लसार्वधातुकानुदात्तत्वकृत्तेयकउ
दात्तत्वं श्रूयेत। यत्तु प्राचा श्वद्धावत्कर्तृकात्सृजेर्यक्क्रिणौ कर्त्तरीति केचिदित्युक्तं तत्र यगित्यशुद्धं आत्मनेपदानुक्तेश्च न्यूनतेति दिक्। भूषाक
र्मेति। यत्तु प्राचा कमृ श्रिञ् भूषार्थेभ्यः सन्नन्ताश्च यक्क्रिणौ नेत्युक्तं तत्र कृग्रह इति न्यूनम्। किरादीनां सर्वेषां ग्राह्यत्वात्। एतच्चाद्रियते। आदृतइ
त्युदाहरणाभ्यां सूत्रे ध्वनितम्। यदपि चिण्वदिडपि नेति केचिदित्युक्तं तत्र केचिदित्यंशोनुचितः। उक्तार्थस्य भाष्यवार्त्तिकारूढत्वात्। प्रास्ताविषे
इति। चिण्वदिट्। यत्तु प्राचा न दुहेति चिण्वदिटोपि निषेधं मन्वानेनोक्तं न निषेध इति केचिदिति। तन्न। चिण्वदितिहि चिणीव कार्यमतिदिश्यते।
नच चिणेनत्युत्पत्तिसतिदेशोनिषेद्धुं शक्यते येन न चिण्वदिटो निषेधः स्यात्। एवं निषेधाभावस्य न्याय्यत्वे सर्वसम्मते त्वच केचिदित्युक्तेरनुचितत्वात्। य
त्तु वदन्ति। चिणि निषेधस्य चिणि परे विहितत्वाभावात्तस्मिन्कर्त्तव्ये नास्त्यतिदेश इति। तदतिरभसात्। अतिदेशो न निषिध्यत इति वक्तव्ये निषेधो
नातिदिश्यत इत्युक्तेरनुचितत्वात्। अचीकरतेति। चिणि प्रतिषिद्धे णिश्रीति चङ्। यत्तु प्राचा कर्मकर्त्तरि चङ् नेत्युक्त्वा ऽकारयिष्टेत्युदाहृतं तन्

बोध्यम्। तत्रैव वर्णितत्वादिति। चिण्निषेधस्य विधाः कार्यत्वेनातिदेशेपि चिण्वदिटो भावः कथमिति चिन्त्यमित्यपि बोध्यमिति कश्चित्। नेनीति। नयगि सम. ९०

॥ तस्मिन्नेव विषये इति। तेनकर्त्तोऽहकुष्णानाः पादा इत्यत्र ताच्छीलिके चानशि श्यनेवलवाच्यस्यैव कर्त्तुः कर्मवद्भावेनयको विषयत्वाभावादि।

यत्नुपरिष्कुर्वन्ति॥ चङ्विधौ कर्त्तरीति न कर्त्तव्यं सामान्येन चङ् विधीयतनाम्। तस्य भाव कर्मणोः परत्वाच्चिण्बाधको भविष्यति। किं
च। चिण्णेपद इत्यतः चि णिनिवर्त्तमाने पुनश्चिण ग्रहणं बाधकबाधनार्थम्। तथा च कर्त्तृचिण ग्रहणसामर्थ्यात्। चिणेवात्र भाव्यं
न तु चङ्। इत्यादि। तदत्यन्तरभसात्। चिण्निषेधस्यैव प्रक्रान्तत्वेन चिणेवात्र भाव्यमित्युक्तेर्व्याहतत्वात्। किंच। कर्त्तरीति मास्त्वित्यसङ्ग
तमेव। कर्मणि तत्शब्दभिन्नेष्वतिप्रसक्तेः। नहि तत्रापि चिणस्ति। यश्चङ् बाधेत। एवञ्च कर्त्तृचिण ग्रहणयोः सामर्थ्योपवर्णनमपि कथमुक्ति
संभवं लभतामित्यास्तान्तावत्। चिण्वदिटो निषेध इति माचो भ्रमंस्तएयति। स्यादेवेति। यत्नुपरिष्कुर्वन्ति। स्यसिच्सूत्रे चिण्वदितितु ती
ना यादेतेर्विज्ञानाच्चिण्निषेधोपि चिणः कार्यमित्यतिदिश्यत इति। तत्रासत्त्यन्ता देव वतिरि निति त्रैव वर्णितत्वात्। आत्मनेपदविधौ योक
र्मकस्तमुदाहरति। विकुर्वते नसैन्धवाइति। कुषि। नद्दहे निसूत्रान्नेत्यनुवर्त्तते नदाह। नयगिति। किन्त्विति। तस्मिन्नेव विषये इति भावः। अ
नुवृत्तेः फलमाह। यग विषयेत्विति। प्रसक्तिपूर्वको हि निषेधः यत्र तु यको न प्रसक्तिस्तत्र न निषेधः। नापि श्यन्। नापितस्मिन्नि
योग शिष्टं परस्मैपदमित्यर्थः। तेन लिङाशीर्लिङोः स्यादीनाञ्च विषये नेदं सूत्रं प्रवर्त्तत इति फलितम्। श्यन्नू यको र्नुमि विशेषः। कु
ष्णीजङ्घ। नित्यंतुमस्वरे विशेषोप्युक्त एव। अत्रेदमवधेयम्। कर्मकर्त्तरि कृन्तिकारादिभिः प्रायेण स्वयमेवेति प्रयुज्यते न तद विवक्षि
तम्। आत्मनाकरणेनेति वा व्याख्येयम्। न तु कर्त्त्रेति। तथा सति कर्मण्येव लः स्यात्। स्पष्टं श्चेदं कैयटादौ॥ इति कर्मकर्त्तृप्रक्रिया॥ ९

ति भावः कैयटेति। णेरणाविति सूत्रस्येत्यादिः॥ ॥ इतिकर्मकर्त्तृप्रक्रिया॥ ॥

वाक्यार्थ इति। गोकुले वत्स्याम इति वाक्यार्थो वासक्रियेत्यर्थः। क्रियायां विशेषणमिति। संबोधनविभक्त्यन्तत्वादिति भावः। परिचाय्यमिति। ज्ञाप्यमित्यर्थः। चाय्पूधातो रूपमिदम्। कलिङ्गानामिति। बहुवचनान्तपाठः। वर्णयन्तीति। हरदत्तादय इति शेषः। तत्कथमिति। न च वासरूपन्याये

अभिज्ञा। अभिज्ञा स्मृतिः साऽभिधीयते बोध्यतेऽनेनेति विग्रहः। तदाह। स्मृतिबोधिनीति। स्मरसीत्यत्र वाक्यार्थः कर्म पश्य मृगो धावतीतिवत्। कृष्णेति क्रियाया विशेषणम्। गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासकर्मकं कृष्णसंबोध्यकं स्मरणमिति फलितोऽर्थः। वासो लक्षणमिति। प्रसिद्धत्वात्। चारणं लक्ष्यमिति। सहसा वृक्षनारोहात्परिचार्यमित्यर्थः। अत्यन्तापह्नव इति। अपह्नवोऽपलापः। नाहमित्यादि। कलिङ्गो नाम जुगुप्सितो देशः। तत्र प्रविश्य त्वया चिरं स्थितमिति कश्चिदुक्तः। स त्वाह। नाहं कलिङ्गान् जगामेति। न केवलमवस्थानमेव निषिध्यते किं तर्हि तद्धेतुभूतं गमनमपीत्यत्यन्तापह्नवः। यदा तु गमनमेवाभियुक्तस्तदेवालपति न तदात्यन्तापह्नव इति लडेव भवति। प्रष्टव्यः प्रश्न इति। कर्मणि तङ्। आसन्नेति पंचवर्षाभ्यन्तरमासन्नकालम्। पञ्चवर्षातीतं तु विप्रकृष्टकालमिति वर्णयन्ति। ननौ। पृष्टप्रतिवचनमिति विग्रहः। यावत्पुरानिपातयोर्लट्। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थं निपातग्रहणम्। भुवश्चेत्यत्र महाव्याप्त्यैति ग्रहणमप्येवमेव। तत्रान्यतरस्याम् शक्यमकर्तुम्। विभाषा। ननु कर्हिशब्दोऽयमनद्यतनविषयः। अनद्यतने र्हिलित्यनन्तरस्यामिति किमो र्हिल्प्रत्ययात्। तेनानद्यतनयोगे लुटैव भाव्यं न तु लटा। तत्कथमुदाह्रियते कर्हि भोक्ष्यत इति। अत्राहुः। भविष्यत्सामान्ये भोक्ष्यत इति प्रत्याय्यकर्हिशब्देन संबध्यत इति ॥ ॥

न सोऽपि सारूप्यात्। अनुबन्धकृतवैरूप्यस्याग्रहणात्। आदेशकृतासारूप्यमादाय वासरूपाप्रवृत्तेश्च। अत एव हशश्वतोर्लङ् चेति लिट्समावेशार्थश्चकारः सार्थक इति भावः। भविष्यत्सामान्य इति। इदं भविष्यति गम्यादय इति सूत्रे भाष्ये स्पष्टम्। बाहुलकात् श्वः पदयोगे लृडिति कृत्यल्युट इति सूत्रे

उत्तरमपि। योगत्रयमिति। अपिनालिङ् चोर्ध्वमौहूर्तिक इति चतुर्थस्यापिग्रहणम्। नचतद्विषये नद्यतनत्वासंभवः। आगामिन्यारात्रेः पूर्वार्द्ध
स्यचरममुहूर्तादुपरितनकालस्यतत्त्वसंभवात्। अतएवतत्र त्रोदाहरणे आगन्तावेतिवस्यतीति बोध्यम्। पूर्वेणेति। लिप्स्यमानसिद्धौ लिप्सा

भोक्तेति। ननुभविष्यत्सामान्ये योलङ् विहितः। सोनद्यतनेलुटाबाध्येत। तत्कथंविकल्पोदाहृतिः। अत्राहुः। अनद्यतनेलुडित्यत्रा
यं योगोनुवर्त्ततेतेनलुड्विषयेपिपक्षेलट्। एवमुत्तरमपियोगत्रयन्तत्रानुवर्त्ततेतेनननद्विषयेपिलुट्पाक्षिकएवनतुबाधकः। लिप्स्य
। पूर्वेणसिद्धेसत्यकिं द्वेनार्थमिदमितिध्वनयन्नुदाहरति। योन्नमिति। वर्त्तमा। येनोपाधिनेति। तथाहि। पूङ्यजोःशानन् विहि।
तः सताभ्यामेवनतुधात्वन्तरात्। नच्छीलादिविशिष्टेकर्त्तरि अलंपूर्वात्कृञइष्णुजुक्तः सोपिनस्मिन्नुपाधौसम्भवेत्यादि कदा आ।
गतोसीति। भूतकालेनप्रश्नवाक्यमुदाहरणेभूतकालाभिव्यक्तये। एवंकदागमिष्यसीत्यत्राप्यूह्यम्। उदाहरणयोरयमेवइतिपदा
भ्यामागमनाविनाभूतंयद्रूपंप्रस्वेदपरिकरबन्धादियुक्तत्वन्तन्निर्दिश्यते। इदानीमागमनमितिध्वनयितुन्तेनकदेतिप्रश्न
प्रत्यार्थिकमुत्तरंसङ्गच्छते। सामीप्यञ्चद्योतितंभवति। आरोपेणोपपत्तिमाश्रित्यप्रत्याख्यानमिदमाकरे। क्षिप्रवावच
नग्रहणंस्वरूपस्यैवग्रहणंमाभूदित्येवमर्थम्। तदाह। क्षिप्रपर्यायइति। भूतेच अस्योदाहरणानि। उताप्योरित्यतःप्रभृति।
बोध्यानि। ततः प्राचीनेषूत्तरसूत्रेणविकल्पोक्तेः। किङ्कि़ला। अस्तिभवतीति। तत्त्वकर्मकंभृद्धौगमनमसीत्यादि जातुयदोः अनव
कॢप्त्यमर्षयोरितिलिङ् लृङोः सिद्धौवचनमिदंलृटोबाधनार्थन्तदाह। लृटोपवाद इति ॥

स्यर्थः
मिति। एतेनकदेतिप्रश्नेइदानीमित्युचितम्। किंचगमनस्यभूतत्वादयमेघइत्यप्ययुक्तमित्यपास्तम्। प्रत्याख्यानमाकरेइति। भूतत्वप्रकारकबोधे।
त्वनभिधानमितितदाशयः। वचनमिति। लिङ्विधायकमित्यर्थः। बाधनमत्रनिवृत्तिः॥ २ ॥

१ याअपिसंभवादितिभावः। आर्थिकमुत्तर।

म॰श॰ उ॰ ९२

प्रथमयेति। आवर्तस्त्यादिः देवत्रातइति। इदंशब्दोरिति सूत्रे भाष्यस्पष्टम्। सूत्रंमास्त्विति। अकच्चिनीत्यत्रैवकार्यम्। यद्वा इष्टमस्यार्थककच्चिद्यो
गेइच्छार्थोपपदासंभवएवेति ननत्स्योपयोगः। कच्चिज्जीवतीत्युक्ते जीवनंप्रष्टुरिष्टमिति प्रतीयतेनत्वस्येच्छार्थत्वमितिभावः। इत्येवोच्यतामिति।
चेनलिङ् भविष्यतीतिभावः। अनुकर्षप्रसङ्गादिति। नस्याभावेह्यस्यसूत्रस्यप्रत्यासत्त्यायत्रशब्देनकामप्रवेदनावगतिस्तत्रैवप्रवृत्तिः स्यादिति।

संभावनेऽल। संभावनमिति प्रथमयासप्तम्यंतंविपरिणम्यते। अलमितिचसप्तम्येतिसंबन्धः। एतच्चगौरवंसिद्धस्यगतिश्चिन्तनीये
तिन्यायेनाश्रीयते। अलमितिसंभावनेसिद्धाप्रयोगश्चेदितिसूत्रयितुमुचितम्। अलमितिचेत्किम्। प्रायेणगमिष्यति। हन्तीति
पलायतइति। हननंहेतुः। पलायनंहेतुमत्। लक्षणहेत्वोरितिशत्रादेशस्तुनभवति। देवत्रातोगलोग्राह इतियोगेचसद्विधि
रितिव्यवस्थितविभाषासुपाठात्। इच्छार्थे। ननुकामप्रवेदनइत्युपसंख्यायतएवत्त्वकामप्रवेदनेकच्चिनीतिसूत्रंमास्तु। अ
नेनैवसिद्धेरितिचेन्मैवम्। यत्रार्थप्रकरणादिनापिकामप्रवेदनंतत्रस्यानेनदर्थंतदारम्भात्। तर्हिनेनैवसिद्धत्वात्प्रकृतसूत्रं
मास्त्वितिचेन्न। तेनलिङिसिद्धेपिलोडर्थमस्यारम्भात्। लोटाचलिङोबाधामाभूदितिलिङप्युक्तस्तर्हिलोड्वित्येवोच्यतामिति
चेन्न। लिङोनुकर्षणंतत्सबद्धस्यविभाषाग्रहणस्याप्यनुकर्षप्रसङ्गादितिदिक्। लिङ्। समानकर्तृकेषुतुमुन्स्यात्रिनः सयथे।
च्छार्थेषुलिङ् लोटाविति प्राप्तंलोटंबाधनेएवंलिङमपिबाधेत। नचवासरूपविधिः। क्त्वल्युट्तुमुन्खलर्थेषुनदभावादिति
॥लिङ्धीयते॥

भावः। बाधनइति। परत्वादितिभावः। तुमुन्तुभावेऽकामप्रवेदनेचरितार्थइतिबोध्यम्। बाधेतेति। अतः पुनर्लि
ङ् विधानम्। अत्रापिसूत्रेसमानेत्याद्यनुवर्त्ततइतिबोध्यम्। नदभावादिति। परत्वविषयेवासरूपन्यायाभावाच्चलोटोप्यापत्तेश्चेत्यपिबोध्य
म्। तुमुन्पदमनुवर्त्यतुमुन्विषयेऽस्यलिङोविधानादयंभावएव। तेनेच्छन्करोतीत्यत्रायनंलिङ् दुर्वारइत्यपास्तम्। ध्वनितञ्चेदमिच्छार्थेष्विति

राम॰ ९२

उपक्षीणत्वादिति। एवञ्च शब्दानुपस्थित्या तयोर्वाक्यार्थमर्यादया संबन्धबोधानुपपत्तिरिति भावः। तदाह। पदार्थसंसर्ग इति। ननु शब्दयोः संसर्गो वा-
क्यार्थ इति भावः। शब्दाभासत इति। शब्दस्यस्व विशेषणकोपस्थितिः कार्यमिति भावः। ननु शब्दान्तरमिति। एवञ्च तयोर्वाक्यार्थविधया संबन्धो दुरुपपादः-
। उत्तरवर्त्तित्वादिना नियतमिति भावः। संबन्धोऽस्तीति। अर्थद्वारकः संबन्धो न संभवतीत्यर्थः। विद्यमाने एव दं वदत्ते तद्व्वर्णा नामतीतत्वस्यानागत-

धातुसंबन्धे। इह धात्वोः संबन्धोऽनुपपन्नः। स्वार्थस्मारणे नोपक्षीणत्वात्। पदार्थसंसर्गः कारकविशिष्टक्रिया वाक्यार्थ इत्यभ्युप-
गमात्। शाब्दबोधे शब्दापि भासत इत्यभ्युपगमेपि शब्दस्य स्वार्थं प्रत्येव प्रकारत्वञ्च तु शब्दान्तरं प्रति। अथोच्येत। यथा सन्विधौ कर्मत्वं समा-
नकर्तृकत्वञ्च धात्वोरर्थद्वारकं विशेषणमाश्रितम्। यथा च क्त्विधौ सुबन्तस्य कर्मत्वन्तथेहापि धात्वोरर्थद्वारकः संबन्ध इति। तदपि न। तथा हि स-
ति परस्परसंबद्धार्थबोधकानेकधातुप्रयोगे प्रत्यया इति फलितं स्यात्। ततश्च गोमानासीदित्यादि विना वेति न सिध्येत्। न ह्यत्र वर्त्तमानकालेऽस्तिः प्रयु-
ज्यते न वा प्रयुज्यमानस्य संबन्धोऽस्ति। तस्माद्धातुशब्देन तदर्थो लक्ष्यत इत्यभिप्रेत्याह। धात्वर्थानामिति। विषयबहुत्वापेक्षं बहुवचनम्। एके-
कविषयापेक्षायां तु धात्वर्थयोरिति बोध्यम्। स्यादेतत्। ननु हि धिवाक्येऽनेवस्वविषये प्रत्ययाः सिद्धास्तत् किमनेन। यदि तु यत्राप्राप्तास्तत्राप्ये-
तत्सूत्रेण प्राप्येरन्नतर्हि उपपदोपाधिप्रकृतिप्रत्ययार्थानां सङ्करे सति सर्वोपप्लवः स्यादित्याशङ्क्याह। यत्र काल इति। अयं भावः। कालमात्र-
मनेन बाध्यते न त्वन्यदपि। अल्पबाधे नोपपत्तौ बहुबाधस्यान्याय्यत्वात्। अन्यदेव तर्हि किंचिदेकबाध्यतामिति चेन्न। किं तदिति विनि-
गमकाभावात्। कालांशेपि किं विनिगमकमिति चेन्न्यायदर्शनमिति गृहाण। वर्त्तमानसामीप्य इत्यारभ्य हि कालान्यत्वप्रतिपादन-
मेवं प्रायेण दृश्यत इति भावः॥
त्वस्य वाप्रतीतये। अयं प्रयोगः। गोधर्मस्य संबन्धिन्यारोपादासीद्भविता इत्यतीतानागतव्यपदेशस्तत्फलञ्च तन्निष्ठ-
दरिद्रत्वप्रकाशनम्। न च तदस्यास्तीत्यत्र संस्थावद्वर्त्तमानकालो विवक्षित इति वाच्यम्। भाष्यादिविरोधापत्तेः। दण्डिनमानयेत्युक्ते अतीतदण्डस्याप्यानय-
नापत्तेश्च। तस्मात्प्रयोगेऽतत्र प्रवृत्तिं विना दुर्लभ इति भावः। स्पष्टं चेदं भाष्ये॥ ॥

म॰ग्र॰ ॥ अतीतानामर्थानां। अतीतं तदर्थप्रतिपादकानामन्यातृनामित्यर्थः। अयमपि दोषः। उक्तव्यवस्थाया असिद्धरूपः। किं सूत्रेणेति। स्पष्टं चेदं सू-

उ॰ त्रप्रत्याख्यानभाष्ये। तत्र पक्षे वसन् ददर्शेत्यादौ दर्शनकालिकं वासस्य वर्तमानत्वं बुद्धिस्थीकृत्य प्रत्ययः तत्फलत्वं च दर्शनेन तत्समानकालत्वं प्रत्य-

९३

स्यादेतत्। वनानि पश्यन्ययौ। निवेदयिष्यतो मनो न विव्यथे इत्यादि महाकविप्रयोगेषु दर्शननिवेदनादीनामतीतानामपि ल-
ट्लृडादिभिः संबन्धो दृश्यते। स च कालबाधेपि समर्थनीय इत्येतदर्थमिदं सूत्रम्। तत्र ययौ विव्यथे इति लिडर्थस्यैव बाधः किंत्व-
स्मात्तत्राह। तिङन्तवाच्येति। प्रधानानुरोधेन गुणस्य नयनं न तु विपरीतमिति भावः। येतु प्रथमान्तविशेष्यकं बोधं स्वेच्छामात्रे-
णास्थाय क्रियाप्रधानमाख्यातमिति भाष्यवार्त्तिकनिरुक्तादिमहर्षिवचांस्युपेक्षन्ते। तेषामयमपि दोषः प्रसज्येत। उक्तार्थान्येपि
कारकप्रकरणे स्यादेतत्। व्यवहारस्य विषये ऽध्याहृते लक्षिते पि वा। भूतभाविप्रत्ययार्थाः संबद्धन्तां यथायथम्। तथाहि॥
अग्निष्टोमयाजीति भूतएव णिनिः। जनितेत्येतत्समभिव्याहारे तु इत्थं व्यवहरिष्यमाण इत्यध्याहारोऽस्तु लक्षणा वा। एवं गोमा-
नासीदित्यत्रापि। ईदृशव्यवहारविषय आसीदित्यर्थः। अवश्यं चैतदभ्युपगन्तव्यम्। अन्यथा हि भाविकृत्यमासीदित्यत्र सूत्र-
रीत्या भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात्। तस्माद्घटे तावन्तं कालं भावितया व्यवहृतमि- राम॰
दानीमासीदिति तत्रार्थः। एवं सर्वसामञ्जस्ये किं सूत्रेणेति चेन्नैवम्। अध्याहारलक्षणाप्रयुक्तक्लेशं विनैव च प्रायशो निर्वाहार्थं सूत्रा- ९३
रम्भात्। न हि क्वचिदध्याहारादिकमागत्यपतनीति सर्वत्र तत्स्वीकर्तुमुचितमिति दिक्॥ ॥

यः शतृस्थले क्रिययोः समानकालिकत्वप्रतीतेरेवमेव ननु चोद्यं नैव वचनलोपं चोदितास्म इति सरूपसूत्रस्य भाष्यप्रयोगोपपत्तिरिति बोध्यम्॥

॥ तयोर्व्यर्थो हिस्वविधिरिति। क्रियासमभिहारे द्वित्वमात्रं विधीयतामिति भावः ॥ ॥ ॥ ॥

क्रियासमभिहारे। अत्र लोट इति यदि षष्ठ्यन्तं तदादेशास्तिङो लस्येरन्। वा च तध्वमोरिति वाक्यशेषात्। तत्र हि तिङ्विशेषः स्था-
नित्वेनोपादीयते। तच्च पूर्वत्र लोट्शब्दस्य तिङ्परत्वे सत्येव सङ्गच्छते। अन्यथा सामान्यविहितानां तिङां हिस्वाभ्यां बाधे सति तध्वमोरि-
ति वाक्यशेषो निर्विषयः स्यात्। तथा सति तिङन्तत्वात्पदत्वलम्भनमिति गुणोप्यस्ति तथापि बहवोत्र दोषाः। तथा हि। तिप्सिप्मिपां स्थाने विहि-
तस्य हेः स्थानिवद्भावेनापित्वात् ङित्वाभावाद्धुनीहीतीत्वं न स्यात्। ब्रूहीति ब्रुव ईट् स्यात्। तृण्ढीति तृणह इम् न स्यात्। किंच। सर्वेषां तिङां द्वावपि हि-
स्वौ पर्यायेण स्याताम्। न तु पदव्यवस्थया। अपि च लोट्शब्दं तिङ्लक्षणाप्यन्याय्या असञ्जातविरोधितया उपक्रमस्य प्राबल्यात्। वाक्यशे-
षस्य विषयसमर्प्यासम्पादत्वाच्च। तस्माद्यकारस्यैवादेशौ हिस्वौ न तु तिङामिति सिद्धान्तः। तदाह। तस्य चेत्यादिना। नन्वेवं ढयोरपि लः
परस्मैपदमिति परस्मैपदसञ्ज्ञा स्यात्। ततश्च परस्मैपदिभ्य एव कर्तर्येव द्वावपि स्यातामत आह। तो चेति। अयं भावः। लोटो हिस्वावि-
त्यत्र पूर्ववाक्याद्यथाविध्यनुवर्तते तच्च हिस्वावित्यस्य विशेषणम्। न च हिस्वौ लोटो भवत इति सामर्थ्यात्तद्धर्माणावित्यर्थः संपद्यते। त-
त्रापि मुख्यलोट्संबन्धिनो धर्मस्यातिदेशो व्यर्थः स्थानिवत्सूत्रेणैव लाभात्। अतः स्थानिवद्भावलब्धलोड्व्यपदेशौ तिङ्भूतौ यौ हि-
स्वौ तयोरेव धर्म इहातिदिश्यत इति सिद्धमिष्टम्। हिस्वविधानेनेति। यदि हि पुरुषवचनसञ्ज्ञे अपि स्यातां तर्हि युष्मत्सामानाधिकरण्ये ए-
कत्वे च सत्येव हिस्वाभ्यां भाव्यं तत्र व्यर्थो विधिरिति भावः। समुच्चयेऽन्यतरस्याम्। प्रागुक्तमिति। लोट्। तस्य च प्रसिद्धहिस्वसदृशौ तध्वमो-
र्विषये वा इत्यर्थः। यथाविध्यनु। इह पूर्वस्मिन्निति स्पष्टार्थम्। समुच्चयं विशेषस्य वक्ष्यमाणत्वात्। यद्यपि संख्याकारकपुरुषकालविशे-
षाणां हिस्वान्तात्प्रतीतेस्तदभिव्यक्तिस्समस्य ॥ ॥९॥

म॰ श॰ न्यायत एवेति। धातुसंबन्धाधिकाराच्चेत्यपि बोध्यम्। यथाविध्यर्थं वचनमिति। यथाविध्येवेति नियमार्थं वचनमित्यर्थः। पूर्वस्मिन्नेवेति नियमस्तु न अन्यत्र।
उ॰ तस्याः प्राप्त्यानियमवैयर्थ्यापत्तेः। तद्भ्रमसादिति। द्वित्वप्रकरणभाष्ये पाठात्प्रकृतसूत्रेपि क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे भवत इति वक्
९४ तव्यमिति पाठाच्च अत एव दन्दिह्वितं छोडन्तविषयमेवेति भावः। अनुवादित्वेति। पश्चात्कथनमात्रेत्यर्थः। नत्वव्यवहितगर्भ इति भावः। सूत्रप्रत्याख्या

न्यायत एवानुप्रयोगो लभ्यते। तथापि यथाविध्यर्थं वचनम्। तेन याहि याहीति याति इत्येवानुप्रयुज्यते न गच्छतीति निकरोतीति वा द्वे
वाच्ये इति। वार्त्तिकमिदन्द्विरुक्तप्रक्रियायां व्याख्यातम्। यत्तु वदन्ति। अस्य वक्तव्यस्य भाष्येनाश्रितत्वादिति। तद्भ्रमसात्। इति शब्द।
स्विति। न च तेनैव व्यवधानाद्याती त्यस्यानुप्रयोगत्वं कथमिति वाच्यम्। अनुशब्दस्येहानुवादित्वमात्रपरत्वात् व्यवहित विपरीत
प्रयोगयो रिष्यापत्तेः। एतच्च कैयटहरदत्तग्रन्थयोः स्फुटम्। एतच्च भाष्यकारीयोदाहरण सूत्रप्रत्याख्यानाभ्यां निर्णीयते। भ्रमम्
लकमेवेति। एतेन सक्तून्पिबेत्याद्युदाहृत्य यदुक्तं प्राचा लोडभावपक्षे लडादि पुनः पुनः पिबति। पुनः पुनः स्वादनीत्यभ्यव
हरतीत्यादीति। तदपि भ्रममूलकमेवेति ध्वनितम्। तथाहि पुनः पुनरित्यधिकावापः। पूर्वत्रापि तद्विवक्षायां द्वित्वापत्तेः। किंच।
लोडभावपक्षं प्रक्रम्य अभ्यवहरतीत्यनुप्रयोगस्य हि स्वान्तयोर्विहित स्योपन्यसनेद्रु थंसङ्गच्छतां कथं वोपयुज्यताम्।
काल कारकसंख्यानां लोटैवाभिव्यक्तत्वादिति दिक्। भ्रम एवेति। पुरुषांशे वचनांशे चे तिभावः। एवञ्च पुरीमवस्कन्देत्या
दौ तिङन्तत्वयथायथंपरस्मैपदात्मनेपदान्तत्वञ्च सिद्धान्ते स्थितम्। पुरुषवचनसन्दूतु नस्तएवेति सर्वं सुसिद्धिः॥ इति लका
रार्थप्रक्रिया॥ इति श्रीमद्भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां प्रौढमनोरमायान्तिङन्तं समाप्तम्॥ रम॰ ९४

नेति। यथाविधीति सूत्रमात्याख्यानेत्यर्थः। पूर्वत्रापीति। सक्तून्पिबेत्याद्युदाहरणेऽपीत्यर्थः। द्वित्वादिति। द्वित्वङ्क्रियासमभिहारे इत्यनेने। आदिना पु
नः पुनः शब्दप्रयोग इति बोध्यम्॥ इति लकारार्थप्रक्रिया॥ इति भट्टोजिदीक्षितपौत्रदीक्षितहरिविरचिते लघुशब्दरत्ने तिङन्तं समाप्तम्॥

इत्यनुवर्त्तनएवेति। शबादीनां सार्वधातुकत्वाद्यर्थमिति भावः। विहितत्वेनेति। भविष्यतइत्यादौतिबादेः सार्वधातुकत्वायविहितविशेषणं तदितिभावः। तेनलसार्वधातुकानुदात्तत्वसिद्धिः ॥ इतिदिगिति। शमिधातोरितिसूत्रात्तदनुवृत्त्यासिद्धेस्पष्टार्थएवायमितिदिगर्थः॥ कृ। त्यादइत्यधिकारस्येति॥ अतएवण्वुल्तृचौस्तव्यदादिषुपाठोनाकारिस्पष्टत्वेदंभाष्ये॥ बाधेसतीति। येननाप्राप्तिन्यायेनेतिभावः॥ भा

॥ श्रीगणेशायनमः॥ धातोः ॥ यद्यपिधातोरेकाचोहलादेरितिसूत्राद्धातोरित्यनुवर्त्ततएव तथापि आर्द्धधातुकसञ्ज्ञाया आश्रितशब्दव्यापारत्वलाभायपुनर्धातुग्रहणाम्। अन्यथालूभ्यांपूभ्यामित्यादौइड्गुणौस्यातां। धातोर्विहितत्वेनभ्यामादेरार्द्ध धातुकत्वात्। सिद्धान्ततुधातोरित्येवविधानात्तेनेतिदिक्। ण्वुलः प्रागिति। अर्हेकृत्यतृचश्चेतिसूत्रेकृत्याइत्येववक्तव्येतृज्ग्रहणंयोगापे सञ्ज्ञापकम्। ण्वुल्तृचावित्येतस्माद्योगात्प्रागेवकृत्याइत्यधिकारस्येतिभावः। इतिकारात्सुसूत्रंप्राग्ण्वुलइतिप्रक्षिप्तप। केलिमरइति। कृत्याइ तिबहुवचनेनेदंसूच्यते। ककारोगुणवृद्धिनिषेधार्थः। रेफः स्वरार्थः। कृत्यचः। उपसर्गादित्यनुवर्त्तते। रषाभ्यामितिचं। तत्रनास्त्यात्तात्कद्धमित्या ह। उपसर्गस्थादिति॥ यकेति। नचाड्व्यवायेपीतिभविष्यतीतिवाच्यम्। रषाभ्यांपरस्यनस्येत्यंशेनिर्दिष्टग्रहणप्रापितस्याव्यवधानस्यव्यवा येपीतियोगविभागेनबाधेसतिआदर्शनेत्यादावतिप्रसङ्गेप्राप्तेअट्कुप्वित्यंशोनियमार्थः। आङितिपदव्यवायेपीतिनिषेधंबाधि तुमितिस्थितम्। इहतुण्यन्तकृतोरव्यवधानस्यापेक्षाकथमड्ग्रहणेनवार्येनेतिभावः। हलश्चेजुपधात्। इजुपधस्यहलन्तत्वाव्यभिचारा त्। हलइत्यनेननदादित्वंलस्यतेइत्याह। हलादेरिति। इजादेःसनुमः। इहहलइत्यनुवृत्तंनदन्तपरंनतुनदादिपरम्इजादेर्हलादित्वासम्भवा ““तदाह। हलन्तादिति॥

श्चेण्यन्तात्परोयः कृदित्यंशप्यड्व्यवायेइत्यस्यसंबन्धमाश्रित्ययकाव्यवधानेसमाहितम्॥ नदादित्वमिति॥ तद्धानित्यर्थः। तदंतपरमितिसामर्थ्यादितिभावःतदेवाहतत्विस्यादिनाविकल्पमितिप्रत्ययलक्षणप्राप्तमितिबोध्यं। विधेरितिनित्यत्वार्थस्यविधेरित्यर्थः। गुरुभूतक्लेशसाध्यनियमार्थत्वेचल

कृत्वमात्रेति॥ अतएवकार्यान्तराणिप्राक्कृतानिष्पन्नेनभवन्ति।भूतपूर्वादपीति॥ आर्द्धधातुकेविवक्षितेऽकारलोपइतिभावः॥ स्पष्टत्वेदं।
भाष्ये॥ इतिभावइति॥ यद्यपिप्रत्ययःपरस्वेतिशास्त्रादार्धधातुकस्यपरत्वेनैवविवक्षेतिपरबुद्धिनिमित्तत्वेनपरनिमित्तत्वमस्त्येवस्पष्टत्वेद
न्द्विगोर्लुगनपत्यइत्यत्राकरे।तथापिआर्धधातुकेइत्यादेःपरसप्तमीत्वेइदंमूलमितितत्त्वम्। दरिद्रातेरातोलोपेदरिद्र इत्यत्रयतण्यतोर्नवि॥

विहितइति।यदितुविहितविशेषणंनव्याख्यायेततर्हिनियमार्थतानलभ्येत॥णिजलोपेक्तेहलन्तात्परत्वेनणेर्विभाषेतिविकल्पं
बाधित्वविधेःसंभवादितिभावः।तुम्ग्रहणमिति।तेनास्यप्रत्वनमित्यादौविध्यर्थतास्त्वितिनशङ्क्यमितिभावः।वानिंस।क्तिपरइति।ति
उन्तोदाहरणानुप्राचःप्रासादिकमित्यवोचाम।ण्यन्तभादीनामिति।ण्यन्तस्यप्रकृत्यन्तरत्वादप्राप्तेवचनम्।यत्तुवदन्ति।हेरचङीतिसूत्रेऽचङीति
पर्युदासेनप्रकृतिग्रहणेण्यधिकस्यापिग्रहणमितिज्ञापनादेतत्सिद्धमितितन्नभसात्ज्ञापनस्यतुकृत्वमात्रविषयकमितिभाष्यादौसिद्धान्तित।
त्वात् अचोयत्।शक्यमकर्तुमिति।यत्तुवदन्ति।अजन्तभूतपूर्वादपियथास्यादित्येतदर्थमज्ग्रहणंतेनदित्स्यन्धित्स्यमित्यत्रयत्सिद्धेय।
तोनावइत्याद्युदात्तत्वंसिद्ध्यतीति।तदापाततः आर्द्धधातुकेविवक्षितेयद्यतोलोपःस्यात्तदाहीदंसम्भवेत्।लोपस्त्वार्द्धधातुकेपरए
वोचितःअन्यथापरनिमित्तत्वाभावेनस्थानिवत्त्वाभावेगणयतीत्यादौउपधावृद्धिप्रसङ्गादितिभावः।नकिशसीति।शसुहिंसायाम्।यत्तुकेचित्
सिंसानुस्वारंपठन्ति।तन्न।ईडवन्दवृशंसदुहाण्यतइतिसूत्रविरोधात्तानुबन्धेति।अनुबन्धानामनेकान्तत्वात्।एकान्तत्वपक्षेपिदद्गानिद
धात्योर्विभाषेतिविभाषाग्रहणाज्ज्ञिङ्गदितिभावः।आलम्भ्यागोरिति।समासान्तोदात्तत्वंबाधित्वाकृदुत्तरपदप्रकृतिस्वरःतत्रण्यति।
तिस्त्वरोवतिष्ठेतयतितुयतोनावइत्याद्युदात्तःप्रसज्येत॥ ९९ शेषःयदन्तस्यैकान्ताभावात्॥ ददातिदधात्योरिति॥ अनेनह्रिणोप्राप्तेशोवि
धीयते अनुबन्धानेकान्तत्वेतुनेदंसिध्यति।णशादीनांवाकार्यबोधोत्तरंप्रत्ययत्वज्ञानेसर्वेत्सञ्ज्ञाप्रवृत्त्योपदेशकालोत्तरकालमेवप्रवृत्तेरुपदेशेतत्सन्निधा

पूर्वेणेति। योरुपधादित्यनेनतद्धितइति॥ नत्रसाधुरिति प्राग्घितीयइत्यर्थः। यच्छ्रादुर्वोरत्वादिति। अवन्तत्वादितिभावः। नचात्रतद्धिताधिकारात्कथंप्राप्तिः कृदन्तशब्दस्योपस्थितार्थनिरूपितकर्तृत्वसत्त्वेनात्र प्राप्तेः कृतपूर्वीत्यत्रतु नैवम्। ननु घटकर्तृ दन्तस्य स्थानत्र्येणाक्कापिप्रयोगाभावेनप्रक्रियादशायामपिकृदन्तशब्दस्योपस्थितार्थकर्मत्वाभावात्। तद्धिताधिकेद्इत्यस्यापितद्धितान्तशक्तिमात्रसहकारेणोपस्थितक्रियाकर्तृकर्मणोर्नेत्यर्थइतिभावः। करणत्वविवक्षयेति। कर्तुःकरणत्वविवक्षयेत्यर्थः। मतमाश्रित्येत्यनेनत न्मतस्यपूर्वोक्तस्वरीत्याऽयुक्तत्वंसूचितंतेनास्यपरिहारः।

उपात्प्रशंसायाम्। प्रशंसेहगम्यमानतयाविशेषणात्। धात्वर्थस्तुप्राप्तिरेवतेनयस्ययस्माद्धाप्राप्तिः प्रशंसाहेतुःतदिहोदाहरणम्। विपरीतनुप्रत्युदाहरणम्। अत्रापियादौप्रत्ययेविवक्षितइतिपूर्ववदेवसूत्रार्थः तेनण्यतिकृतेअन्तस्वरितत्वम्। प्राचानुयतिपरइति व्याख्यातम्। तदाकरविरोधादुपेक्ष्यम्। गदमदव्यत्ययेनपञ्चम्यर्थेसप्तमी। सभ्योनुपसर्गेभ्योयत्स्यात्। अनुपसर्गेकिम्। ननैषधे कार्यमिदंनिगाद्यम्। यमेरिति। पूर्वेणैवसिद्धेरितिभावः। नियमसाधुरिति। यमः समुपनिविषुचेतिवैकल्पिकेऽपितद्धितोपदित्यर्थः। यद्यप्यस्मिन्यत्सेकृत्यानांकर्तरीत्यस्याप्रवृत्तेः कर्तरितृतीयादुर्लभाकर्तृकर्मणोः कृतीतिषष्ठ्यादुर्वोरत्वान्तथापित्वयेतितेनेतिचकरणत्वविवक्षयातृतीयाबोध्या। यद्वा। यमोपरिवेषणेमिदितिमतमाश्रित्यपर्यवसितंनियमयन्तिस्यादावि वमित्वंस्वीकृत्यण्यन्ताद्यन्ताद्यद्वाद्यः। अथवाप्यन्येवसन्ज्ञापूर्वकत्वान्नवृद्धिरितिदिक्। एवञ्चवार्तिकप्रयोगोप्यन्यथासिद्धतयानिपूर्वाण्यतज्ज्ञापयितुंनप्रभवती

स्यायुक्तत्वंसूचितम्। इतिदिगिति॥ अत्रपसेकृत्यानामितिसूत्रेविभक्तेनकर्तरिवेत्यनेनानुभयप्राप्तिविषयेणविकल्पात्तृतीयेतिबोध्यम्। नप्रभवतीतिसन्ज्ञापूर्वकेत्यस्यासत्वेपिप्रयमापस्थितप्रत्ययबाधापेक्षयापश्चात्यात्प्रवृद्धिबाधएवभाष्यप्रयोगान्न्याय्यइतिबोध्यम्। नियमोनास्तीतिदानेतु नियमएवेतिभावः। संभक्तिर्वरणयाच्ञारूपम्। वृञ्वरणइत्यत्रवरणंस्वीकारस्तत्रनिरोधएवेतिभावः॥

सर्वे निहत्नमिति। भाष्य क्यव विधौ हन्त्री ग्रहणं कर्त्तव्यं इह मा भूत् वार्या ऋत्विज इति कर्मणि निरूपपदोदाहरणादिति भावः। ईड इति॥ अत एव वृद्धिर्न्न
अत्र च प्रसिद्धत्वादिणा एव ग्रहणं तेनाध्याय मिति सिद्धम्॥ आत्मनेपदिन इति। आत्मनेपद्यका स्ववृद्धिकरणा प्रकृति भूते ईड वन्द साहचर्येण।

स्तुत्यर्हमिति। यद्यपि पणिनव्यशब्दाः अर्थद्वयसाधारणस्तथापि पण्य शब्दस्य व्यवहर्त्तव्य एव रूढत्वात्। अर्थनियमो लभ्यते एतदर्थमेव
हि निपातनमाश्रितम्। यदाहुः। धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनमिति।
। शतेनेति। शतशब्दः नियतपरः। कन्या शवरणा वरयितॄणां नियमो नास्तीत्यर्थः। हृड इति। अनिरोध रूपस्य संभक्ति वाचित्वे एव सौष्ठ
वादिदं लभ्यते इत्याहुः। अनिरोधेप्यिन्त्यस्यानुकोनुहत्मोपि स्यादिति ध्वनयन्नाह। हृत्येति। एतिस्तु शास्त्र इत्यादिना हृत्तः क्यप्। इह सत्ते।
अवद्यादीनि निर्विभक्तिकानि तत्र द्वन्द्वः। तेन वर्येति स्त्रियामेव निपात्यते। अस्त्रियां तु वृङः ऋहलोर्ण्यदिति ण्यत्। वार्या ऋत्विज इति वृङति।
कारमतम्। न चात्र एतिस्तु इति क्यप्र शङ्क्यः। तत्र हृत्त एव ग्रहणं न तु वृङ इति सिद्धान्तितत्वात्। भट्टिस्तु द्वन्द्वान्तसानिर्देशं मन्वानः पुंल्लि
ङ्गेपियत् प्रायुंक्त। सुग्रीवो नाम वर्योसाविति। उपसर्या। प्रजननं प्रजनः गर्भग्रहणम्। कान्तः प्राप्तोस्याः कान्त्या। तदस्य प्राप्तमिति निवर्त्तमाने का
लाद्यदिति यत्। अध्याहार्यमिति। यदि तु अजर्यशब्दस्यैव योगरूढिराश्रीयेत तर्हि भट्टिप्रयोगं पुनरुक्तं स्यादिति भावः। मृगैरजर्यमिति
कालिदासप्रयोगे जर्यशब्दस्य जरणाभाव विशिष्टसङ्गतं जहल्लक्षणापि सुवचा। सर्वथापि सङ्गतत्वेन रूपेण वाच्यता नास्तीत्यत्र ता
त्पर्यम्। अत एव भाष्ये सङ्गतं कर्त्तृ इति व्याख्यानमिति भावः। भावग्रहणमुत्तरार्थमिति भाष्यस्य स्वरसमनुरुन्धानानामनमाह।
कर्मणी नि। एतिस्तु एष्य इति। सुप्यनुपसर्गे भाव इति सर्वे निहत्नमिति भावः। इत्य इति। कथं तर्हि उपेयमिति। ईङो देवादिकात् यत्। न तु ङ
इति॥ ईड वन्देति ज्ञापकात्। तत्र हि ईडि वन्दिभ्यां साहचर्यादात्मनेपदिनो ङ्गो ग्रहणमिति भावः। परस्यापीति। ओरावश्यक इति प्राप्तस्य॥
नेदृशात्मनेपदिन एव क्यादेर्ङ्गोङ्ग शब्देन ग्रहणमाः। एतेन पूर्वोत्तर साहचर्यादीङ इति सूत्रे उभयपदिनोग्रहणमित्यपास्तम्। पूर्वोत्तरयोरेकैकस्योभयपदि

रम॰ ९६

विषयसप्तमीति। इदन्त्वाचः कर्तृयकीतिसूत्रेभाष्येस्पष्टम्। परसप्तम्याश्रयणादिति। वस्तुतोविषयसप्तमीत्वेपियेविभाषे त्यत्रजनादिसाहचर्येणयादिप्रत्ययोत्पत्ति
आड्पूर्वादिति। नचैवमाज्यड्डिमासीदित्यत्रावग्रहःस्यादितिवाच्यम्। त्वक्त्विजंपूर्वेभिरित्यादाविवसत्यप्यवान्तरपदत्वेसंप्रदायानुरोधेनक्वचित्तदकरणा
त्। यत्तुप्राचाजगतादिन्यस्याज्यमुक्तंतद्भाष्यविरोधादर्थानुगमाच्चोपेक्ष्यम्। अनित्यंति। इहचनपरकरणंलिङ्गमितिभावः। ईचखनःहस्वःसुपठइति। दी
र्घपठनःसूत्रकारस्वयमाशयःइहइतिप्रश्लेषेणद्वितीयइकारोयेविभाषेत्यात्वबाधितुंविधीयते। अन्यथायेविभाषेत्यस्यावकाशः। स्नायतेरवन्यते। इत्वस्या
वकाशःयस्मिन्पक्षेआत्वंनास्ति। आत्वपक्षेतूभयप्रसङ्गेपरत्वादन्तरङ्गत्वाच्चात्वंस्यात्। येविभाषेत्यत्रहियेइतिविषयसप्तमीतनयकारादौवुद्धिस्थेएवप्रा
प्तमात्वमन्तरङ्गम्। इकारस्तुक्यपासहविधानाद्बहिरङ्गइतिदीर्घप्रश्लेषणस्यभाष्यकृतस्त्वयंभावः। इत्वमन्तरङ्गम्। क्यपसन्नियोगशिष्टत्वात्। आ
त्वन्तुबहिरङ्गम्। यइतिपरसप्तम्याश्रयणात्। सवर्णदीर्घत्वेनात्वबाधोन्याय्यस्सवनचहस्वादेशेहस्वस्यपीतितुक्प्रसङ्गःआद्गुणस्यषत्वतुकोरि
त्यसिद्धत्वादितिवाच्यम्। पदान्तपदाद्योरेकादेशोऽसिद्धोनत्वन्योपीतिसिद्धान्तात्। अन्यथावृक्षेच्छत्रमित्यत्रहस्वाश्रयोनित्यस्तुक्स्यात्। इष्यतेतुदी
र्घात्पदान्ताद्वेतिवैकल्पिक इतिदिक्। विभक्तेःक्यपो प्रसङ्गेबीजमाह। तदनुबन्धेति। राजसूय। यद्हति। राजानःक्षीणन्तीत्यादौतथादर्शना
दितिभावः। रूढ्यर्थंनिपातनन्तेनाद्यपक्षेश्वमेधादौद्वितीयेज्योतिष्टोमादौचनातिप्रसङ्गः। उत्वमिति। तस्यरपरत्वाद्हलिचेतिदीर्घइति
भावः। नित्यंक्यविति। तेनयत्प्रत्ययोनेतिभावः। भिद्योद्ध्यौ। क्यविति। कर्तरीतिशेषः। पापमिति वेति। नपोनकल्कोप्यपनत्वकल्कइत्युप
लक्षणात्येवभावोनहतानिकल्कइतिभारतेदर्शनात्। कल्कःपापाशयेपापेदम्भेविट्किट्टयोरपीतिकोशाच्चेतिभावः। वक्तव्यमिति। वृत्तिकृतानुसू
त्रेप्रसिद्धम्। कथमुपपदाहरणतामतस्यनप्रतिगृह्यम्। नस्माचापिगृह्यम्। लोकेत्विनितिणयदेवेतिभावः। पदास्वैरि। अवगृह्यमिति। अवग्रहोविच्छेदः।
अवान्तरपदसञ्ज्ञासूचयितुंपदपाठकालेकिंचित्कालमवसानम्। प्रग्रहस्तुप्रकृतिभावाद्यणाद्यभावेपरस्परमचोरसन्निकर्षःअवगृह्यप्रगृह्यशब्दौ
प्रातिशाख्यादिषुपदविशेषपरतयानिरूढौ। गृह्यकइतिगृहासक्ताःपक्षिमृगाश्छेकास्तेगृह्यकाश्चतेइत्यमरः। पत्रंवाहनमिति। पतत्यनेनेत्यर्थेदा
कालेनान्तरवनेरेवनेनात्वविधानेनात्रनदप्राप्तिरितिबोद्ध्यम्। यन्प्रत्ययोनेतिवदःसुपीतिचकारप्राप्तइत्यर्थः॥

[illegible] ॥

तद्धितेनापीति। यतेतिशेषः॥ इति दिगिति। उपपदसमासतत्प्रयुक्तस्वरासिद्धिर्दिगर्थः। ममत्वमेतित्तु सप्तमीनिर्देशान्नसिद्ध मितिबोध्यम्। किंचा।
भावस्येति सद्गृसंयतो नावहत्याद्युदात्तं स्यादनास्वरितं विघ्नेइतिबोध्यम्। लिङ्गाच्चेति। ण्यदन्तद्विधानोत्तनःस्वरविधानेलिङ्गमितिभावः॥ भाष्यादिति।
तत्रोभयविषयवार्त्तिकस्यैवपाठादितिभावः॥ उपपदसमासासंभवेपीति। उपपदत्वाभावादितिभावः। ततएवकृदुत्तरपदप्रकृतिस्वरोपिबोध्यः॥

यद्यपिनद्दहतिरथयुगप्रासङ्गमितितद्धितेनापीदंसिध्यति। तथापीण्यतंव्याकर्त्तुयितुंसूत्रम्। अन्यथाहियोग्योगोरितिस्यात्। द्वह्रो सन्यामि
ति। तेनप्रमावास्यायावेतिविहितस्तद्धितोहूस्वपक्षेपिसिध्यति। यदितुयत्प्रत्ययान्तस्येदंपाक्षिकंनिपातनमाश्रीयतेतदायतासुक्तेऽधिक
रणेण्यदेवतावद्दुर्लभः। अथापिवाहुलकाद्यभेतएवमपिण्यदन्तमनूद्यविहितस्तद्धितोयदन्तान्नस्यादितिदिक्। ऋहलोः। पञ्चम्यर्थेष
ष्ठी। ऋइतिनअन्तेर्ग्रहणंकिंतुवर्णमात्रस्यहलासाहचर्यात्परंकार्यमितिनिर्देशात्। ईडवन्देत्यादिलिङ्गाच्च। लपिदभिभ्याश्चेति। पोरदुप
धादितिप्राप्तस्यायतोऽपवादः। जयादित्यसुआसुयुवपीतिसुत्रेलपिरपेरुपरिप्रक्षिप्य अनुक्तसमुच्चयार्थेनचकारेणदभेःसङ्गृहमाह।
तत्रवैरूप्यंनिर्बीजम्। भाष्यादिविरोधश्चस्पष्टएवेतिबोध्यम्। स्तीकार्यइति। चुलुंपादिवदितिभावः। तथाचप्रयुज्यते। ननानशन्तिनदभा।
तितस्करः। विष्णुगोपा अदाभ्यइत्यादिश्चोरावश्यके। अवश्यंभावआवश्यकम्। मनोज्ञादित्वाद्वुञ्। अव्ययानांभमात्रेइतिटिलोपः। लाव्यमि।
ति। क्वचित्तुधीतितार्थस्यापिप्रयोगोदृश्यते। लाघवंप्रत्यनादरात्। अवश्यलाव्यम्। अत्रोपपदसमासासंभवेपिमयूरव्यंसकादेराकृतिग
णत्वात्समासः। युमिश्रणेइति। एत्रवन्धनइतितुनगृह्यते। सानुबन्धकत्वादितिभावः। वैश्यकुलादेरिति। दक्षिणाग्नेर्हियोनिर्विकल्प
तेवैश्यकुलाद्धिनवः भ्राष्ट्राद्वागार्हपत्याद्वेति। प्रणाः कर्मव्यापारइति। वस्तुतस्तुसंमतिःप्रीतिःसायस्मिन्चोरादौ। नास्तिलोकानांसोऽसं

मतिः॥ राम· ९७
सानुबन्धकत्वादिति। नचानयत्तुग्विकरणपरिभाषयाचोभयोर्ग्रहणापत्तिरितिवाच्यम्। उदित्ययतियौतीत्यादौप्रसिद्धत्वेनयौतेरेव
ग्रहणमित्याशयात्। यो निरिति। उत्पत्तिस्थानमित्यर्थः। सायस्मिन्निति। असंमतिरितिबहुव्रीहिरितिभावः समीक्ष्यमानवतीसमिध्यवत्यो ऋग्विशेषौ॥

प्रक्षिप्यमाणेति। प्रक्षिप्यमाणसमीत्करणीभूतेत्यर्थः। निर्मितस्थलमिति। अग्नित्वारोपादितिभावः। अचे सार्थेष्विति॥ लिङ् चेतिविशेषविधानेन।
लोने वाधेसिद्धे ऽत्तुमुन् ग्रहणंचिन्त्यप्रत्ययोजनमित्याहुः। अनित्यताज्ञापयितुंशक्येति। तज्ज्ञापनेचशक्ति लिङो विषयेतदभावशङ्कावारणाय

यद्वासंमतिर्यस्य विषयेषुनास्तिसविरक्तोऽसंमतिः। तंत्रेणार्थद्वयमपिगृह्यते। पाय्यसांनाय्य। मीयतेनेनेति। माङः करणेण्यत्मेयमन्यत्
।धीयतेनयेति। अत्रचसर्वासामिधेनीधाय्याकिंतुसमिद्धमानवतींसमिद्ववतीच्चान्तरेणविकृतिषुप्रक्षिप्यमाणाएवपाजाअमर्त्यइत्यादि।
कैव। सूत्रेसामिधेनीग्रहणंप्रयोगविषयोपलक्षणार्थंतथाचासामिधेन्यामपिदृश्यते। धाय्याःशंसनीति। नहिशस्त्रेणसमितप्रक्षिप्यते। क्रतौ।
कुण्डपाय्यइति। पिबतेरधिकरणेयत्प्रत्ययोयुगागमश्च। ननुण्यत्। तित्स्वरितप्रसङ्गात्। यतोनावइत्याद्युदात्तः कृदुत्तरपदप्रकृतिस्वरः। तथाचप्र
युज्यतेप्रणम्य। कुण्डपाय्यइति। संपूर्वाच्चिनोतेस्तुण्यदायोनिपात्यते। क्रतौकिम्। कुण्डपानंसञ्चेयः। अग्नौपरि। अग्निरिहनज्वलनः किंतुतद्धा
रणार्थइष्टकाचयनेननिर्मितस्थलम्। तस्मिन्नभिधेयेपरिपूर्वाच्चिणोतेर्ण्यत्। आयादेशश्च। संपूर्वस्यवहेस्तुसंप्रसारणंदीर्घश्चनिपात्य
ते। चित्योग्निरिति। चिनोतेः कर्मणिक्यपृयतोपवादः। इहसूत्रेअग्नावित्यनुवर्तते। तच्चचित्याशब्दस्यैवविशेषणंनद्वितीयस्य। तस्यभा
वार्थकत्वेनाग्निवाचकत्वासंभवात्। अग्नेरित्यत्रतुचेयमित्येव। कृत्युडिति। हसितंहसनंछात्रस्य। अत्रकृत्युटोर्विषयेनपुंसकेभावेघ
त्रनद्विकृतिभोक्तुम्। अत्रइच्छार्थेषुलिङ्लोटाविति ल्योण्न। लिङ्तुभवत्येव। लिङ् चेतिवचनात्। ईषत्पानः। आतोयुच्। अत्रखल्न। शक्ति
लिङ्लाघवादिति। इहहिचकारमात्रेणवासरूपविधेरनित्यताज्ञापयितुंशक्या। इतरत्रतुकृत्यग्रहणेनकृत्यतृज्ग्रहणेनचज्ञापनेगौरवमिति
भावः॥ इतिकृत्यप्रक्रिया॥
चः सार्थकइतिभावः प्रैषाद्यर्हादिसूत्रविषयेतुअप्रवृत्तेः क्वचित्कत्वाद्वासरूपप्रवृत्तिरितितात्पर्यम्। कृत्यतृज्ग्रहणे
नचेति। ण्वुलः प्राक्कृत्याइत्यधिकारइत्यर्थस्तुव्यास्यानेनापिसुलभइतिभावः। इतिकृत्यप्रक्रिया॥

॥ इह हीति। शीङ्आन्स्यादिति वा नच्छेद इति भावः। वार्त्तिकमिति। नलोपविधायकमित्यर्थः॥ ॥

एवुल्तृचौ। चकारः तुम्बुन्दमितुरिशेमेयस्तु इत्यत्र सामान्यग्रहणाविघातार्थः। नंष्टा नंशितेति। रधादिभ्यश्चेति वेट्। मक्नन्तेति। प्रोपाभ्यां समर्थाभ्यामिति क्र
मेरात्मनेपदविषयता। अच्चोपसेति। यत्तु प्राचोक्तं न धातुलोप इत्यत्र इक इत्यनुवृत्तेः पापाचक इति तन्न। यङन्ते अच्चोपसस्यानिवत्त्वात्यङ्गनेनतु न धातुलोपे
तु निषेधस्याप्रसक्तत्वादिति प्रागेव प्रपञ्चितम्। जारं विभर्तीति विग्रहः। श्वपाकोपीति। कर्मण्यणापि पक्षे भवतीति भावः। चेक्रियादिति। संयोगपूर्वकत्वान्न यण्।
लोलुव इति उवङ्। यणन्तु न। ओः सुपीत्युक्तेरिह च सुबभावात्। पाघ्राध्मा। इह सूत्रे उपसर्ग इति केचिदनुवर्त्तयन्ति तद् हूनामसंमतम्। तथा च श्रीहर्षः। फलानि धूम
स्य धयानिति। भूयते च। यदा पश्यः पश्यते रुक्मवर्णमिति। अनुपसर्गाल्लिम्प इह लिम्पविन्देति भाविनानुमा सहितौ निर्दिष्टौ। तेन नलाभार्थं स्येव विन्दे ग्रहणं न
तु सत्ताद्यर्थानाम्। धारय इति। धृञ्धारणे। धृङ् अवस्थाने। ण्यन्तयोर्द्वयोरपि ग्रहणम्। अयमकथं न सहामत्रोनर धारयस्य तेइति श्रीहर्षः। परत्वाद्धि कर्मण्य
णा भाव्यं सूत्र धारादिषु यथा। तथा च वार्त्तिकम्। अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति। सत्यम्। कर्मणः शेषत्वविवक्षायामणो प्राप्ताशेषकृते शेष
षष्ठ्यन्तेन समासो भविष्यति। वेदय इति। विदचेतनाख्यानादिषु चुरादिः। ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्ण्यन्तः इहोदाहरणेषु लिम्पविदिभ्यां तुदादिभ्यः
शः। शे मुचादीनामिति नुम्। धार्यादिभ्यः शप्गुणायादेशौ। अरविन्दमिति। चक्रस्य नाभिनेम्योरन्तराले स्थितानि काष्ठानि अराः तदाकाराणि दलानि तस्मा
द् अस्मादराः। नान्दि इन्दतिलभत इत्यर्थे कर्मण्यणा बाधनायेदम्। ददाति दधात्योर्विभाषा। ननु ददद्दाने दधधारणे आभ्यामचि ददो दध इति दाधाभ्यां णे दायो
धाय इति च सिद्धम्। सत्यम्। स्वरार्थमिदं सूत्रम्। अददः अदधः इह हि अव्ययपूर्वपदप्रकृतिस्वर इष्यते। अजन्तत्वेतु। अच्कावितिअन्तोदात्तत्वं स्यात्। स्याद्यधा।
अनुपसर्गादिति निवृत्तं उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। एवञ्च नन्त्स्वन्त्य विभाषाग्रहणमपि निवर्त्तते न दाह नित्यमिति श्येङ इति। इह हि सूत्रे श्या आदिति
प्रश्लेषः ननु शीङोपणादेशेन तथा यतते अतः शदन्तानां वा पतिप्रभृतीनां अकारान्तानां वान ग्रहणव्याख्यानादिति भावः। सुगनाविति। प्राचा तु सूत्रे आ अन्त
मिति तात्स्व्यपठित्वा भृणाते रुदाह्रतं तत्तदनाकरम्। तथा च प्रयुज्यते। अनाश्रवावः किमहमिति। अमरोप्याह। वचने स्थित आश्रवः अदावइति। दवदावो वनारण्य
वह्नीइत्यमरः। गेहेकः। गेह इति प्रत्ययार्थस्य कर्त्तुर्विशेषणम्। नोपपदम्। गृहपतिना संयुक्ते ञ्य इति निर्देशादित्यभिप्रेत्याह। गेहे कर्त्तरीति। एतत्सूत्रं शक्यमकर्त्तुम्।
गृहग्रहणे इति भ्वादेरिगुपधलक्षणे कप्रत्यये कृते गृहशब्दस्य सिद्धेः भाष्यमतेत्विति॥

भाष्यकृतोक्तमिति। एवन्ततोण्वुल्तृचोरनभिधानं बोध्यम्। शिल्पिनीति। नहि विषयकप्रशस्तशिल्पवति गानकर्तरीत्यर्थः। प्राप्तिर्वा ह्यतेति। सोपसर्गेतु पूर्वेणैव सिद्धम्। नन्वत्रापि सुपीति योगविभागात्कप्राप्तिः अतोनुपेति सूत्रारम्भ सामर्थ्येन तस्य कर्मण्युपपदे ऽप्रवृत्तेरिति भावः। अण् युगिति। सुपीति कोनोक्तयुक्तेः पा

तथा चषष्ठेरजकरजनरजःसूपसंख्यानमिति वार्त्तिकं प्रत्याख्यातुं भाष्यकृतोक्तङ्गितस्ये ओणादिका इति। गस्थकन्। गामादाग्रहणेष्वविशेषपिगैशब्द इति अयमेवेह गृह्यते। नतु गाङ् गताविति। गायकशब्दस्य गायत्यर्थविषयकशिल्पिन्येव निरूढत्वादित्याकरः। तदाह। गायनेरिति। जह्रात्युदकमिति। उदकादधिकवर्द्धनात्। प्लुसल्वः। लस्यन इति। भूयः सहचारात्। योहि यां क्रियां पुनः पुनरधितिष्ठति स तत्र प्रायेण कौशलं लभते तेनेन सह्रदपि यः सुष्ठु करोति तत्र वुन्। बहुशोपि दृष्टुं वृत्तिनेति भावः। कर्मण्यण्। कुम्भकार इति। अणि कृते कर्तृकर्मणोः कृतीति षष्ठ्यन्तस्य कुम्भशब्दस्य कारशब्देन समासः। ह्वावामश्च। कापवाद इति। आतोनुपसर्गे क इति प्राप्तिर्वाच्या। माङ् मेङो रिह ग्रहणम्। ननु मामानइत्यस्य अकर्मकत्वात्। गोदाय इति। अण् पुंवद्ब्रह्मज्य इति कप्रत्यये हि संप्रसारणे पूर्वरूपत्वे च कृते इयङ् ब्रह्मजिय इति स्यात्। न च अनेकाच इति यण् अङ्गस्यैकाच्त्वात्। आरम्भसामर्थ्यादिति। कर्तरि पूर्वेणैव सिद्धेरिह कर्तरि कृदिति न संबध्यते। अनिर्दिष्टार्थश्चास्या र्थे। धातोः स्वार्थाश्च भाव एव। नन्वेवं घञर्थे कविधानमित्यनेन गतार्थतेति चेन्न। वार्त्तिकं दृष्टा सूत्रकृतोऽप्रवृत्तेः। किंच। नित्यसमासार्थमिदम्। अत एव त्सुङ्न्ते नास्वपदविग्रहमाह। आखुना। मुख्यानमिति। नन्वेवं घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति वार्त्तिके स्थाग्रहणं व्यर्थं स्यादिति चेन्मैवम्॥ ॥ ह्वासन्त्त इति सूत्रे उप-

सर्गेपीत्यनेनात्र प्रकरणे सुप्युपपदे नोपसर्गाग्रहणमिति भावः। पूर्वेणैवेति। सुपीत्यनेनेत्यर्थः। स्वार्थे इति। अत एवास्य नित्यैकवचनान्तत्वं ननु पाकादिवद्-
॥ द्विवचनाद्यपीति भावः। नित्यसमासार्थमिति। नित्याधिकारस्योपपदसमासार्थमित्यर्थः॥

अकर्त्तरि कारके इति। अत एव प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थ इति भाष्ये व्याख्यानम्। छिद्भ्य इति। इत्संज्ञकचकारवद्भ्य इत्यर्थः। परि।
अकर्त्तरि कारके च रिता र्थत्वात् इह प्राचा आखूत्थं वर्त्तत इति नपुंसकं पठितं तत्त्वोत्रेणा च तथैवाभिनिवेशेन व्याख्यातं तदुपेक्ष्यम्। भा
ष्यादौ सर्वत्र पुल्लिङ्गस्यैवोदाहृतत्वात्। ल्युः कर्त्तरीमनिज्भावे कः किर्धीमादिनोऽन्यत इत्यमरकोशे भावे कस्य पुंस्त्वविधानात्। भावे न णकचिद्भ्योऽन्य
इति नपुंसकविधाने कस्य पर्युदासाच्चेति दिक्। अम्बाम्ब। कम्प्रत्यया न्तस्येति। तेन भूमिस्थितः गोस्थानमित्यादौ नेति भावः। यत्तु प्राचा स्थास
स्येति व्याख्यातं तदाकरविरुद्धं कप्रत्ययान्तस्येत्यग्रात् तत्वाव्याख्येयम्। द्विष्ठः त्रिष्ठ इति। एवं अम्बष्ठः आम्बष्ठः गोष्ठः भूमिष्ठः सव्येष्ठः अपष्ठः कु
ष्ठ इत्यादि। तुन्दपरिमृज इति। अत्र मृजेरजादाविति पाक्षिकी वृद्धिः मासाव्यवस्थितविभाषयानेत्येके। स्यादेवेत्यन्ये। प्रादन्यस्मिन्निति। अनुप
सर्गग्रहणेन पर्युदस्यते। सूत्रे विशेष्योपादानत्वादिति भावः। गोसंख्य इति। गाः सन्चष्टे इति विग्रहः ख्या प्रथन इत्यस्यानुसंपूर्वस्य प्रयोगो
नास्तीति न्यासकारः सार्वधातुकमात्रविषयोऽसौ धातुरिति चावोचाम। गापोष्टक्। गायतेरेव ग्रहणं ननु गाङ्गतौ गास्तुतावित्यनयोरनभि
धानात् पिबतेरिति। लुग्विकरणालुग्विकरणपरिभाषालब्धार्थकथनम्। उपपदपरिमाणनत्वाचेनिकमेव। कवचहर इति। कवचोद्यमन
ङ्क्यमाणं संभाव्यमानं वा वयोगमयति। तेनासत्यपि कवचग्रहणे कवचहर इति भवत्येव। हस्तिसूचकयोरिति। अन्यत्र तु सम्बेरना। कर्णेजपित्ता।
शमि धातोः शमि उपपदे धातुमात्रात्संज्ञायामच्स्यात्। भिक्षाञ्चरतीति। चरतिरत्र चरणपूर्वके ऽर्जने वर्त्तते। चरणेन भिक्षामर्जयतीत्यर्थः
सेनाचर इति। सेनाञ्चरति प्रविशतीत्यर्थः। पचादिष्विति। टविधानन्तु नित्यसमासार्थम्। इति वार्त्तिकमिति। कैयटहरदत्तादिरीत्योक्तम्।
माधवस्तु इष्टिरियमित्याह। परत्वादिति। यत्तु न्यासकृतोक्तं हेत्वादिषु तु पूर्वसूत्रेण ट एवेति। नेनकिङ्करीत्युपपन्नमिति। तन्न। पूर्वविप्रतिषे
धस्य निर्मूलत्वादिति भावः। यद्यपीह किंयत्तद्बहुषु अज्वेति प्राचा पठितं तत्र विकल्पोक्तिराकरविरुद्धा अयुक्ता च कर्मण्यणोऽपि प्रसङ्गात्॥ ८
भाषात्तवेति। अलासणि कत्वेन सकर्मकत्वेन चास्यैव ग्रहणम्॥ ॥ ॥ ॥

हरदत्तादिभिरिति। अनेनभाष्यकृतानप्रत्याख्यातमितिध्वनितन्तेनहेत्वादिग्रहणस्यसूत्रएवनिवृत्याचैषुकृत्रः प्रत्ययद्वयमपीत्याशयेनप्रा
चावेत्युक्तमिति सूचितम्। अतएव। अचाटस्यबाधादेव। तस्य। अस्मिन्पक्षेपचादिपाठपक्षे। एवञ्चपक्षभेदेफलैक्यायन्यासकृतापूर्वविप्रतिषेध

नचाजभावेदिवा विभेतिटइतिवाच्यम्। सूत्रेकिमादिग्रहणापनयनस्यहरदत्तादिभिरुक्तत्वात्। यत्तुपरिष्कुर्वन्तिहेत्वाद्यभावेऽ
चहेत्वादौतुटः। एवञ्चभिन्नविषयेणाचाटस्यबाधासंभवादुभयमपिभवतीत्याशयेनाचार्यैर्वेत्युपनिबद्धमिति। अत्रेदंवक्तव्यम्।
अजिधौहेत्वाद्यभावइतिविशेषणंनतावन्मुनित्रयेणदत्तंयेनभिन्नविषयत्वंस्यात्। पूर्वविप्रतिषेधस्तुनिर्मूलइत्युक्तमेव। अतएव
पुंयोगादन्यत्रकिंकरीत्यसाधुरेवेतिकैयटहरदत्तादयः। तस्मान्नैवंप्राचोग्रन्थस्यनिर्वाहः। यदितुतन्निर्वाहेआग्रहः। तर्हीत्यमुक्तिसं
भवः। इत्तौहिकिंचित्युत्सकेपठ्यते। अयवापचादिपाठःकरिष्यतइति॥ इहकिमादिग्रहणमपनीयपचादिष्वेवकिंयत्तदूहुषुकृ।
अइतिपाठ्यम्। वार्त्तिकमपीत्यमेवनेयमितितस्याशयः। अस्मिन्पक्षेकर्मण्यणंबाधित्वाचरितार्थमिदंवचनम्। हेत्वादिविवक्षा
यांपरत्वादेनंबाध्यते नपुंयोगंविनापिकिंकरीस्यादेव। व्याख्यानान्तरेतुनेत्युक्तमेव। एवञ्चविषयविशेषेव्याख्याभेदात्फलितम्।
विकल्पमाश्रित्यप्राचावेत्युक्तमितिसत्दयैराकलनीयम्। कर्मणिभृतौ। कर्मानुष्टतौपुनः कर्मग्रहणात्स्वरूपपरतेत्याह। कर्मश
इइति। अरुर्द्विषत्। वर्णग्रहणेनतदन्तविधेः सिद्धावप्यन्तग्रहणंमुनिन्ध्यइत्यादौह्रस्वेकृतेमुम् प्रवृत्त्यर्थम्॥ २ ॥

आश्विनइतिकश्चित्। प्राचावेत्युक्तमिति। बीजान्तरमपिपूर्वंसूचितमितिबोध्यम्। तदन्तविधेःसिद्धाविति। उत्तरपदाक्षिप्तपूर्वपदस्याचाविशेषणादितिभावः।
मुमप्रवृत्त्यर्थमिति। अन्यथापरत्वान्मुम्यनजन्तत्वान्नस्याद्ध्रस्वइतिभावः॥

म॰ श॰ समीपपर इति। समीपमात्रपरोक्ष्याख्यानादित्यर्थः। समीपशास्त्रविहितः। स च खित्तीति ह्रस्वविधायकविहितो ऽनुपस्थितत्वादित्याशयेनाह।
उ॰ तथा हि अन्तशब्दः समीपपरः। अन्तश्चासावन्तश्चेति विग्रहः। समीपः खित्यनव्ययस्येति सूत्रे विहितो यश्च तदन्तस्य मुम् इति व्याख्यायते। एवं
१०० च जनमेजय इत्यादौ स्वतो ह्रस्वेऽपि मुम्सिद्धये प्रथमं खित्तीति ह्रस्वः प्रवर्त्तनीय इत्यवधेयम्। शर्धंजहा इति। शर्द्धनं शर्द्धः। शृधु शब्दकुत्सायां
घञ्। यत्तु प्राचोग्रन्थव्याख्यातारः शाणोरुक्तं आकरे तु वातशुनीतिलशर्द्धेष्विति पठित्वा शर्द्धंजह इत्युदाहृतमिति। तद्भ्रमसात्। भाष्यवृत्त्यादिषु सर्वत्र तता
लव्यादिपाठस्यैव दृश्यमानत्वात्। शर्द्धपानशब्द इति माधवादिभिर्विवृतत्वाच्च दुर्गसिंहादिग्रन्थेऽपि तथैव दर्शनाच्चेति दिक्। यथासंख्यं वार
यितुमाह। मत्रेति। धेटश्चित्वादिति। अवयवे। चरितार्थत्वादिति भावः। खश्प्रत्ययान्तादेव धेटो ङीप् विधेयो नान्यत इति वर्द्धमानक्षीरस्वामिहरदत्ता
दयः। तेन पाघ्राध्मानिशप्रत्यये आतोऽनुपसर्गे क इति कप्रत्यये च टाबेव। अत्र च संप्रदाय एव शरणम्। नाडीमुष्ट्योश्च। यथासंख्यं नेति। स्तन
धेहे व भाष्ये वृत्तौ च स्थितम्। यत्तु यथासंख्यमिति सूत्रे नाडीमुष्ट्योरित्युदाहृतं भाष्ये तत्प्राप्तिमात्राभिप्रायेणेति बोध्यम्। उदि कूले। ननु कूल
स्यैव उच्छब्दस्यापि सप्तम्यन्तत्वात् उपपदत्वं स्यात् तत्रश्च रुजिवहिभ्यां सह यथासंख्यं स्यादिति चेन्न। एवं हि सति लाघवात् उत्कूलयोरित्येव ब्रू
यात्। नाडीमुष्ट्योरितिवत्। तस्मात् उदीति पञ्चम्याः स्थाने सप्तमी रुजिवहोरिति तु पञ्चम्याः स्थाने षष्ठी सत्त्वं च यथासंख्यसूत्रे कैयटस्य
श्यम्। किं च रुजेः सकर्मकत्वात् कर्मणीत्युपतिष्ठते तेन कूलं विशेष्यते नोच्छब्दोऽसत्त्ववाचित्वेनासंभवात्। तदेतदाह उत्पूर्वाभ्यामित्यादिना। अ
रुन्तुद इति। अरुन्तुदस्तु मर्मस्पृक् इत्यमरः। व्रणोऽस्त्रियामीर्ममरुरिति च। असूर्यंपश्या इति। गुप्तिपरं चेदम्। यदपरिहार्यदर्शनं सूर्यमपि
न पश्यन्ति सत्यपि सूर्यदर्शने प्रयोगो भवत्येव। यदा तु सूर्यदर्शनाभावमात्रे सूर्येतरस्य चन्द्रादेर्दर्शनम् वा विवक्षितम्। तदा खश् न भव- ति। अनभिधानात्॥ राम
समीपः खित्यनव्ययेत्यादि। कैयटस्य हृष्टमिति। अत्रारुचिबीजं उदि सति कूले उपपदे रुजिवहोरनन्तरः प्रत्यय इत्यर्थेन सतिः तेर्मा १००
न्थानोरिति नियमाच्चातिप्रसङ्गः। उपपदसञ्ज्ञालिङ्गं तु प्रथमान्तसौत्रीसप्तम्येव ननु सर्वापीत्यव्योन्नमपास्त्रितम्॥ ॥

उत्तरार्थत्वमेवोपपादयति । द्विषन्तप इति । सुप्यजातौ विनिसिद्धे इति । करुभिन्नीत्यत्र बहुव्रीहेश्चान्तोदात्ताज्ज्ञाति पूर्वादिनिङीषत अत्राप्यजातौ विनिनिषेधो
प्रियवशे । खशिप्रकृते प्रत्ययान्तरकरणमुत्तरार्थम् । द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथास्यातां शप् च माभूत् । नन्वेवमुत्तरत्रैव क्रियतामिति चेत्सत्यम् । इह
करणादन्यत्रापि सिद्धं किन्तु तदंतद्वार्तिकसुखेनार्थ । यमेरिति । असन्न्यायमिति । सन्न्यायानुगमश्चेति सूत्रेण सिद्धमिति भावः । वाचंयमपुरंदरौ च । अमन्तत्वमिति । अत्रहर
दत्तः खश्प्रत्ययोप्यनेनैवास्तु । नन्वेवं वाचंयम इत्यस्य व्रतविषयता न लभ्येतेति वाच्यम् । निपातनबलादेव तल्लाभसंभवात् । अथ वाचंयमो व्रते पुरन्दरश्चेति सूत्र्यताम्
। सर्वथापि वाचियमो व्रत इति सूत्रं पूःसर्वयोरित्यत्र पुरि दारे रित्यशास्त्र त्यज्यतामिति । पूःसर्वयोः । हविदारणे अयमेव गृह्यते नेन तु दृ भये दृङ् आदरे इत्येताद् इति संप्रदायः ।
आशितंभव इति । यावता ओदनेनातिथ्यादि भोजितो भवति स एवमुच्यते । इह वासरूपविधिना ल्युडपि । आशितभवनः आशितंभवनं सरूपत्वात्तु घञ् बाध्यत एव
वेति प्राञ्चः । यत्तु वर्द्धनि । कल्युट् तुमुन् खल्वर्थेषु वासरूपविधिर्नेति निषेधात् । ल्युड्युक्त इति । अत्रेदं वक्तव्यम् । यत्र घञादेर्बाधकत्वेन क्तल्युडादयः प्रसक्ताः ।
तत्र नित्यं बाधः नतु विकल्पेनेति तस्यार्थः । इह तु ल्युटोपवादः । खश् तत्र वासरूपन्यायो निर्बाध एव । अत एवेह जयादित्येन ल्युडुदाहृत इत्याहुस्तान्तावत् । सुन्ताया
भृ । विश्वम्भरः कैटभजित् । रसा विश्वंभरा स्थिरेत्यमरः । सुत्यनिमात्रमिति । तत्फलं तु स्वरावग्रहौ । रथन्तरमाज्यभारावसिष्ठः इह हि कृदुत्तरपदप्रकृति ।
स्वरेणान्तोदात्तमधीयते । रथमित्यवगृह्णन्ति । अस्वपदत्वे तु न विषयस्येत्याद्युदात्तः निरवग्रहता च स्यात् । इत्युक्तमिति । माधवाद्यनुरोधेनेत्यर्थः । मता
नरेत्विति । हृदन्तादिमते इत्यर्थः । चित्तेन्द्रियाव्यापारोपरमरूपौ शमदमाविप्यादि वेदान्तग्रन्थाश्चेहानुकूलाः । गमश्चयोगविभाग उत्तरार्थः । कुमारशीर्षयोर्णिनिः
। एतयोः कर्मणोरुपपदयोर्हन्तेर्णिनिः स्यात् । सुप्यजातावित्यादिभिः सिद्धे ताच्छील्याद्यभावेपि णिन्यर्थम् । शिरसः । शीर्षभावार्थं च वचनम् । लक्षणवा
तीति । सूत्रे लक्षणशब्दोऽभेदोपचाराज्जन्त इति भावः । जायाघ्न इति । जायामरणसूचकं पाणिरेखादिकं यस्यास्ति स जायां हन्तीति गौणो व्यवहारः एवं पतिघ्नीत्यत्रापि ।
शक्तौ हस्ति । शक्ताविति किम् । विशेषण हन्तीति हस्तिघातः । शक्तिग्रहणसामर्थ्याद्धि मनकर्षो विज्ञायते स्वबलेनैव हन्तुं या शक्तिरिति । कपाटघ्न इति । कं शिरः पादयति
प्रविशन इति कपाटम् । पाम्नन्तरे तु अटनेः पचाद्यच् ॥ ९९ ॥ दुर्वार इत्युरश्चेराह शिरसः शीर्षमिति । प्रविशन इति । षष्ठ्यन्तमेतत् । पाठान्तरे । कपाटेति पाठे ॥ श्रीरामः ॥

हरदत्तइति। बाहुलकात्कोरेहजिदित्यन्ये। गतिसमासेति। ख्युन्तस्य गतित्वादिति भावः। अगत्येति। एवञ्चानन्तोल्युटो विषयः केवलः ख्युनइति भावः। स्पष्टीकरि
ष्यतइति। एवञ्चतदर्थमेवेति भावः। नचात्रैवकर्तृप्रत्ययार्थन्तात् कर्मण्युपपदेएकोन्यत्रापरइति। नचभुवोऽकर्मकत्वात्कर्मणीत्यस्या संबन्धेउक्तार्थेफल।
भावेोर्थान्तरेसकर्मकत्वं प्याद्याद्यादीनांत्र्यर्थतामम्भवइतिवाच्यम्। अन्तर्भावितण्यर्थस्यकरोतिपर्यायत्वेन तेषांयोगेकर्मत्वस्यत्र्यर्थयोगस्यचसंभवादेवञ्चस

कवञ्चोस्येइत्यत्र योगविभागात्कोः कवादेशइतिहरदत्तः। आढ्यसुभग। प्रतिषेधसामर्थ्यादिति। तथाहि। आढ्यीकरणमितिरूपं ल्युट्ख्युनोस्तुल्य
म्। नचख्युनितुम हूस्वोस्यात्तामितिवाच्यम्। अव्ययपर्युदासात् अन्तस्याव्ययत्वात्। नचख्युनिउपपदसमासोविशेषः। ल्युट्यपिगतिसमाससंभ
वात्। उभयोरपिनित्यत्वाविशेषात्। नचस्त्रीप्रत्ययेविशेषः टिड्ढेतिसूत्रेणख्युनउपसंख्यानेनचङीपस्तुल्यत्वात्। नापिस्वरेविशेषःल्युटिलि
त्स्वरेणख्युनिनित्स्वरेणकृत्त्रउदात्तत्वाविशेषात्। नचोत्तरार्थमत्र्वाविस्युक्तमितिवाच्यम्। कैवलोत्तरार्थत्वेहितत्रैवब्रूयात्। तदेतदुक्तमिहेति।
भाष्यमतेत्विति। भाष्यवार्तिकस्वरसेनल्युडिष्टइतिनिर्णीतेऽत्र्वावित्यस्यकेवलोत्तरार्थत्वमगत्यास्वीकर्त्तव्यमितिभावः। कर्त्तरिभुवः। कर्तृग्रहणं
करणानुवृत्तिभ्रमनिरासार्थमुत्तरार्थञ्चेतिप्राञ्चः। वस्तुतस्तुव्यर्थमेव। अस्वरितत्वादेवाननुवृत्तिसिद्धेः उत्तरत्रापिअनुप्रयोगः स्पष्टीकरिष्य
ते। स्विष्णुचः स्वकारोमुमर्थः। नन्विकारोमास्तुइडागमेनरूपसिद्धेः। एवञ्चकारोपिमास्तुप्रत्ययस्वरेणेष्टसिद्धेः। नचकृत्योकेष्णुच्चार्वादयश्चे
ति स्वरसूत्रेऽस्यग्रहणंनस्यात् चकाराभावात्। इकारस्यलाक्षणिकत्वात्वत्वणत्वयोरसिद्धत्वेनस्नुइतिरूपाभावाच्चेतिवाच्यम्॥ ६ ॥
चैवप्रवृत्तिः स्यात्कर्मणीत्यस्यनिवृत्तौमानाभावात्कर्तृग्रहणाच्चसर्वत्रप्रवृत्तिरितिचेन्न। अन्तर्भावितण्यर्थस्यभुवोऽप्रसिद्धत्वेनात्रग्रहणाभावात् ध्वनितञ्चे राम.
दंभुवोभावइत्यत्रभाष्योरमिजयोरप्यन्तर्भावितण्यर्थत्वसंभवेनसंवेरमइत्यस्यासिद्ध्यापत्तेश्च। नहितत्रापिकर्तृग्रहणमस्तीतिदिक्। इडागमेनेति। नचे १०१
काराभावेसस्यचत्वंस्यात्। व्याख्यानेननिर्णयसंभवेनास्तनेतिभावः॥ ६ ॥ ७ ॥ ६ ॥

तत्सामर्थ्यादिति। तत्सामर्थ्याच्च प्रतिपदोक्तपरिभाषायास्तदनुबन्धकपरिभाषाया असिद्धपरिभाषायाश्च बाध इति भावः। चिन्त्यमेतदिति। स्पष्टञ्चेदं भाष्ये। कर्त्तरि
प्रत्यय इति। तत्सामर्थ्यादस्य निवृत्तिरिति भावस्तदाहसुवन्त इति॥ क्विपापिसिद्धेरिति। न च यङ्लुगन्ते स्वरे विशेषः। नकारप्रत्याख्यानपरभाष्यप्रामाण्येन स्पृशो यङ्
लुगभावस्य ध्वनितत्वात्। इति दिगिति। अत एव सन्नहृदिषेति सूत्रे सदादिषु सुपग्रहणं कर्त्तव्यमिति भाष्यं सङ्गच्छते। कर्मकर्त्तरीति॥ भाष्ये त्वद्यारोपितप्र

कृतेपि इकारेऽनुबन्धपरिभाषया लङ्गःआदौ सुचस्यैव ग्रहणस्य न्याय्यत्वात्। इकारोच्चारणासामर्थ्यादस्यापि ग्रहणमिति चेत् हन्तैवं च्चेका
रमात्रमस्तु तत्सामर्थ्यादस्यापि ग्रहणे सिद्धे किमिकारेणेति। चिन्त्यमेतत्। यत्तु समहूरदन्तेनोक्तषत्वणत्वयोः सामर्थ्यादस्य ग्रहणमिति। तदापात
तः सुजपेस्तयास्सुजुक्तौ प्रक्रियालाघवेन सामर्थ्यायोगादिति दिक्। निरुक्तमिति। ननु स्पृशेः सकर्मकत्वात्कर्मण्युपपदे इत्येवोचितमिति चेत्।
अत्र प्राञ्चः। पूर्वसूत्रात्कर्त्तरीत्यनुवर्त्तनेन तच्चव्यर्थं सत्कर्त्तृप्रत्ययार्थं संपद्यते। कर्मण्युपपदे एकः कर्त्ता करणादौ चापर इति कर्त्तृप्रत्ययः। ए
वञ्च सुबन्त उपपद इति फलितं भवतीति। वस्तुतस्तु व्यर्थोयं यत्नः मन्त्रस्पृगित्यादेः क्विपापि सिद्धेः क्विन्प्रत्ययो यस्मादिति बहुव्रीहिबलादे
वकुत्वसंभवादिति दिक्। मरुगिति। कर्मकर्त्तरि प्रत्ययः रूढ्यर्थानुगुणत्वात्। युसदिति। पूर्वपदादिति षत्वं तु न भवति। छन्दसीत्यनुवृत्तेः आ
दितेत्यादिविषय इत्यत्र तु सुषामादित्वात्पत्वमिति माधवादयः। उपनिषदिति। सदिरप्रतेरिति षः। अग्रग्रामाभ्यामिति। सराषाङ्गमणीरितिनि
देशेन ज्ञापितमेतत्। निरूपिप्रत्ययविषयञ्चेदम्। तेन कर्मण्यपि णत्वं न। ग्रामनायः। अदोनन्ते। विट्स्यादिति। जनसनखनक्रमगमोवि
हिति पूर्वसूत्रादनुवृत्तेः। पूर्वसूत्रे तु छन्दसि सहइत्यतश्छन्दसीत्यनुवर्त्तनं तदिति व्याख्यातः। अत एवेह तत्रोपन्यस्तम्॥ श्री० ॥ श्री० ॥

षणपहेस्त्वनुपपत्तिर्देशितानिर्देशेति। असञ्ज्ञात्वात्पूर्वपदादित्यस्याप्राप्तिरिति भावः। नीरूपप्रत्ययेति। नीरूपोयः क्विपतद्विषये मित्यर्थः वासरूपसूत्रे भाष्ये।
ग्रामनाय इति दन्त्यपाठादिति भावस्तदाह। तेनेति। सम्पति तु भाष्यमूर्द्धन्यपाठो दृश्यते तस्य प्रामाणिकत्वे नीरूपाद्धातोर्विहितप्रत्ययविषयमित्यर्थः। तेनेत्यस्याय
वयेत्यादिदण्डकपठितनयतेर्धातोरिति शेषः। अत्र निर्णयो बहुश्रुतैः कार्यः। पूर्वसूत्रे। जनसनखनक्रमेति सूत्रे। आकरो वृत्त्यादिः॥ श्री० ॥ श्री० ॥

म॰श॰
उ॰
१०२

अडासादश्चर्यमिति। अडनसंबन्धइत्यर्थः तेनयस्माच्छासेरङ्‌ तत्रैवेत्वमितिभावः। दृष्टोयइति। परस्मैपदेदृष्टेभ्यःसर्त्यादिभ्यःपरस्यच्लेरङित्यर्थइत्यभि
मानः। वस्तुतःपरस्मैपदेष्वाङित्यन्यत्रनिरूपितम्। पावनइत्यस्यवनिपासिद्धिमाश्रित्येत्वमवकारादावित्यस्यभाष्येप्रत्याख्यानादाह। भाष्यकारीये

विजुपेकुन्दसि। आतोमनिन्क्वनिपवनिपश्चेत्यधिकृत्याह। अन्येभ्योपीति। सुशर्मेति। सुष्ठुशृणोतीतिविग्रहः। प्रातःएतीतिप्रातरित्वा॥
वाहभ्रडिति। वाहादश्वानभ्रश्यतीतिविग्रहः। दृन्तोनुवहाभ्रडितिपाठः। वहस्कन्धः। अन्येषामपिदृश्यतइतिपूर्वपदान्तस्यदीर्घइति
हरदत्तः। आशामइति। आशिषिलिङित्यादिनिर्देशेनेदंसिद्धम्। नन्वशासइइदङ्‌हलोरित्येववाच्यम्। तत्रपरस्मैपदिनएवशासेर्ग्रहणात्। तदीजनुआडासादश्चर्यम्। यद्यपिसर्तिशास्तीतिसूत्रेएयग्योगकरणात्पदद्वयेप्यङितिसिद्धान्तः तथाप्युत्तरार्थेनयापरस्मै
पदग्रहणानुवृत्तेरप्याकरेस्पष्टतयापरस्मैपदेदृष्टायःशासिःतस्मात्परस्याङितिनिष्कर्षः। अतएवाशास्तेइत्यादौनेत्वमितिभावः।
सुस्वाविति। ओःसुपीतियण। स्यःकच। शंस्याइति। क्विपिलुप्तेघुमास्थतीत्वंनस्यानिवद्भावस्यानल्विधावितिनिषेधात्। प्रत्ययल
क्षणसूत्रन्तुनियमार्थमितिनिष्कर्षात्। यत्तुकैयटेनोक्तमीत्वमवकारादाविनिवचनात्भाष्यकारीयोदाहरणप्रामाण्याद्वाप्रत्यय
लक्षणेनईगन्तेति। ननुअतृणेडित्यादिसिद्धयेप्रत्ययप्राधान्येऽस्विद्ध्यर्थंप्रत्ययलक्षणसूत्रमितिपक्षेवोद्यम्। एतेनमित्राणिशास्तिमि
त्रशीरित्यत्रइत्वंव्याख्यातम्। निष्कर्षेतुशासइत्क्ङिति। ततःअङितिनियमार्थमिदम्। अजादौचेदङ्येवनान्यत्रेति। हल्ग्रहणंमास्तुइत्यवधे
यम्। स्यादेतत्। सुपिस्थःक्विप्चेतिसूत्राभ्यांकक्विपोसिद्धौतत्राह। शमीति॥ ९ नि। इतिपक्षेइति। धीदेधानेध्यायतेर्वेति। ध्यायतेःसंप्रसारणमितिवा राम॰
र्तिकस्यभाष्यात्घुमास्थेत्यत्रहलीत्यस्यानजादावित्यर्थेलक्षणेतिपक्षेइत्यपिवोद्यम्। तत्पक्षेप्रत्ययलक्षणसूत्रस्यनियमार्थत्वेपिस्थानिवद्भावस्य। १०२
सुलभत्वात्। एतेनप्रत्ययलक्षणसूत्रस्याल्विधौविध्यर्थत्वेन। निष्कर्षेत्वितिनियमार्थत्वेत्वित्यर्थः। कक्विपाविति। वासरूपन्यायेनेतिभावः॥ ६ ॥

कृतत्वमिति। शङ्कतेति॥ नन्वङ्कित्वाशङ्कायाः परिव्राजिकेत्यत्र परत्वात्प्राप्तमित्यर्थः। बाधेनेति। नन्वकस्य परत्वाद्बाधेन सरूपत्वाच्च वासरूपाप्रवृत्त्या नित्य
बाधप्रसक्तिस्तेन न्यायेन सुलभ इति वाच्यम्। धातुग्रहणाद्धि द्वान्तरकल्पनेनेन तत्सामर्थ्याद्धेत्वादिषु परत्वात्प्राप्तस्य टस्येव वासरूपन्यायेन पदात्प्राप्तक्विपोऽप्यत्र
बाधात्। नच पुरस्तादपवादन्यायेन टस्यैवायं बाधको न क्विप इति वाच्यम्। येन नाप्राप्तिन्यायेन क्विप एव बाध इत्यस्यापि वक्तुं शक्यत्वात्तस्माद्बाध सामा
न्यचिन्तयोरपि स बाधक इति। स्थः कश्चेति। बाधकबाधनार्थम्॥ नन्व स्थः कश्चेति चोऽव्यर्थः। वासरूपन्यायेन कस्याभावे क्विपः सिद्धेरिति वाच्यम्॥
अस्य धातुग्रहणप्राप्तापवादत्वेऽपि क्विपपवादत्वाभावे धातुग्रहणबाधितक्विपश्च विना साधयितुमशक्यत्वादिति स्पष्टं भाष्ये। इति भविष्यतीति। अन्त

धातुग्रहणसामर्थ्याद्धि धातुमात्रादभवन्नच् प्रत्ययो हेत्वादिषु कृत्त्वं यथा बाधते तथा तिष्ठतेः कः क्विपावपि बाधेतेति भावः। न
न्वेवं शमि धातोरित्यस्यानन्तरं स्थः कश्चेति सूत्र्यताम्। चकारेणाच्समुच्चिते सवर्णदीर्घेण संस्यादिति भविष्यति। एवं चोत्सर्गापवा
दयोः समानदेशतया सन्दर्भशुद्धिः इत्वाभावार्थं च न यतनीयमिति महल्लाघवमिति चेन्न। मैवम्। अच्कावशक्ताविति सूत्रेणाश
शंस्यादत्रोऽनरपदान्तोदात्तत्वापत्तेः॥ १५ वत्वे धातुत्वाच्छंस्य इत्यादावातो धातोरिति लोपसिद्धिः स्थानिवत्त्वं तु न। अपूर्वविधित्वादि

ति भावः। इत्वाभावार्थं चेति। धातुग्रहणसामर्थ्यात्क्विपो प्राप्तेरिति भावः। मैवमिति। अयं भावः। पूर्वधर्मावच्छिन्नोद्देश्यकविधिसत्त्वेन कृदतिङ्
सूत्रस्य भाष्ये सत्यास्थानिवत्त्वस्य दुर्वारत्वात्। नच विधायावित्यादावियङ्गनयारीत्या पूर्वरूपस्य स्थानिवत्त्वं स्यादिति वाच्यम्। आकारात्पूर्वं वृत्तिध
र्मावच्छिन्नोद्देश्यकत्वाभावात्। इवर्णान्तधातोर्हिसः। एतेन जुहुवतुरित्याद्यसिद्धिरत्र पक्षे इत्यपास्तम्। धियावित्यत्रैकादेशस्यानेहल्त इति दीर्घप्रवृ
त्तेश्च। भीईभियइति स्थानिवत्सूत्रस्य भाष्ये तु सौत्रत्वादिङ्। लोके त्वीदृशः प्रयोगोऽसाधुरेव। परनिमित्त इत्यत्र परोऽस्थानिभूत एव गृह्यत इत्यत्रत
मानम्। तत्र कौण्डिन्यन्यायस्यापवादविषयत्वेनेदमविषये प्रवृत्तेरिति दूषणान्तरमाह। अच्कावित्यादि॥ श्री०॥

गतिकारकेति। स्याधातोस्तन्भौविनण्यर्थेन्वेशंशब्दार्थस्य कर्मत्वेनेन कारकत्वमितिभावः। उपसर्गान्तरमिति। पञ्चम्यन्तोपसर्गपदेन भिन्नवाच्यन्तरशब्द
कृद्ग्रहणे गतिकारकपूर्वस्यापीतिभसंस्याशब्दस्याजन्तत्वात् क्विबन्तेनन नञ्समासे तु नञ्पूर्वपदप्रकृतिस्वरः सिद्ध्यति। आमन्त्र्ययितेति। ना
च्छीत्यस्य विवक्षितत्वात्तॄन्। अत एव ब्राह्मणानिति कर्मणि षष्ठीन कृता। भाष्यविरोधादिति। उक्तं हि भाष्ये। सुपीति वर्त्तमाने पुनः सुब्ग्रह
णं किमर्थम्। अनुपसर्ग इत्येवं तरभूत् इह सुब्भात्रे यथा स्यात्। उदासारिण्यः प्रत्यासारिण्य इति। प्रसिद्ध्यश्चेति। एवञ्च स्यापीत्यादि प्रयोगा
श्च पिनिर्बाधा एव। अमरस्त्वप्रायुङ्क। लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति। यत्तु सप्तपदार्थी टीकायां स्यापीत्याङ्प्रश्लेषादुदासारिण्यः
प्रत्यासारिण्य इति च तत्साधु इत्युक्तम्। तस्योक्तिसंभवमपि चिकीर्षता भ्रमपरंपराशरणीकर्त्तव्या। तथा हि सुब्ग्रहणे उपसर्गनिवृत्त्यर्थेति तावदेको
भ्रमः। तथा सति पाणिनीयानुसारिणामित्यादौ असंगतिमाशंक्य उपसर्गग्रहणं केवलोपसर्गपरम्। इह तु पाणिनीयादिपदान्तरमप्यस्तीति
प्रसादादिग्रन्थं पुरस्कृत्य तत्र तस्य केवलपदस्य असहायपरतया नैकोपसर्गसद्भावे णिनिर्भवत्येवेत्यपरो भ्रमः। एवं सति उत्प्रतिभ्यामाङि
सत्तेरुपसंख्यानमिति स्वोपजीव्यग्रन्थविरोधापर्यालोचनम्। उपसर्गेपीत्येतदंशव्यावृत्तिफलकमिह सुब्ग्रहणमिति चेत् तर्ह्युपसर्गान्तरङ्कः
च्चिदाश्रित्यैव णिनिः प्रवर्त्तते। तत्त्वनेकमप्युपसर्गमितिमतःशरीरस्यापर्यालोचनं च तन्मूलमित्यास्तां तावत्। धातुकारिणीति। एतच्चज्ञा
पकमिदम्। आच्छेरिति सूत्रे हि तच्छीलात्प्रघकृत्साधुकारी गृह्यते। तच्चैतत्ताच्छील्यं विनापि णिनौ सत्येव सङ्गच्छते। ब्रह्मणि वद इति। वाचनिकमे
वेदम्। अताच्छील्यार्थमिति एतच्च केयटहरदत्तादिग्रन्थे स्पष्टम्। यत्तु भट्टवार्त्तिके ब्रह्मवादिशब्दस्य तच्छीलत्वार्थत्वं तत्साधुकारिपरतया
व्याख्यानं दृष्ट्वा आच्छेरित्यधिकारेपि तद्विधायकं वार्त्तिकमस्तीति केचिद्भ्रमन्ति तद्भाष्यादर्शनमूलमयुक्तम्। भट्टपादानां त्वयमाशयः। सुप्यजा
ताविति सूत्रेण ताच्छील्ये णिनिः॥ उपसंख्यानेन ज्ञापकेन वा साधुकारिणि आवश्यकाधमर्ण्ययोर्णिनिरिति आवश्यके णिनिस्तु तद्धर्मपर्येव
स्यसमासस्तेनोपसर्गभिन्नमित्यर्थः। णिनेरात्येवेति। साधुकारिशब्देइतिशेषः। साधुकारिणीति ब्रह्मवादिशब्दे णिनिरितिशेषः। णिनिश्चेति। तत्रैवब्र

यद्यपि णिनिरिति। अनेन वार्त्तिककृता चारितार्थ्यं दर्शितम्। नन्विति। अत एवात्ममान इति सूत्रे यगर्थकर्मकर्त्तृग्रहणमिति वार्त्तिकं स्यनैव सिद्धिमाश्रित्य
भाष्ये प्रत्याख्यानम्। अन्यथा तन्नादेरू प्रत्ययवारणाय वार्त्तिकमावश्यकमेव स्यात्। कर्मणि षष्ठ्येति। कर्त्तृषष्ठ्या तु न समासः आत्मग्रहणसामर्थ्यादिति
भावः। इति प्राप्तमिति। पुंवत्कर्मधारय इत्यस्य न प्राप्तिः समानाधिकारस्यैव कर्मधारयत्वात्। अत्राभेदान्वयाभावेपि पूर्वपदार्थस्यैवोत्तरपदेनाभिधाना

एवं त्वं ब्राह्मणिवद इति वार्त्तिकेन तत्र क्त्वोस्त्यादिविरहे यद्यपि णिनिरूपसंख्यानस्तथापि श्रीशुक्रीत्याना च्छौ स्यादिषु थर्थेषु सुलभ इति। एवं च
फलितार्थकथनपरं भट्टवार्त्तिकं न त्वाकेरिति सूत्रव्यापारदर्शनपरमिति स्थितमामनन्ति बहुलग्रहणानुवृत्तेरिह दैवादिकस्यैव ग्रहणं न तुना।
नादिकस्य। तेनोत्तरसूत्रे स्ववित्स्यते बभवतिनन्तू प्रत्ययस्तदाह। मन्यत इति। आत्ममाने। मननं मानः आत्मशब्दः स्वपरः कर्मणि षष्ठ्या समा
सः। तदाह। स्वकर्मक इत्यादि। प्रत्ययार्थत्वेन संनिहितः कर्त्ता सपदार्थः। चादिति। यद्यपि वा सरूपविधिना लभ्यत एव णिनिस्तथाप्यवि
च्छेदाय समुच्चीयते तेन करणे यज इत्यादौ णिनिश्चानुवर्त्तते न तु खशिति भावः। पण्डितमात्मानमिति। एकस्याप्यात्मनः स्वरूपेण कर्त्तृत्वे
पण्डितत्वविशिष्टरूपेण च कर्मत्वं बोध्यम्। कालिंमन्येति। स्त्रियाः पुंवदिति प्राप्तं पुंवद्भावं बाधित्वा परत्वात् ह्रस्वः। यत्त्वत्र काङ्मा।
निनोश्चेति प्राप्तः पुंवद्भाव इति तस्तदक्तनोक्तं तत्प्रामादिकमेव। दिवामन्येति। अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिस्वभावात् कर्मत्वम्।
इत्येकाचः। अमग्रहणमिहानुवर्त्तते। तत्रैकेनाम् विधीयते। अपरेण प्रत्ययो विशेष्यते तदाह। खाद्यम्वदिति। भाष्यकारेति अयं भावः

वस्तुतः सामानाधिकरण्यमस्त्येव। एकविशेष्यकप्रतीतिजनकत्वस्यैव सामानाधिकरण्यपदार्थत्वात्। अत एव च च्यन्ते महद्भूतेत्यादौ प्रकृतेः कर्त्तृत्वेप्य
महच्छब्दार्थस्यैव महच्छब्देनाभिधानात् सामानाधिकरण्यप्रयुक्तपुंवत्त्वसिद्धिरिति दिक्। प्रत्ययः। प्रत्यय इति सूत्रस्थप्रत्ययपदार्थरूप इत्यर्थः॥

म.श. स्त्रियां वर्त्तेत इति । पुंयोगादिति सूत्रबलात्स्वलिङ्गत्यागेन स्त्रियां वर्त्तेत इत्यर्थः । तथेहेति । भाष्यप्रामाण्यादिति शेषः । अस्विधिसामर्थ्यादिति । स
उ. मासंसंज्ञाप्रातिपदिकसञ्ज्ञोत्तरं मध्ये जातस्य तन्मध्यपतितत्वात्तद्ग्रहणेऽपि तदवयवत्वाभावज्ञापनेनेति भावः । न च स्वमोरित्यस्याप्यर्थवद्ग्र
१०४ ग्रहणज्ञापनद्वारा प्रवृत्तिः स्यादिति वाच्यम् । येन नाप्राप्त्या मध्येऽपवादन्यायेन च सामासिकस्याप्रवृत्तिनिमित्तज्ञापनेऽपि स्वमोरित्यस्याप्रवृत्तिनि
मित्तार्थज्ञापने मानाभावात् । अर्थवत्परिभाषात्वनित्यत्वादत्र वर्त्तते । न चान्तरङ्गे लुक्त्वयमसिद्धः उत्तरपदाधिकारे ऽन्तरङ्गपरिभाषाया अप्र

यथा मृषादयः शब्दाः पुंयोगात् स्त्रियां वर्त्तन्ते प्रष्ठो गणिकेति तथेह स्त्रीशब्दः परित्यक्तस्वलिङ्गः क्लीबः सन् कुले वर्त्तते तत्र ह्रस्वो नपुं
सकस्य इति ह्रस्वः पुमत्तुन । अपवादेनाबाधात् । स्वमोर्नपुंसकादित्यमो लुक् । न चैवं गामन्यत इत्यादावपि सुपो धातुप्रातिपदिकयोरिति
लुक् स्यादिति वाच्यम् । अस्विधिसामर्थ्यादेव तद्बाधात् । स्त्रीशब्दस्येह क्लीबत्वे प्रमाणं तु भाष्यमेवेति दिक् । भूते । धात्वर्थस्य विशेषण
मिदम् । धातोरित्यधिकारात् । भूतार्थे विद्यमानाद्धातोरित्यर्थः । सोमेनेति । सोमेन लताविशेषेण यागं कृतवानित्यर्थः । अग्निष्टोमेने
ति । अग्निष्टोमसंस्थाकेन यागेनापूर्वं भावितवानित्यर्थम् । उक्तं च काशिकायाम् ॥ ॥ इत्तेरन्यथापरत्तपइत्यादावनुस्वारो न स्यादिति स्पष्टं

भाष्ये । यत्र प्रातिपदिकस्यैव लक्षणा मानसिद्धा तत्र स्वलिङ्गत्यागो यत्र तु पदस्य लक्षणा तत्र स्वलिङ्गात्याग इति मर्यादेति दिक् । वस्तुत उत्तरपदाधिका
रेऽस्याः परिभाषाया नास्तीत्युक्तिर्भाष्ये उक्तिप्रत्युक्तिक्रमेण पूर्वपक्षिण इति स्पष्टं तद्विदाम् । अत एव त्रिपाद्यां कार्यकालपक्षेऽपि न अन्तरङ्गपरिभाषाप्र
वृत्तिरित्यस्य विसर्जनीयसूत्रे भाष्ये सिद्धान्तितत्वान्नेदं युक्तमित्यपास्तम् । पूर्वपक्ष्युक्तित्वेनेष्टापत्तेः । एवं च स्वमो सिद्धत्वाल्लुगभावे स्त्रियमन्यद्इत्ये राम. १०४
वात्रान्तरङ्गपरिभाषाया अप्रवृत्तौ मानाभावादिति बोध्यम् ॥

करणमिति। यजेस्त्यागकरणकव्यापारे शक्तिस्तत्र्यापाररूपभावनाया भाव्याकांक्षायान्धात्वर्थस्यकरणत्वेनैवोपस्थितेः स्वतःपुरुषार्थत्वाभावाच्च सुखरूपःस्वर्गो भाव्यत्वेनान्वेति। त्यागस्यकरणत्वञ्च भावनाभाव्यनिर्वर्तकत्वमेव। सर्वत्रकरणानामीदृशमेवकरणत्वम्। संस्थावचनस्यापि ज्योतिष्टोमशब्दस्यतद्व्यारोपेणत्यागसामानाधिकरण्यात्करणत्वम्। स्वर्गादेः कर्मत्वमपि भाव्यत्वरूपमेव। नतुफलाश्रयत्वरूपम्। अतएवेदृशानांकामान्तपदे नैषोल्लेखइति अग्निष्टोमः फलभावनायांकरणमिति। एतच्चभावकर्मप्रक्रियायामेवोपपादितम्। कर्मणिहनः। पितृव्यघातीति। अत्रकाशिका। कुत्सितग्रहणंकर्तव्यम्। इहमाभूत्। चोरंहतवानिति। यद्यपीदंभाष्येनास्ति तथापिशब्दशक्तिस्वाभाव्याल्लभ्यतइत्याहुः। चतुर्विधइति। अयमाशयः। इहसूत्रेष्वनन्तरपूर्वब्रह्मादयस्त्रयस्तावत्। ततोनन्तरंप्रकृतित्वाद्भूतिः। ततः परिशेषाद्भूतइति। क्विप्सर्वोत्तनिर्देश्यःविधेयत्वात्। तदेवंवचनव्यक्तिः ब्रह्मादिषूपपदेषुहन्तेर्भूतेक्विविति। एवंस्थितेयत्रैवकारस्ततोन्यत्रनियमइतिन्यायेनभियमात्रभवत्। अनन्तरेभवति। ततश्चब्रह्मादिष्वेवेत्यवधारणेहन्तेर्सदनन्तरंनिर्दिष्टत्वादुपपदान्तरसंबन्धनिवृत्तिफलकोनियमोभवति। ब्रह्मादिषुहन्तेरेवभूतइतितुअनन्तरत्वाविशेषेपिप्राधान्यादुपपदनियमः ब्रह्मादिषुहन्तेर्भूतएवक्विविति तुआनन्तर्येक्विप्प्रहन्त्योरपिशिष्टोपिप्राधान्यात्प्रत्ययनियमः। ब्रह्मादिषुहन्तेर्भूतेक्विबेवेतिवचनव्यक्तौकालनियमः। सोयंप्रकृत्युपपदप्रत्ययकालनियमानांविवेकः। अगृह्यमाणविशेषत्वात्तुचतुर्विधस्यापीहग्रहणम्। तत्रब्रह्मादिष्वेवहन्तेरेवेतिप्रकृतिनियमेभूतइत्याश्रयणात्। कालान्तरेउपपदान्तरेपिभवत्येव। पुरुषंहतिहनिष्यतिवापुरुषहाः। रिहयोरिहयोगविवक्षणः। ब्रह्मादिषुहन्तेरेवेत्युपपदनियमेपिभूतइत्याश्रयणात्। कालान्तरेधात्वन्तरादपिभवत्येव। वृत्रंजयतिजय्यतिवावृत्रजिदिति। भूतएवक्विविति प्रत्ययनियमेपिब्रह्मादिषिसुकेः पुरुषहा अतिहेतिप्राग्वत्। भूतेक्विबेवेतिकालनियमेपिउपपदान्तरेभूतेपिप्रत्ययान्तरंभवत्येव। पितृव्यंहतवान्पितृव्यघातीति। सोपपदश्चप्रत्ययोनियमेनस्यावस्येते। निष्ठानुभवत्येववृत्रंहतदिकृ। लभ्यतइति। एवञ्च मारशीर्षयोरितिसूत्रमपिकृत्सायामिति भूतइतिसूत्रेभाष्येध्वनितम्। परिशेषादिति। तस्याप्युद्देश्यत्वेनक्विपः २२ वातिम्नि॰। पूर्वमेवनिवेशादितिभावः। इत्यवधारणेइतिनियमेइत्यर्थः। कालनियमइति। आनन्तर्यादितिभावः। निष्ठात्विति। मध्येपवादन्यायेनतन्निवृत्तेरभावादि

प्रकृतिकालेति। तथाच भाष्यम्। उभयतो नियमो यं ब्रह्मादिष्वेवेति। क्विवेति। ददिगिति। दिगर्थेस्तु दृशिग्रहणे ननिर्वाहस्यागतिकगतित्वात् विधायकत्वमेवै
भाष्यकारस्तु प्रकृतिकालनियमावेव अशिश्रियत्। तस्यायमाशयः। धातुकालौ हि नेह सूत्रे श्रुतौ किंतु प्रकरणलक्षणजघन्यप्रमाणेनोपस्थितौ अतस्त
योरेव उपरोधो न्याय्यः। न तूपपदप्रत्यययोः श्रुत्युपस्थापितत्वात्। एवं न्यायोपबृंहितेन भाष्येण सह विरोधात् वृत्तिमतमुपेक्ष्यमेवेति कैयटे स्थितम्।
यत्तु हरदत्तेनोक्तम्। धातूपपदविषयं नियमद्वयं भाष्ये प्रदर्शितमिति। तत्र धातुकालविषयमिति वक्तव्ये उपपदग्रहणं प्रामादिकमित्यवधेयम्। सुक
र्मे। त्रिविध इति। धातुनियमस्त्विह नेष्यत इति भावः। सोमे सुञः। इहापि चतुर्विधो नियम इति वृत्तिः। एवमुत्तरसूत्रेपि। कर्मण्यग्न्याख्यायाम्। श्येनचिदिति। स
मुदायायमाहवनीयधारणार्थ इष्टकानिर्मितस्थलविशेषे निरूढः। दृशेः क्वनिप्। अन्येभ्योपि दृश्यत इति सिद्धे नियमार्थमिदं क्वनिबेव यथा स्यात्। तत्सह-
निर्दिष्टमनिनादिः सोपपदं चाणादिर्माभूदिति। निष्ठा तु भवत्येव परं दृष्टवानिति। एवं स्थिते विश्वदृश्वनयनाचयमेवेत्यादौ विश्वं पश्यन्तीति लटा विग्र
हेपि न क्षतिः। प्रत्ययांतरनिवृत्त्यर्थं सूत्रमित्येव वृत्तिकारादिभिर्व्याख्यातत्वात्। कालान्तरनिवृत्त्यर्थत्वस्य चाभियुक्तैरनुक्तत्वादिति दिक्। मन्दुरायामिति
वाजिशालातु मन्दुरेत्यमरः। पुमनुजेति। इह जनिः सकर्मकः। अनुरोधविशिष्टजननवृत्तित्वात्। अन्येष्वपि दृश्यते। अपिशब्द इति। यत्तु अन्तात्या-
न्ताध्वेति प्रकरणे अन्यत्रापि दृश्यत इत्युपसंख्यानं तत्र भूतकालं विनापि यथा स्यादित्येवमर्थम्। वस्तुतस्तु प्रकृतसूत्रस्थस्य अपिग्रहणस्य सर्वोपाधि
व्यभिचारार्थत्वात्तद्वार्तिकमनेनैव गतार्थं विभाषितं च्चेदं मिकोगुणवृद्धीति सूत्रे जनेर्डं प्रक्रम्य गमेरप्ययं डो वक्तव्य इति वदता भाष्यकारेण। ए
वञ्च प्रकृतसूत्रस्थमन्येभ्योपि दृश्यत इति वार्तिकमपि गतार्थं बोध्यम्। निष्ठायामण्यदर्थे। भावकर्मणोरिति यद्यपि याज्याकृगित्यादौ करणा
दपि बाहुलकादन्यद्भवति तथापि तयोरेवेति वचनाद्भावकर्मणोरेव साक्षादुपात्तोऽर्थ इति स एवेह विवक्षित इति भावः। क्षिस्ये। क्षि निवास
गत्योः। द्वयोरपि ग्रहणम्। क्षितः काम इति। अन्तर्भावितण्यर्थात्कर्मणि क्तः। एतच्च अक्षितोतिसनेदिममिति मन्त्रव्याख्यायां माधवग्रन्थे-
व भाष्ये तूदासीनमिति। अनेनैवेति। अन्येष्वपीति सूत्रेण। द्वयोरपीति। क्षी हिंसायामित्यस्यापि ग्रहणं बोध्यम्॥ ७ ॥ ७ ॥ ११ स्पष्टम्॥ ६॥

ननिष्ठेति। एकदेशत्वादिति भावः। द्वाविंशतिरिति। यद्यपि गृधृ इत्येतावपि तत्र दृश्येते तथापि एकीयमतमेतदिति भावः। रदाभ्यामित्यनेनतत्र सिद्धिरित्यन्ये। पुनातेरिति। पूत इत्य
भावे तु क्षिन इत्यमेनेत्युदाहार्यम्। रदाभ्याम्। इह रदाभ्यामित्यनेन तकारो विशेष्यते न निष्ठातेन चरितं मुदितमित्यत्र न। तकारस्येटा व्यवहितत्वात्। तदेतदाह। परस्य निष्ठात
स्येति। एकविंशतेरिति। ऋकारादि पुल्वादयो द्वाविंशतिः। तन्मध्ये पूञं विहाय ल्वादयो ज्ञेयाः। जीन इति। सिद्धत्वात्रिपत्वाच्च संप्रसारणे कृते संयोगादेरित्यस्याप्राप्तिः। गून इति। गुपु
रीषोत्सर्गे। विनष्ट इति। धातूनामनेकार्थत्वात् पुनातेर्विनाशो वृत्तिः। मिनो ग्रासः इति। पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनवशाद्बन्धने नुकूलो भवति तदा कर्मण एव।
कर्तृत्वं बोध्यम्। यस्य विभाषा। यस्येत्याद्ये धातुकापेक्षा षष्ठी यदीयस्याद्ये धातुकस्येत्यर्थः। उदक्तमिति। उन्वितमित्यर्थः। क्षून इति। क्षीण इत्यर्थः। द्यूतमिति। विजिगीषया।
हितत्वाक्षाः पात्यन्त इति गम्यते विजिगीषा। क्षीवादिष्विति। क्षीबृ मदे। कृश तनुत्वे। लाघृ शक्तौ उल्लूवेः। पम्भ्यः क्तः। ननु फुल्ल विकसने अस्मात् उल्लाघेश्च पचाद्यचि इतराभ्यामिगु
पधलक्षणे कप्रत्यये च फुल्लादयः सिद्धा इति तत्किं सूत्रेणेत्यत आह। सूत्रतन्त्विति। निष्ठार्थे मित्युपलक्षणं फुल्लवानिति रूपस्य निष्ठाच व्यञ्जनादिति स्वरस्य सिद्धार्थमिति वो
द्ध्यम्। वेत्तेस्त्विति। तथाच भाष्यम्। वेत्तेस्तु विदितो निष्ठा विद्यते विन्न इष्यते। वेत्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विंदतेरिति। पूर्व इति। श्र्युकः किती ति नेट्। मूर्त इति। आदितश्च।
ति। मत इति। क्ष्वेडित इति। भुज्यत इति भोगः। प्रतीयत इति प्रत्यय इति। कर्मसाधनावेतौ विवृत्याचष्टे। भोग्ये प्रतीते चेति। भिन्नं शकलम्। भिदेः क्ते तत्वाभावो निपात्यते। भि
न्नं शकलखण्डे इत्यमरः। भिन्नमन्यदिति। विदीर्णमित्यर्थः। ऋणमाधमर्ण्ये। अधमर्णः सम्प्रदमृणं यस्य सोधमर्णस्तस्य भाव आधमर्ण्यम्। तेन च व्यवहारविशेषो लक्ष्य
ते। तेनोत्तमर्णोपि सिद्धाति। पादे ऋतमर्ण इति निर्देशाच्चेह लिङ्गम्। स्फायः स्फी। कथं तर्हि स्फीतकाम इति। स्फीत इति प्रसिद्धिः स्फीतिः। आख्यातं नण्यन्तादचडेः। य
स्येति। निरः कुष इति विकल्पितेड्त्वादिति भावः। उषित इति। यजादित्वात्संप्रसारणम्। शासिवसीतिषः। क्षुधित इति। एवञ्च तत्स्यालमेषा क्षुधितस्येति प्रयोगमुद्दृङ्ख्य
क्षुधे भावे कि पितान्तस्कादित्वादितजि तियद्धानुद्वृत्ति पूक्तः तद्द्युवैव। समानन्यायतया क्रुधितादावुपयोक्ष्यत इति बोध्यम्। अञ्चेः उदित्वात् क्त्वायां विकल्पे प्राप्ते निष्ठा
यायस्य विभाषेति वचनम्। अञ्चित इति। नाञ्चेः पूजायामिति नलोपनिषेधः। लुभः। तीषसहेति। क्त्वायां विकल्पे निष्ठायां निषेधे च प्राप्ते वचनम्। पूङः क्त्वाश्च। श्र्युकः कि
तीति निषेधे प्राप्ते वचनम्। पूङः क्त्वाच। उत्तरार्थमिमि॥ ९. यः। कप्रत्यये चेति। भावेद्यमर्थे कप्रत्यये चेत्यपि बोद्ध्यम्। रूपस्येति। इद्दंष्ट्रिकारो केऽस्व भिप्रायेण। भाष्यमिति।

भोगेति सूत्रे इति शेषः। आदितश्चेतीत्यस्यानिडिति शेषः॥

अन्यथेति। यद्यपि कर्त्तो सिद्धस्तथापि तद्गतनिमित्तत्वविधीयत्वेन विशेषविहितेन कर्त्तृगतनिमित्तत्वेन भावकर्मगतद्कु निरूपितं निमित्तत्वं बाध्यत इति भावः॥

इदं तु नक्षासे इत्येव सिद्धमिति भावः। क्लैवेति। ननु निष्ठा। चानुकृष्टत्वादिति भावः। शेश्यितइति। एरनेकाच इति यण्। च्वादिति। अन्यथानक्तौ
णिडुन्यन्यायेन बाधः स्यादिति भावः। भ्वादिरिति। स्नेहनमोचनयोरिति पठितः। स्विद्यतेस्त्विति। गात्रप्रक्षरणे पठितस्य। न चायमपित्रीदिति वाच्यम्। ह
रदत्तग्रन्थविरोधादिति भावः। अत्र हरदत्तः। ञिष्विदा स्नेहनमोचनयोरिति दिवादिर्गृह्यते ननु ञिक्ष्विदा अव्यक्ते शब्दे इति भ्वादिरपि मिदिना साहचर्यादित्या
ह। तच्चिन्त्यम्। भ्वादिष्वपि मिदेः पठ्यमानत्वात्। तस्मादविशेषादुभयोर्ग्रहणं न्याय्यम्। तदेतदाह। दिवादीभ्वादी चेति। स्विदादीनामादितश्चेति निषेधात्सेण्निषाद
त्वेऽभ्यत आदिकर्मणि निष्ठेत्याह ता। क्षुब्धस्वान्त। अनायाससाध्य इति। क्षुण्णमौषधजातमुलोदके प्रक्षिप्य सद्योभिषुतं पूत्वाय नीयते तत्फाण्टमित्याहुः। वेदभाष्य
इति। तद्धै नवनीतं भवति घृतं वै देवानां फाण्टं मनुष्याणामिति शतपथश्रुतेर्व्याख्यायामित्यर्थः। अन्यत्रेति। मन्यादेरवाच्य इत्यर्थः। याहितमिति। वाह
प्रयत्ने। धृषिशसी वैयात्ये। विरुद्धं यातो वियातः अविनीतः तस्य भावो वैयात्यम्। नियमार्थं चेदं वचनम्। ञिधृषा प्रागल्भ्ये शसु हिंसायां अनयोरादि
तश्चयस्य विभाषेति सूत्राभ्यामिट्प्रतिषेधसिद्धेः तदेतदाह। अविनयस्य वेति। नास्तीति। अनभिधानादिति भावः। अत्र प्रमाणमाह। अतएवेति। अतए
व नियमार्थमिदं सूत्रमिति वृत्तिः। अन्यथा विभाषाभावादिकर्मणोरिति विकल्पे प्राप्ते नित्यार्थं स्यादिति भावः। माधवस्त्विति। एवं हरदत्तोक्तं चिन्त्य
मुद्भूतमिति भावः। दृढ स्थूल। बलमस्यास्तीति बलः। अर्शआद्यच्। तदाह। बलवतीति। तस्येति। तकारस्येत्यर्थः। हस्येति। ननु ह्रो ढ इति ढ
त्वे ढो ढे लोपेनैव सिद्धिमिति चेत्। नैवम्। तथाहि सति ढलोपस्यासिद्धत्वेन द्रढिमेत्यत्र रऋतो हलादेर्लघोरिति रभावो न स्यात्। परिदृढ व्यगत।
इत्यत्रत्यपि लघुपूर्वादिति अयादेशो न स्यात्। परिदृढस्यापत्यं पारिदृढी कन्येत्यत्र गुरूपोत्तमलक्षणः ष्यङ् स्यात्। अतो ऽसिद्धत्वनिवृत्तये।
हलोपो निपात्यत इति भाष्यादौ स्थितम्। अतएव ढलोप इति सूत्रे भणः किं दृढ इति प्राचो ग्रन्थस्य प्रामादिकेनाम वोचाम्॥ ६॥ विकल्पे प्राप्ते इति
धृषेरादित्वादिति भावः। चिन्त्य समुद्देयमिति। अवैयात्ये भावादावादित्व फलस्य सत्त्वादिति भावः। ह्रो ढ इति ढत्वे इति। घत्वाभावमात्रं निपात्यतामिति भावः॥ ६॥

॥धातुविशेषणार्थइति। श्यन्निर्देशाद्वारा धातुविशेषत्वाभार्थइतिभावः। अभ्युपेत्येति। श्तिपंविनापिसेवेत्यादौशपानिर्देशवत् श्यनानिर्देशेस्यकर्तुमशक्यत्वेन।
प्रभौ। निपातनमितिहलोपेप्रयोजनमितिप्राग्वदेवबोध्यम्। कृच्छ्रगहनयोः कषः। कृच्छ्रंदुःखंतत्कारणञ्चगृह्यते। कषतिर्हिंसार्थः। कष्टोमोहइ
ति। दुःखहेतुरित्यर्थः। अभेः। अविदूरस्यभावआविदूर्यंब्राह्मणादित्वात्ष्यञ्। अस्मादेवनिर्देशान्ननञ्पूर्वादितिनिषेधोनभवति। सामीप्यइत्येव।
तुनोक्तम्। नातिदूरस्यासङ्गतापत्तेः। तदेतत् ध्वनयन्व्याचष्टे। नातिदूरमासन्नञ्चेतिएवञ्चसामीप्येइतियाचक्षाणस्यप्राचोन्यूनतेतिभावः। णेः। अधी
यतइत्यध्ययनम्। बहुलवचनात्कर्मणिल्युट्। वादान्त। शमुदमुउपशमे। पुरीआप्यायने। दिवादिः। श्रुरादिश्च। दसुउपक्षये। स्पशबाधने। छदअपवारणे। ज्ञपि
मित्संज्ञायासुक्तः रुष्यम। रुषरोषे। अस्यतीषसहेतिविकल्पितेट्त्वात् यस्यविभाषेतिनिषेधेप्राप्तेविकल्पोविधीयते। अमगत्यादिषु। अमरोगेइतिचौरादिका
स्तुनगृह्यते। सकावइत्यधिकारादित्याहुः। तूर्णइति। ञित्वरासंभ्रमे। ञ्वरत्वरेत्यूठ्। आदितश्चेतिनिषेधेप्राप्तेविकल्पः। आदित्त्वस्यफलन्तुआत्मनेपदमात्रम्। न
देतसार। फलंमन्दमिति। तथाच राधत्यादिवत् ह्रस्वानुबन्धत्वमेवन्याय्यमितिभावः। संघुष्टइति। अविशब्दनेपिसंपूर्वस्यपरत्वादयंविकल्पएव।
आस्वान्तइति। आङ्पूर्वस्यस्वनेर्मनोभिधानेप्ययमेवविकल्पः परत्वात्। प्रह्वन्तइति। ह्लादीसुखे। ईदित्वान्नेट्। द्यतिस्यति। श्तिपानिर्देशोधातुवि
शेषणार्थः। नहितेनविनाश्यन् सुलभः। यत्तुप्रसादकृतोक्तंश्तिपानिर्देशोयङ्लुङ्निवृत्त्यर्थः। दादतःसासतइति। तन्न। यङ्लुकिहीदाभाव्यम्।
दादितःसामितइति तत्रतिकितीतिवचनान्नास्तिप्रसङ्गः। अभ्युपेत्यब्रूमः। दोदद्घोरितिविधीयमानआदेशःअनेकाच्त्वात्सर्वस्येतिनिर्विवादम्। न
चात्रसाभ्यासस्यप्रवर्तेत। हन्तेर्ङ्य लुगन्तस्येववधिः। तथाचदादत्तइतितदुदाहृतंरूपंकथमुक्तिसंभवंलभेत। दधातेर्हिः। श्तिपानिर्देशोधेटोनिवृ
त्त्यर्थः। नीम्यनुवृत्तेर्यङ्लुकिन। दाधितः। अत्रापिप्रसादकृताश्तिपानिर्देशस्ययङ्लुङ्निवृत्त्यर्थत्वाद्दाधीतइतिघुमास्थेतीत्वमुदाहृतन्तत्पूर्वो
वदेवहेयम्। दोदद्घोः। दद्आदेशस्यान्तस्यवनतुतदधानतः। संहितायाम्तुल्यत्वेपिप्रक्रियायान्दोषादितिप्राञ्चः॥ ९. श्तिपानिर्देशाद्दिभावमभ्युपेत्यर्थः। साभ्या

मस्थिति। यत्नत्रिमाधवीयरीतिर्बोद्धम्॥

म॰ श॰
उ॰
१०७

तथा चाहुरिति। भाष्यकृत इति शेषः। आवर्तत इति। एतेनादेः परस्येत्यादेस्तु स्यादित्यपास्तम्। विवक्षितेनेति। प्राप्ताप्राप्तेन चेति सूत्रप्रयोगादिति भावः।
भाजनम्। भोजनपात्रम्। इदं त्विति। नचानेन सिद्धे तत्र तिङ्ग्रहणं व्यर्थं लुङ्लङ्भ्यां बाधापत्तेः अनुबन्धोऽतिभिन्नकृतौपदेशिकासरूपत्वस्यैव
तथा चाहुः। तान्ते दोषो दीर्घत्वं स्यादान्ते दोषो निष्ठानत्वम्। धान्ते दोषो धत्वं स्यात् स्यान्निर्दोषत्वात् स्यान्तो ग्राह्य इति। तदनुसारेणाह। दथ स्यादिति। व
स्तुतस्तु सर्वं पक्षाद्इह सूपपाद इत्याह। तान्तो वेत्यादिना। अच उपसर्गात्तः। अच इत्यावर्तते। तत्रैकं पञ्चम्यन्तमुपसर्गं विशिनष्टि। अपरं षष्ठ्यन्तं
स्थानित्वाभावेतिन्याचष्टे। अजन्तादित्यादिना। यद्वा द्वितकारकीयमादेशः। तेनानेकाल्त्वात्सर्वस्य वो भविष्यति। अच इति तु अनाचृत्तं पञ्चम्यन्त
मेवास्तु। नचैवं अपाभीत्युत्तरसूत्रेऽपि सर्वादेशत्वापत्तिः। अच इत्यनुवर्त्य अचः परस्य यकारस्यादेशविधानेन तत्रान्त्यस्य संयोगान्तलोपे पूर्वस्य
जश्त्वे रूपमिदम्। अच इत्तमिति। आदिकर्मणि त्यनेन प्रदत्तमित्यस्यैव विशेषणम्। धौतमिमिति। दधातेर्हिरित्यत्र श्लुविकरणस्य निर्देशाद्दो हि
नेः। नापि दत्तः। तद्विधौ दद इत्युपादानादिति भावः। भरोस्वरीति। अनेन पाक्षिको धलोप इत्यर्थः। प्रकृत इति। कर्तुमारब्धवानित्यर्थः। नदीस्त इति नदी
स्नाने कुशल इत्यर्थः। गङ्गाप्राप्त इति। प्रपूर्वं आप्लृव्याप्तौ। प्राप्तिरपीह सूत्रे गतिशब्देन विवक्षितेति भावः। उपोषित इति। वसतिक्षुधोरिडिति नेट्। शाशि
वसीति नेष। मुकुन्दस्येति। आस्यतेऽस्मिन्निति आमितं आसनमित्यर्थः। यायतेऽस्मिन्निति यातं मार्गः। भुज्यतेऽस्मिन्निति भुक्तम्। भाजनम्। अधिकरणवा
चिनश्चेति चिषष्ठिकर्तरि षष्ठी। स्विण्णः। इद इति। आदितश्चेति दितइति नेट्। इष्ट इति। तीषसहेति वेट्कत्वाद्यस्य विभाषेति नेट्। सुयजोर्ङ्वनिपाइ
ह सुसूगतौ सुप्रस्य वैरूप्यं योगितिनिरनुबन्धकयोर्ग्रहणं प्राप्तमनभिधानादुभयपदिना साहचर्याद्वा न भवतीत्याह। सुनोतेरिति। ङ्कारः सुनोतेर्गु
णप्रतिषेधार्थः पकारः स्वरार्थस्तुगर्थश्च। छन्दसि लिटिति सूत्रस्यार्थमाह। भूतसामान्य इति। नच छन्दसि लुङ्लङ्लिट इत्यनेनैव गतार्थता
धातुसम्बन्ध इत्यधिकारे स विधिः। इदन्तु धातुसंबन्धं विनापि भवतीति विशेषात्। त्रिमुनिमतमिति सूत्रकृता छन्दसीति प्रक्रान्तत्वादुत्तरसूत्रे
वासरूपसूत्रे ग्रहणेन तस्येह प्रवृत्तेः तस्य बलिटा लुङ् बाध्यत इति दिक्॥ ६०७ ॥ ६०७ ॥ ६०७ ॥ ६०७ ॥ ९ भाषाग्रहणाच्च ॥ राम॰ १०७

सिद्धान्तितत्वादिति। आस्वानित्यादौ गुणस्तु ऋच्छत्यृतामित्यत्र ऋकारप्रश्लेषेण ऋधातोः पुनर्विधानाद्बोध्यः। हरदत्तेत्यादि। अत्राह चिवीजन्तु विभाषापूर्वाह्णेति सूत्रे भाष्ये पपृक्षआसातं पपि वद्रूप्यमिति लौकिकविग्रहे क्वसुप्रयोगात् लोकेपिक्वसुः उक्तभाष्यप्रामाण्यात्तत्प्रयोगात्तेभ्यश्छन्दस्येवक्वसुः कानच्च। तु छन्दस्येव। उत्तरसूत्रन्तेभ्योन्यत्र क्वचिदेवेत्यर्थज्ञापनार्थमिति। गतानुगतिकतयेति। गतमनुलक्षीकृत्य गतिर्यस्य तत्त्वेनेत्यर्थः। द्वित्वाभाव इति। आ

॥ भाष्यवार्तिकयोरपि क्वसुकानचोश्छन्दस्युभयथेति वचनात्सार्वधातुकत्वेन सार्वधातुकमपिदिति ङित्वादेव आजिवान् इत्यादौ नलोपादीनां ङित्कार्याणामन्यथासिद्धिमाशङ्क्य कितीत्यौवोन निर्णिनाण इत्यादौ ऋच्छत्यृतामिति प्राप्तस्य गुणस्य बाधनार्थं ङित्करणमिति सिद्धान्तितत्वात्। अत एव किन्करणसामर्थ्याद्भाषायामपि क्वसुकानचोस्त इति केषाञ्चिदुत्प्रेक्षा नादर्तव्येति हरदत्तमाधवादिग्रन्थे स्पष्टमिति भावः। कवयस्त्विति। गतानुगतिकतयेति भावः। अत्र भाचादाश्वान् साह्वान् मीढ्वांश्चेति सूत्रमुपन्यस्तमे। तच्च यद्यपि छन्दसि भाषायाञ्चाविशेषेण वर्तत इति वृत्त्यादौ स्थितं तथापीहोपेक्षितम्। छन्दस्येव प्राचुर्येण दाश्वानित्यादिप्रयोगाणामुपलम्भात्। उक्तसूत्रस्य द्वित्वाभावादिनिपातनमात्रोपक्षीणत्वात् क्वसोश्च छान्दसतायानिर्णीतत्वात्। अनेनैव क्वसोरपि विधाने गौरवात्। यदाहुः। अन्यार्थं विधिसत्त्वेनानेकार्थविधिस्समइति। अत एव हि तत्सूत्रमनावश्यकम् तथा च पदकाराः। साह्वान् विश्वा इति मन्त्रे साह्वानिति ह्रस्वश्चिन्त्यमिद इतिसिद्धिः। उपेयिवाननाश्वान्। इडिति। वलादिलक्षण एवेट् नेड्वशि कृतीति प्रतिषिद्धः क्रादिनियमात्प्राप्तः वस्वेकाजाद्घसामिति सूत्रेण कृत द्वित्वानाम् एकाचामादन्तानाङ्घसेश्च वसौ इट् स्यान्नान्येषामिति नियच्छता प्रतिसिद्धः॥ ६ ॥

दिनेड्भावर्दीर्घौद्धत्वानि अयं वृत्तिग्रन्थोपि क्वसोर्लोके प्रवृत्तौ साधक इति बोध्यम्। दिगिति। दिगर्थस्तत्पदविभागस्यापि लौकिकत्वात्तत्र दीर्घस्योचित्येपि तदभावाय एवोदरादित्वस्यावश्यकत्वेन तेनैव सर्वसिद्धाविदं व्यर्थमिति। वस्तुतोनलक्षणेन पदकारा अनुवर्त्या इति न्यायेन तथा पदपाठो भ्रान्त्यैवेति बोध्यम्। नेड्वशीति इदमेकाच्च उपदेशे इत्यस्याप्युपलक्षणम्॥

इतिपरेदिति। अत्रारुविवीजन्तुर्ईयतुरित्यादौ यणादेशेसमावकाशः अचःपरस्मिन्निति पूर्वस्यैवविधौनपूर्वपरविधौ। एवञ्च सवर्णदीर्घेकृतेनेकादिनियमादिटि कृतदीर्घस्येयादेशोनिपातनादितिबोध्यम्। तेनेति। अकृतव्यूहपरिभाषयेतिभावः। वस्तुतइ घपिनसक्षतिरितिनिरूपितम्। व्याख्यानमेवेति। अतएवैकादिष्टस्यईयभव तीतिभाष्येदीर्घोच्चारणमसन्धिश्चेतिबोध्यम्। सामानाधिकरण्यमिति। अप्रथमान्तेनेत्यादिः। आदेशयोरितिनिङ्रूपादेशोपस्थाप्यकर्तृकर्मणोरप्रथमान्तसामाना

नियत्वान्नहिनेकृते।नेकाच्त्वात् नचसवर्णदीर्घेणैकाच्त्वंदीर्घइणःकितीतिदीर्घेकृतेतत्सामर्थ्यात्सवर्णदीर्घोभावइतिपरत्वाद्यणात्स्यएवेटइहप्रतिप्रस यतेनापूर्वोनिधीयते।तेनसंप्रसारणविषयेनभवति। अतएवोदाहरति। उपेयुषइति। अविवक्षितमिति। व्याख्यानमेवात्रशरणम्। वचेः कर्तरीति। नतुभावकर्म णो। एतच्चनिपातनाल्लभ्यम्। लटः शतृशानचौ। सामानाधिकरण्येसतीति। यद्यपिकेवलस्यलटःप्रयोगाभावात्सामानाधिकरण्यन्दुर्लभम्। तथापिआदेश योः शतृशानचोस्तदृष्टास्यानिन्यपितत्कल्प्यते। पचन्तमिति। विक्लृत्यनुकूलवर्तमानव्यापाराश्रयमित्यर्थः। पचतीतिविग्रहप्रदर्शनन्तुईषत्साम्येन। क्रि याप्रधानमाख्यातंसत्वप्रधानानिनामानीतिसिद्धान्तात्। आनेमुक् अतोयेयइतिसूत्रादनुवृत्तंपञ्चम्यन्तमपिअतइतिपदंषष्ठ्याविपरिणम्यते। आनइतिस प्तमीत्वात्। नचविपरीतंशङ्क्यंपञ्चम्याःपूर्वसूत्रेचरितार्थत्वात्। सप्तम्याश्चाचरितार्थत्वात्। तदेतदाह। अङ्गस्यातइति। यत्तुप्राचाअदन्ताङ्गस्येतिव्याख्यान तन्न। पचमानइत्यादौअदुपदेशात्सार्वधातुकमनुदात्तमितिशानचःस्वरस्यासिद्धिप्रसङ्गात्। तत्पक्षेहि अङ्गभक्तोमुक् सचतदेवनव्यवदध्यात्। तद वयवमकारन्तुव्यवदध्यादेवस्पष्टञ्चैतदाकरे। लडिति। यद्यपिप्रथमान्तंप्रकृतेनतथापिषष्ठ्याविपरिणम्यतइतिभावः। पुनरिति। एवंहिपुनर्वि धिःसंपद्यते। सचप्रथमेनाप्राप्तेपिक्वचित्प्रवृत्त्यर्थइतिभावः॥ ९९, धिकरण्याभावादाह शतृशानचोरिति। तस्यानिलकारेप्रकृत्यर्थंप्रतिप्रधानभूतकर्त्रोद्यभि धायकत्वमेवकल्प्यते। एवञ्चकल्पितसामानाधिकरण्यानुवादेनशत्रादिविधिरितिभावः। इतिसिद्धान्तादिति। वस्तुतोविग्रहेविस्त्यनुसार्येवविशेष्यविशेषणभावः। क्रियाप्रधानमितितुलोकेर्थबोधायप्रयुज्यमानाख्यातविषयमेवेतिनिरूपितम्। व्यवदध्यादेवेति। स्वरोद्देश्यकविधेरभावात् हल्स्वरप्राप्तेरभावाच्च नव्यस्तन। स्याविद्यमानवत्वम्। एवंहिपुनरिति। इदंवृत्त्यनुसारिभाष्येतु तदभावेप्रत्ययान्तरत्वमेवस्यादेवञ्चकर्मणिशानज्नस्यात् अतोलटः शतृशानचावितियोगविभा

अनुबन्धग्रहणेति । एकानुबन्धकेत्यस्याप्युपलक्षणम् । नत्विति । लटइतिनिवृत्तेरितिभावः । वासरूपन्यायेनेति । नचभिन्नार्थत्वादनयोर्नेनिङ्पवादत्वमितिङिः हिंसं
स्यायुष्मदाद्यर्थेपिभासतेनकृतीतिवाच्यम् । युष्मदाद्यर्थस्यसमभिव्याहृतपदेनसंख्यायास्तद्वत्तरसुपाप्रतीत्याःविशेषादितिभावः । लादेशेष्विति । प्रत्ययविषयत्वात्त
प्रथमेति । उपलक्षणमिदम् । अप्रथमान्तेनसामानाधिकरण्याभावेपीत्यर्थः । तेनकुर्वतोऽपत्यङ्कौर्वतः । कुर्वतोभक्तिः कुर्वद्भक्तिः । कुर्वाणभक्तिरितिप्र
त्ययोत्तरपदयोरपिसिद्धमिति । विदेः शतुर्वसुः । स्थानिवत्वादेवसिद्धेवसोरुगित्करणंवसोः संप्रसारणमित्यत्रक्कसोरपिसामान्यग्रहणार्थम् । अनुबन्धग्र-
हणपरिभाषापितत्सामर्थ्यादेवनप्रवर्तते । पूङ्यजोः । एवंलादिवत्सतन्त्रोपन्नत्वशत्रादिवल्लादेशस्तयाहिसतिसतिवेतिवाच्यंस्यात् । पचतेयजतेइतिति
ङेऽपियथास्युः । नचवासरूपन्यायेननिर्वाहः । लादेशेषुतदभावस्यआकारेस्थितत्वात् । किंचलादेशत्वभावकर्मणोरपिस्यात् । कर्तर्येवचेष्यते । एवा-
न्वानशः वक्ष्यमाणशतुश्चस्वातन्त्र्यंबोद्ध्यम् । यत्तुशानन्नोलादेशत्वेलसार्वधातुकानुदात्तत्वंस्यादितिवदन्तितच्चिन्त्यम् । निस्वरस्यजागरूकत्वात् । अ
नुदात्तेत्वेइशपत्रेश्चेत्यस्याप्राप्तेः । नन्वेवमादेशत्वाभावे सोमंपवमानइत्यादौकर्मणिषष्ठीस्यादितिचेन्नैवम् । नलोकेतिसूत्रेतृन्नितिप्रत्याहारनिर्देशाद्दूत्युक्त
त्वात् । नान्त्योस्य । चानशोलादेशत्वाभावेनअनात्मनेपदत्वात्परस्मैपदिभ्योपिविधानमितिध्वनयन्नुदाहरति । शत्रुनिघ्नानइति । सुञोयज्ञसंयोगे । सु
नोतेः शतृप्रत्ययः स्यात् । यज्ञेनसंयुज्यमानेकर्तरिच्चेत् । नन्विहसुञोयज्ञेइत्येवास्तुयज्ञविषयकश्चेत्सुनोत्यर्थइतिव्याख्यायसुरांसुनोतीत्यादेर्व्याव
र्तयितुंशक्यत्वात् । अत्राहुः संयोगग्रहणंप्रधानकर्तृसंप्रत्ययार्थम् । तेनयजमानादन्यत्रनभवतीति एवंच्चाप्रधानेकर्तरिलटः शतृशानचावित्यनेना
पिनभवति । संयोगग्रहणसामर्थ्यादितिहरदत्तः । सुन्वन्तमवतीत्यादिनामेकवचनान्तानामधिकारित्वनिर्बोधनम् । बहुवचनान्तानान्तुस्यलविशेषएव
संभवतित्स्त्रेयितुमुदाहरति । सर्वेसुन्वन्तइति । तद्याचष्टेसर्वेइत्यादिना । अर्हः प्रशंसायाङ्मिः । अर्हतिचौरोवधम् । आङ्केः । शीलादीनांत्रयाणांविशेष
णसमर्थयितुंनिर्दिष्टेस्त्रिभिः तच्छब्दैः प्रकृतिभूतधात्वर्थोनिर्दिश्यते ॥ ६ सादेशेः प्रवृत्तिरितिभावः अनुबन्धग्रहण परिभाषेति । एकानुबन्धपरिभाषेत्यर्थः ।
स्थानअमिति । लटइत्यस्यनिवृत्तेरितिभावः । यज्ञेनसंप्रयुज्यमानेइति । कर्तरिशत्रन्तस्येतिशेषः अप्रधानेकर्तृत्विष्ट ॥ अधिकारीति । यजमानेत्यर्थः ॥ ६ ॥

इत्येवेति। ष्ट्वस्यार्थेनेत्यर्थः। प्रत्ययमाहुरिति। अत्रारुविवीजन्तूदात्तपाठस्य बहुसंमतत्वाभावः। साहचर्याच्चेति। चिनुणकर्मकाणामिति भाष्योक्तेः। सकर्मकाच्चेत्य
अस्कड्न्त्। क्रमद्दनिकरोतेर्ग्रहणं प्रसिद्धेर्नेदिंसार्थस्य। इहपव्यादयस्त्वयय उन्मूर्वाः पठ्यन्ते। तथोदः पचयतमदङ्त्येववक्त्येप्रत्येकमुत्पूर्वस्य पाठउपसर्गो
न्तर निवृत्त्यर्थः। तेन समुत्पत्तिरुरितिनभवतीत्याहुः। इहपचेरनन्तरं पतिस्तावः पठ्यते न तथा च भट्टिः। उत्पतिष्णुसहिष्णूचचेरुः स्वरदूषणाविनिकाशिदा
सोपि। ससज्जुरस्वस्मुणानामेलानामुत्पत्तिरिति। केचित्तु तस्यानेदानं पठित्वा पदगनावित्यस्मात्प्रत्ययमाहुः। पारयिष्णवइति। अयामन्तालवाय्येत्यायः। नैत।
दिति। चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः। गकारेति। नन्वेवङ्कारचत्वेस्यासिद्धत्वात्पाहशिवेत्युक्तेस्यादिति चेत्सत्यम्। सौत्रोयंनिर्देशः। तथा च वार्तिकम्। श्लो
गित्वान्तस्य दीकारः कङिनोरीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यः श्रुकोऽनिट्त्वङ्गोरितावितिजसि। त्रस्युरिति। नेड्शीतिनेट्। ग्रामित्यष्टाभ्यः। इतिशब्द
आद्यर्थः। सम्पृचा परिदेवीतिदेवदेवनेभ्वादिः। ण्यन्तस्य दीव्यतेस्तुनेहग्रहणम्। लाक्षणिकत्वात्। अण्यन्तैः साहचर्याच्च। वीकष। कषहिंसार्थः। लसश्लेषण
क्रीडनयोः। कत्थश्लाघायाम्। स्रम्भुविश्वासे। अपेचलषः। लषकान्तौ। प्रमाथीति। मन्थविलोडने। निन्दहिंस। इहसूत्रेविनाशोति विपूर्वस्य नशेर्ण्यन्तस्या
भाविनाणिलोपेननिर्देशः। अकारस्त्वागन्तुकः। केचित्तु विनाशीति ण्यन्तमेव पठन्ति। परिवादात्तु वदेर्ण्यन्तपाठो निर्विवाद एव। असूयतिः कण्ड्वादियगन्तः
। निन्दादीनामसूयान्तानां समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। सादेनत्। असूयतेरेव वुञ्विधेयोनेतरेभ्यः। निन्दादीनां ण्वुलैव सिद्धेः। नहितत्र सितिस्वरमित्यस्वरयो
विशेषोस्ति। उभययाप्याद्युदात्तत्वात्। असूयतेस्तु ण्वुलिप्रत्ययात्पूर्वमुदात्तं वुञितु आदिरुदात्त इति विशेषः तत्राहाण्वुलिति। तृजादयो नेति। नकेवलं ण्वु
लविषयमेवज्ञापकड्न्तुप्रत्ययमात्रविषयकमित्यर्थः। देविक्रुशोः। दीव्यतेर्हेतुमण्ण्यन्तस्य देवृकूजने इत्यस्य चुरादिण्यन्तस्य च ग्रहणम्। शब्दन इति। शब्द
शब्दने चुरादिः। अनुदात्तेतश्च हलादेः। आदिग्रहणाभावे हलन्तादित्यर्थः स्यात्। ततश्च जुगुप्सनइत्यादि न सिद्ध्येत्। अस्ति चेहानुदात्तेत्त्वम्। गुपादिषु वयवेषु
अचरितार्थस्यानुबन्धस्य समुदायविशेषकत्वात्। जुचङ्क्रम्य। क्रमिद्रमीयङन्तौ॥ १. पिवोद्यम्। इति विशेषइति। न च तत्त्वचौलादिषु तद्बाधकाः घासरूपन्यायेन सि
द्धेरितिभावः। ण्यन्तस्य चेतिपूर्वं सूत्रस्य प्रत्ययान्तसाहचर्यात्तु देवनेरितिभावः। नसिद्ध्येदिति। नचतत्रापि तिष्ठुरित्यादिवत्परत्वादिड्भाव्नोतीति वाच्यम्। धादिभ्यो युजस्ग

राम·
१०९

अयथाश्रुतभाष्यमिति। भवतिहिरेणयुचः समावेशइतिहिभाष्येउक्तम्। त्रयाणामेवेति। त्रयाणामपीत्यर्थः। व्याख्यानादिति रूढिप्रकारास्ताच्छीलिकाइत्याद्येति।
परस्परमिति। निन्दादिसूत्रेहितच्छीलादिषुवासरूपविधिनातृजादयोनेतिज्ञापितमिहतुताच्छीलिकेषुपरस्परंवासरूपविधिर्नेतिविवेकइतिभावः॥
नयः। अयमयतयनयगतावितिपठितस्यनयतेर्नायंनिर्देशः। अनुदात्तत्वादेवयुचःसिद्धत्वात्। किंतुनेतिपृथक्पदमितिमत्वाह। यकारान्तादिति। क्नूयित।
क्ष्मायितेति। क्नूयीशब्दे क्ष्मायीविधूनने। सूददीपदीक्षश्च। ताच्छीलिकेष्विति। परस्परमितिभावः। प्रायिकमिति। नकेवलंयथाश्रुतं भाष्यमवलंव्ययुक्तयोरेवसमा-
वेशइतिमन्तव्यम्। किंतुप्रायिकत्वस्यैवभाष्यतात्पर्यम्। तेनगमेर्लषपतपदेतिसुकञ्विषयेतृन्नपि। गन्तागामुकः। वौकलसेतिघिनुण्विषयेयुजपिवि-
कत्थोविकत्थनइत्यादिसिद्धान्तीतिभावः। जल्पभिक्ष। कुट्टच्छेदने लुण्ठस्तेयेचौरादिकौ। जिदृक्षि। जिजये जिअभिभवे। दृङ्आदरे। क्षिक्षये। क्षिनिवा-
सगत्योः। श्रिश्रिञ्सेवायांविपूर्वः। व्ययभयसश्चलनयोर्नञ्पूर्वः। निपातनान्नञोधातुनासमासेनलोपेनतःप्रत्ययः। प्रसर्वोति। सृप्रसरणे अस्मादि-
त्यागेन सकारान्तस्यावस इत्यस्य मनुनासरहन्द्वः। अल्पाच्तरस्यापि सोत्रः परनिपातः। मरूवइति। झय इतिवत्वं नसो मत्वर्थे इति भत्वं हरिवो मेदिनमिति संयोगान्तलोपोरु
त्वेसिद्धे वकव्य इति वचनाद्दर्शितस्तु नम्। ममगादहदाम्वानिति अनुवन्यस्येति। अतएव वनो रचेति सूत्रेपि सामान्यग्रहणत्तुक्तम्। इदन्तु चिन्त्यम्। उक्तरीत्या हृस्वग्रीहिका
लयोरिति सूत्रे सामान्यग्रहणस्याविरोधेनेत्तद्याने: कुकमः सामान्यग्रहणविरोधार्थ इति माधवः। न्याः कथं सङ्गच्छन्त इति। किंच ककारस्य फलमपि चिन्त्यम्। यद्यपि यड्
लुकि दीर्घो किन इति दीर्घस्य प्रवृत्तिः कित्त्वसामर्थ्यादिसुत्वेन सम्भवति तथापि प्राचीनग्रन्थेः सहलस्य विसंवादो दुर्वारइतिदिक्। देवाअच्छेति। अनुपदं वक्ष्यमाणे।
नातोटीति सूत्रेणानुनासिकः। नत्प्रत्यास्थानुपसंतुभत्रानुनासिकइति सूत्रेणेति विवेकः। नेहेति। एतेन महानहिसइति वह्वृचानां पाठो व्याख्यातः। आकरेतु महांहीदुदा
हृतम्। तच्छास्त्रान्तरेऽन्वेषणीयम्। एवञ्चेति विकल्पस्यैव व्यवस्थिततया प्रकृतसूत्रत्यागेन महल्लाघवम्। सूत्रारम्भेनुव्यत्ययोपि शरणीकरणीय इति महान्क्ले
श इति भावः। छन्दसि विकल्पव्यवस्थयैव सिद्धेः प्रेत्यादिकं स्पष्टार्थमिति तत्त्वम्। एवमुत्तरसूत्राण्यपि दिवस्पृथिव्या इति। अत्रपरिः सर्वतोभावेस हेः चकारोनुक्त।
समुच्चयार्थ इत्याशयेनाह। चदिति क्रुतीपाहमिति। ऋतिशब्दस्यान्येषामपीति दीर्घः। इत्यष्टमः॥ ८ ॥ ११ कल्पिकत्वादिति भावः। विकल्पव्यवस्थयेति। व्यव॰ राम॰
स्थितविकल्पेनेति यावत्। इत्यष्टमः॥ इति श्रीमद्दीक्षितभट्टोजीपौत्रदीक्षितवीरेश्वरपुत्रदीक्षितहरिविरचिते लघुशब्दरत्ने वैदिकी समाप्ता॥ ८ ॥ १५६

श्रीगणेशाय नमः॥ साधारणप्रकृतिप्रत्ययसमासनिङन्तविषयकृतयापञ्चभिः प्रकरणैरुदात्तादिस्वरान्व्युत्पाद्य इदानीं साधारणस्वरांस्तावदाह । अनु
दात्तमिति। एकवर्जमिति। द्वितीयायां चेति णमुल्। ननु तत्र परीप्सायामित्यनुवर्तत इति चेत्सत्यम्। इहाप्यस्ति परीप्सा न्याहि। अत्रोदात्तादिर्विधीयते। तत्र तत्त
त्कालमेव शिष्टमनुदात्तं कर्तव्यं न विलम्बितव्यमिति। एतच्च द्वितीयायाश्चेति सूत्रे हरदत्तादिभिरुक्तम्। यद्वा परीप्सायामिति प्रायिकम्। एतच्चात्रैव सूत्रे हरद
त्तादिग्रन्थेस्पष्टम्। परिभाषेयमिति। अधिकारत्वे तु यद्यपि षाष्ठस्वरेण कश्चिद्दोषः तथापि स्यस्तान्तरवर्तिषु दोष एव। आद्युदात्तश्चेत्येवमादिषु हि य
स्यानुपस्थानाच्छेषनिघातो न लभ्येत। किंच एकवर्जमिति व्यर्थं स्यात्। ननु तत्र विधेयानां वचनसामर्थ्यादेव निघाताप्रवृत्तेरिति भावः। परिभाषाया
लिङ्गमपेक्षायामाह। स्वरविधाविति। एकवर्जमित्यनेन नहि अनुदात्तस्य वर्जनं न्याय्यम्। अथ परिशेषादुदात्तस्वरितयोरेव वर्ज्यं नेहेति न द्विधा वेवास्योपस्था
नमिति भावः। नमस्कमत्त्वमिति। एकग्रहणं तत्र विधीयमानस्योपलक्षणम्। तेन नवैवान्तश्च युगपदित्यादौ द्वयोर्वर्जनम्। इन्द्राबृहस्पती इत्यत्र देव
ताद्वंद्वे चेति सूत्रेण पदद्वयस्यापि प्रकृतिस्वरे त्रयाणां वर्जनम्। बृहस्पतिशब्दो हि वनस्पत्यादित्वादाद्युदात्त इति बोध्यम्। गोपायमिति गुपूइत्य
स्माद्धातोरित्यन्तोदात्तः ततश्चायप्रत्ययः प्रत्ययस्वरेणाद्युदात्तः ततो धातुत्वे यकारोकारउदात्तः स च प्राग्गुणयोरुदात्तयोः सतोः पश्चाद्वृत्तत्वात्सतिशि
ष्टः अतो बलवान्। तस्य शाबकारेणायउदात्तादनुदात्तस्येति स्वरितः। स्यादेतत्। नमिति स्वरितमाश्रित्य शेषनिघातोस्तु न च सन्निपातपरिभाषया
निवारः। तस्याश्च नित्यत्वेन स्वरविधावप्रवृत्तेः। अन्यथा चोदात्तादनुत्तरपदादन्यतरस्यां ह्रस्वनुड्भ्यां मतुबित्यादिभिरपि स्वरे कृते शेषनिघातेन प्रव
र्ते। ते निबहुव्याकुली स्यात्। किंच अप्नेभईकरिष्यसी त्यादौ स्य प्रत्ययादीनां निघातः केन वार्यते। नहि तत्र सन्निपातपरिभाषाया उक्तिसंभवोस्ति अत्र
पिच समदेवासहवसानीत्यत्र एकादेश उदात्तेनोदात्त इति कृते हकाराकारो निहन्येत एवमुदात्तस्वरितयोर्यण इति स्वरिते कृते अग्निज्ञानवेद
समित्यत्राग्निशब्दस्येकारो निहन्येतेति चेत्। अत्रोच्यते। यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां न प्रवर्तते। नव्यमते त्विदं यतोनाव इति सूत्र
स्थहरदत्तज्ञापकम्। परिभाषान्तराणि तु कार्यकालपक्षाश्रयात्प्रवर्तन्त एव। अतो न कश्चिन्मार्गकृद्दोषः। सतिशिष्टेति। एतच्च न्यायसिद्धन्तयाहि। यथोद्देश

म॰स्व॰ पस्तनवत्वेव्यप्रवृत्तायाअप्यस्याः उक्तानस्वरितविधिभिः सहवाक्यैकवाक्यतास्त्येव। उत्सर्गस्यापवादस्यचायस्यैवयत्र चरमाश्रान्निस्तदेकवाक्यतापन्न
१५७ यानयातस्यव्यवस्थाप्यते। अतएव औपगवत्वमित्यत्राणप्रत्ययेन्च आद्युदात्तश्चेति प्रवर्तमानं स्वस्यैव प्रथमप्रवृत्तिबाधेन द्वितीयप्रवृत्त्यालस्यप
रिनिघात्यमित्यतिदूतिरिक्। अन्यत्रेति। अत्रच ज्ञापकत्वात्तासेः परस्य लसार्वधातुकस्य निघातविधानम्। अन्यथालकारमात्रापेक्षत्वादन्तरङ्गत्वेन परत्वे
नचतिवादिषुकृतेषु क्रियमाणस्य तासेः स्वरस्य सतिशिष्टत्वात्तेषु निघातेनैव सिद्धेरनर्थकत्वं स्यात्। गृणीतइति। अन्तोदात्तं पदम्। अत्र लसार्वधातु
कनिघातो नास्ति। अदुपदेशादिति। तपरकरणात्। श्नाप्रत्ययस्यादंतत्वाभावात्। निङः तिङ इति निघातस्तु न भवति। यद्वृत्तान्नित्यमिति निषेधात्। सहिश्यवहिते
पिप्रवर्ततइतिवक्ष्यते। इहच सदेवा यस्यरोदसीइति पूर्वेचरणे यद्वृत्तमस्तीतिदिक्। देवीमिति। पचादिषु देवडिति टित्करणात् ट्विड्ढेति ङीप्। चौउदात्तनिवृत्ती
ति। कृदुत्तरपदप्रकृतिस्वरेण उदात्तस्य। चावितेरकारस्या वइति लोपेसति। अनुदात्तस्येति सूत्रेणोदात्तःप्राप्तः तस्यायमपवादइत्यर्थः। इमम्मइति।
शाद्यन्तस्वमाश्रित्यगङ्गे प्रभृतीनान्त्रयाणामनुदात्तः ॥सचपदपाठेस्पष्टएव। संहितायांतुस्वरितात्संहितायामितिवक्ष्यमाणप्रचयापरनामधे
यासकस्फूर्तिः प्रवर्तते। नामन्त्रिते सामान्यवचनं व्याचष्टे। विशेष्यमिति। विशेष्यसमर्पकमित्यर्थः। अग्नेत्रातरिति। अग्निरिह विशेष्यं। त्राणकर्तृ
त्वं तु विशेषणम्। अग्नेत्रातः सहस्कृतेतिमन्त्रे तु श्रुतिप्रतीतिविशेष्यत्वेन विवक्षितम्। अतोऽग्नेइत्यस्य अविद्यमानवद्भावात् त्रातरित्यस्य निघातः
। एवन्ततउत्तरेषामितिबोध्यम्। देवीःषडिति। अत्र देवीरित्यामन्त्रितत्वादविद्यमानवत्। तेनषडित्यस्य निघातः। अव्ययीभावस्यत्विति। एतच्च अ
व्ययीभावश्चेति तस्य सूत्रे भाष्ये स्पष्टम्। अभ्यभीति। उपसर्गाश्चाभिवर्जमित्युक्तेरभिशब्दोन्तोदात्तः। तस्य नित्यवीप्सयोरिति द्वित्वम्। अनुदात्तं चे
तिपरस्यानुदात्तत्वं यणि कृते उदात्तयणः परत्वात्स्वरितः स्वलपूःशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ततः सप्तम्येकवचनस्य उदात्तयणोहल्पूर्वा राम॰
दिति प्राप्तस्योदात्तस्य नोङ्धात्वोरिति निषेधः ततोऽनेन स्वरितः। तस्य यणि ततः परस्य आशाशब्दाकारस्यानेनैव स्वरितः आशाशब्दोप्यन्तोदात्तः अ १५७
श्वयाअदिगास्याचेदिति। फिट्सूत्रात्। अस्येति। आशाशब्दप्रथमाक्षरस्यानिकस्येत्यर्थः। शेषेति। आशाशब्दस्य निघातो नेत्यर्थः। स्यादेतत्। । य

णादेशं प्रति स्वरितस्यासिद्धत्वात् स्थानिन्येव यणप्रवृत्तेः। तथा औत्नडदित्यत्र दत् शब्दे द्वित्वं प्रवर्त्तते। नत्तुढशब्दे। न च स्वरितयणः परस्येत्याश्रयणा।
त्सिद्धत्वं शङ्क्यं अतिप्रसङ्गात्। उदात्तादनुदात्तस्य स्वरित इत्यनेन यत्र क्रियेत तत्रापि स्यसिद्धत्वान्न स्यात्। न चेष्टापत्तिः। लक्ष्यविरोधात्। प्रत्यग्नि।
रूपसामग्रमस्वदित्यादौ स्वरितदर्शनात्। न च नोदात्तस्वरितोदयमिति निषेधः शङ्क्यः। अनन्तरस्येति न्यायेनोदात्तादनुदात्तस्येति यत्र प्राप्तिः तन्मात्रस्य
निषेधात्। अन्यथा स्वनुप्राशन्ना आग्निम्। पाद्य स्यात्। इत्यादावपि निषेधापत्तेः। तस्मादिह समाधानान्तरमेव वाच्यमिति चेत्। अत्राहुर्भाष्य।
काराः॥ योगविभागः कर्त्तव्यः। उदात्तयणः परस्यानुदात्तस्य स्वरितस्यात्। ततः स्वरितयणः। इह पूर्वमनुवर्त्तते। उदात्तयणः परत्वादेव स्वरि।
तस्तद्यणः परस्येत्यर्थः। एवञ्चाऽसौ व आश्रयात्सिद्धत्वं नान्यस्य। यद्वा स्वरितग्रहणन्न करिष्यते स्वलप्वाशी त्यादावपि उदात्तयणः परत्वादेव सि
द्धत्वात्। न च स्वरितयणाद्यवधानं शङ्क्यम्। स्वरविधौ व्यञ्जनस्याविद्यमानवद्भावादिति। यत्तु काशिकायामुक्तं व्यञ्जनस्य स्वविद्यमानवद्भावो
न त्वचद्रहतु स्थानिवद्भावादेव। न च स्वरविधौ तन्निषेधः। स्वरदीर्घयलोपेषु लोपाजादेश एवेति सिद्धान्तात्। तस्मात्स्वरितग्रहणन्न करिष्यत
इत्यसङ्गतम्। योगविभागपक्षः परमशिष्यते। सोपि न उदात्तादनुदात्तस्येति यः स्वरितः तस्थानिकाद्यणः परस्यापि स्वरितदर्शनात्। पञ्चपत्ने(
ह्निनीरीये। यास्ते विश्वाः समिधः सन्त्यग्नेरिति। तस्माद्भाष्यस्थपक्षद्वयमपि न सङ्गच्छत इति। अयं च वृत्तिकृतो महान्व्यामोहः। भाष्योक्तपक्षद्वय
स्यापि सादरसमत्वात्। तथाहि। योगविभागपक्षे सन्त्यग्न इत्यत्र नानुपपत्तिः। सकाराकारमाश्रित्य उदात्तादनुदात्तस्येत्येवाग्निशब्दाकारस्य स्व
रितसिद्धेः। न च स्थानिवद्भावात्तस्याव्यवधानं पूर्वस्माद्विधाविति पञ्चमीसमासस्य प्रत्यास्यानात् त्वीकारोपि धानिषिद्धायां सटीति ज्ञापकेनानित्यत्वात्
। सार्वत्रिकत्वाभ्युपगमेपि पूर्वत्रासिद्धीयमनद्भावात्। अत एव प्रत्यग्निरित्यादौ स्वरितत्वं न प्रवर्त्तते नोदात्तस्वरितेत्यादिना निषेधात्। यदि।
हि सन्त्यग्न इत्यत्र प्रकृतसूत्रं प्रवर्त्तेत तर्हि निरपवादत्वात्याद्यस्मान्नित्यत्रेव प्रत्यग्निरित्यत्रापि तस्य प्रवृत्तिं दुर्वारयेत्। एवं स्वरितग्रहणप्र
त्याख्यानपक्षोपि साधुरेव पूर्वत्रासिद्धीयेन स्थानिवदित्यस्य जागरूकत्वेन वृत्तिकारोक्तदोषस्य निरवकाशत्वादिति मात्सर्यमुत्सार्य सुधी॥

म.स्व. १५८

भिराकलनीयम्। एतेनरुद्धाग्रायतिइत्याह। इतिस्वरितेनयणः स्वरितत्वेउदाहरणद्वयं वदन्यथाश्रुतं इति ग्रन्थं चाम्रेडयन्स्वरमञ्जरीकारः प्रत्युक्तः लोपशात्वे
ग्रयत्वं नस्यानित्वदिति नियमो हि स्वरविधौ नेति प्रतिपदोक्तस्यैव निषेधस्य न तु पूर्वत्रासिद्धीयत्वं प्रयुक्तस्यापि एकादेशउदात्तेनोदात्तः उदात्तयोरेवस्थानित्वेआन्तर
तम्यादेव सिद्धम्। अन्यतरस्य अनुदात्तत्वे स्वरितत्वे वा सिद्धत्त्वभयान्तर्यादितिन्यायेनान्तरतम्यात्स्वरिते प्राप्ते विधिरयमिति ध्वनयितुमुदाहरणद्वयमाह। वो
म्व इत्यादि। अत्र वइत्यनुदात्तम्। बहुवचनस्य वसन्नसावित्यत्रानुदात्तं सर्वमपादादावित्यधिकारात्। अश्वशब्द आद्युदात्तः अशेः क्वन्नित्युत्पादितत्वात्। कैमि। कि।
मोत्तिन्स्वरितम्। अवरशब्दः स्वाङ्गशिटामित्याद्युदात्तः। स्यादेतत्। क्वावरमित्युदाहरणमयुक्तम्। एकादेशउदात्तेनोदात्तइतिसूत्रे पूर्वसूत्रात्तुदात्तस्येत्यस्या
नुवृत्तेः काशिकायामुक्तत्वात्। तस्यादितइतिसूत्रेस्वरितोदात्तार्थेत्रैनिवार्तिकस्यतत्रभाष्यकैयटादीनाञ्च तथैवस्वरसादिति चेत्सत्यम्। इह सर्वेप्राचाङ्गन्याः
अभ्युच्चयमात्रपरतया कथञ्चिन्नेयाः। वस्तुतस्तु अनुदात्तग्रहणस्यानुवर्तनं सर्वं निष्फलत्वात्। तस्य विरोधाच्च क्वावरमित्यादौ बह्वृचानां उदात्तपाठस्य निर्बाध
त्वात्। तैत्तिरीयानामपि। याज्ञैवेतमेतया प्यापयतीत्यत्राङ्प्रश्नेषु द्वितीयास्वरसोदात्तत्वात्। अत एव बह्वृचप्रातिशाख्यउदात्तवत्येकीभावउदात्तमक्षरम्
वम्। अनुदात्तोदयेपुनः स्वरितं स्वरितेपथेइतिश्लोके पूर्वार्द्धे अनुदात्तग्रहणं न कृतम्। किं तु तत्र वचनस्य पूर्वान्वयभ्रमं वारयितुं पुनः शब्दः प्रयुक्तः। शौनकीयेस्व
राष्टकेपि। एकादिष्टमुदात्तेन नतत्वमेवनयेत्स्वरमित्युक्तमिति दिक्। इकारयोश्चि। ह्रस्वयोरेवेत्यर्थः। अस्यश्लोकइत्यत्र तुईयनइतिदीर्घस्य प्रवेशात्स्वरितः। इ
त्यस्वैवबह्वृचानां व्यवस्थाका। अन्येषामपि तदीयप्रातिशाख्यानुसारेण बोध्या। नोदात्तः। उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः। लाघवार्थंप
रशब्दे प्रयोक्तव्ये मङ्गलार्थमुदयशब्दः प्रयुक्तः। तथा च भाष्यम्। मङ्गलादीनि मङ्गलमध्यानि च शास्त्राणि प्रथन्ते इत्यादि। एवञ्च वृद्धिरित्यादौ शिवशमिति।
मद्ध्यस्वरितोदयमिति चान्ते पाणिनीये मङ्गलं कृतम्। यद्यपि नेत्त्द्रयंतस्य काशगार्ग्यादीनामेवेति विपरीतनियमशङ्कां वारयितुं त्वं द्वयान्तर्भावः। आगच्छ
षोइति। अत्र माणवकशब्दस्य टेः प्लुतो वैकल्पिकत्वात्प्लुतः। पक्षे सोपि बोध्यः। सद्योदात्तः। प्लुत उदात्त इत्यधिकारात्। एकश्रुति प्लुताभ्यां अवयवभेदेन
वाक्यसमुच्चिताभ्यां दूरात्संबोधनं यथान्यते। विभाषाछन्दसि। अत्र तत्त्वेणआह्न्यायाआछन्दसीति तत्र प्रश्लिष्यभाषायामपि एकश्रुतिकोविकल्पो बोध्यः। न

शब्दरत्न
राम. १५८

पिदुनायनादिसूत्रेभाष्यम्।एकश्रुतिर्दिस्वरस्सर्वेनामेत्यादिअतएवाभियुक्तानांविरुद्धास्वरकजत्पुरुषबहुव्रीह्याद्याश्रयणेनश्लिष्टकाव्यादिनिर्माणंसङ्गच्छतेप
स्वरश्चान्तेस्वेतोपापतिअसुंवुसानापानेनिद्व्यर्थंवाक्यमितिभाष्यञ्च।तथाचकाव्यप्रकाशेवेदइवलोकेस्वरोनविशेषाद्ध्यवसायहेतुरित्युक्तम्।एकश्रुत्याध्य
वसायादितितत्स्वाशयः।किमर्थंतर्हिग्रस्तुपोत्तममितिप्रश्नस्यविभाषायामितिसूत्रितमितिचेत्।त्रैस्वर्येणप्रक्रमेपाक्षिकानुदात्तलाभायेतिगृहाण।वेति
प्रकृतेविभाषाग्रहणं।वेत्सूत्रकारोपितच्छादिकमभिप्रैति।एतेनभाषायांस्वरानुरोधोनास्त्येवेतिभ्राम्यन्तःपरास्ताः।स्वरविधिषुछन्दोधिकाराभावा
त्।दृष्टस्यच।वाभाषायाम्।इतिफिट्सूत्रस्याग्नस्तुपोत्तमम्।विभाषाभाषायामितिपाठस्य।एवंविधानामन्येषामपिनिषयत्वापत्तेश्च।किमर्थंतर्हिवै
दिकप्रक्रियास्वरस्तुप्रतिपादनंप्रक्रान्तमितिचेत्।वेदेतस्यावश्यकत्वात्।ननुलोकेसर्वथानुपयोगादितिगृहाण।इमंमेइति।ननुमेइतिस्वरितस्य
विधायकस्त्रिपादीस्थत्वादसिद्धःस्यात्।नचस्वरितादित्याश्रयात्सिद्धत्वात्।क्वचस्तन्नेत्यादौचरितार्थत्वादइतिचेत्।ननस्यादितइत्यारभ्यतवसूत्रा
स्वस्थानादन्यत्रशास्त्रान्तेभाष्यवार्त्तिकयोर्निवेशितत्वात्।नसुब्रह्मण्यायामितिसूत्रेस्वरितस्यतूदात्तइतिवदतासनत्काण्डान्तर्वर्तिस्यज्ञापितत्वाच्च।
नचसुब्रह्मण्यायामितिसिद्धःस्वरितोस्तीतिवाच्यम्।तत्रएकादेशउदात्तेनेतिसूत्रप्रवृत्तेरावश्यकत्वात्।तत्रत्यानुदात्तग्रहणंनानुवर्त्ततइत्यवोचाम्।माचावीत्या
तुदेवब्रह्मणोरनुदात्तइतिसूत्रंज्ञापकमितिदिक्।सन्नतरइति।सन्नोनुदात्तःतराह।अनुदात्ततरःस्यादिति।इतिसाधारणस्वरप्रकरणंप्रथमम्।प्रकृति
द्विधाधातुःप्रातिपदिकञ्च।तत्रधातुस्वरानाह।धातोरिति।अद्यन्तगणइति।आगणान्तादितिभावः।अभ्यस्तानामादिः।आदिरित्यनुवर्त्तमानेपुनरादिग्रह
णंनित्यार्थम्।अचीतिकिन्त्स्यात्।अनिटिकिंजघ्निथ।अनुदात्तेच।बहुव्रीहिरयम्।तेनमाहिस्मदधात्।दधात्यत्रइत्यादौलोपयणादेशयोःकृतयोरपिआद्यु
दात्तःसिद्धान्तीत्याशयेनाह।अविद्यमानेतिभीह्री।प्रत्ययइत्येववक्तव्येपूर्वग्रहणंज्ञापयति।सौपर्येःसप्तम्यस्तदन्तसप्तम्यइति।ज्ञापकेचमतद्वयम्।सामान्यापे
क्षविशेषापेक्षञ्चेति।आद्येभ्नित्यादिर्नित्यमित्यादावपितदन्तसप्तम्येव।द्वितीयेतुयत्रतदन्तग्रहणसत्त्वासत्त्वाभ्यांफलेभेदःतत्रैवतदन्तसप्तमी।भीह्रीत्यत्र
हिपूर्वग्रहणाभावेतदन्तस्यकार्यित्वेप्रत्ययात्पूर्वानांभ्यादीनामसत्त्वात्स्वभवत्युदात्तःप्रत्ययात्पूर्वस्यस्यात्।सप्तम्यर्थेपुरस्कारेतुपेतमपहायभ्यादीनामेवउदात्तः

मण। तस्यवञ्च अविदित लक्षणस्याद्युदात्तस्य वृषादित्वङ्गमादित्वं वा। बोद्धाम् अन्तोदात्तत्वस्य तु उञ्छादित्वं घृतादित्वञ्चेति दिक्। एवञ्च द्वाभ्यामेव सूत्राभ्यां सर्व
सिद्धौ इतरसूत्रद्वयप्रणयनम्। कर्तृभेदान्न दोषायेति बोद्धाम्। आशितः कर्ता कर्तृवा चीति सकर्मकादप्यशोकर्तरि क्तः उपधादीर्घश्चानेनैव सूत्रेण निपात्यत इति
भाष्ये स्थितम्। अतएव रूपम्मिति मन्त्रस्य वेदभाष्ये क्षुधन्तः छिद्रुर्वेनफालः कृषीवलस्योकारङ्कुरोतीति व्याख्यानम्। वृत्तिकारस्तु। अशेराङ्पूर्वादविवक्षितकर्मत्वे
नाकर्मकत्वात्कर्तरि क्तः। तत्रथाद्यघञिति प्राप्तः स्वरो नेन बाध्यत इत्याह। नृक्लिष्टम्। अविवक्षितकर्मकेभ्योपि कर्तरि क्ते दत्तवान् पक्ववानित्यर्थे दत्तः पक्व इत्या
ते। आशितङ्गवः अत्राघनेष्यं। अपरआह। कर्तैत्यनेन भूतपूर्वगत्या अशोकर्तारो कर्मीभूत एव विवक्षितः। तथाचण्यन्तात्कर्मण्येवायङ्:: इति। जुष्टार्पिते। जुषी
प्रीतिसेवनयोः। श्वीदितो निष्ठायामितिङ् इट्प्रतिषेधः। अर्तेश्च। अनिङ्गीतिपुकानकेवलङ्गनार्थत्वमात्र क्लिंतु आरभ्यमाणे सूत्रे दोषोप्यसीत्याह। अर्पिता। वष्टिवि
त्यादिनाद्युपदस्वरोडे। मिङ्‌ मिच। पृथग्योगकरणं यथासंख्यशङ्कानिरासार्थम्। ईडवन्द। पूर्वसूत्रे द्यानुवन्धकस्याग्रहणात्। ण्यदन्तेषु निस्वर एव मात्रेकवचनम्
विभाषावे। वेणुशब्दे नित्स्वरेण नित्यमाद्युदात्तः प्राप्तः स्यो गुणित्यनुवर्तमाने अजिरशरीभ्यो निच्चेतिव्युमादितत्वात्। इन्धानशब्दो यदि शानजन्तः तदा चित्वादन्तोदा
त्तः। अथशानजन्तः तर्हि लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः। भ्रसोरल्लोपइति अग्नोकारस्य उद्यात्तस्य लोपात्। सर्वथापि अयात्तमाद्युदात्त
त्वपक्षे विपरीय तेऽत्र यः पचाद्यजन्तादिति। कुप्स्विस्मापने। ध्वठअसम्यग्भाषणे। चौरादिकावदन्तौ। क्रथहिंसायाम्। मतोः पूर्वमिति। शब्दरूपापेक्षया नपुंसकत्वम्या
दिमविशेषणम्। केचित्तु सूत्रे पूर्वशब्दं पुल्लिङ्गमेव पठन्ति। उदाहरणे चातुरर्थिकोनद्यामतुप्। मतौ बह्वचो नजिरादीनां शरादीनाञ्चेति दीर्घः। अहीवतीति। मन्त्राया
मितिचत्वम्। उत्तरो ग्रन्थः स्पष्टार्थः। क्वचित्तु विशेष उच्यते। द्वितीयपादे तृणधान्यानाम्। तिलाइति। यत्तु अलाबूतिलोमेतिरजसिकटत्विधोहरदत्तेनोक्तं तिल
शब्दो घृतादित्वादन्तोदात्त इति तच्चिन्त्यम्। तिलाश्रमेद्रत्यत्र आद्युदात्तस्यैवपठ्यमानत्वात्। प्राणितम्। यत्तु कुपूर्वाणामिति पाठस्तु पन्यस्य कवर्गात्। येपूर्वेत
त्सद्धौ आश्विरितिन्या सकारह्रस्वदन्तो तस्य तभूरिति सूत्रे प्रोचतुः तच्चिन्त्यम्। सर्वनामत्वेनसुदित्सनिकुपूर्वेषामिति प्रयोगापत्तेः। सौत्रत्वं चाशरणीकर्तव्यम्। लघा
वन्तेद्वयोश्च। इह आदिग्रहणेन संबध्यते। तेनादेरपि गुरो रुदात्तः अतएव वृषाकपीतिशब्दस्य गुरुरुदात्त इति वृषाकप्यग्नीति सूत्रे वृत्त्यादिग्रन्थेषु विभावि॥६॥

तेन च गुरूणां मध्ये आदिः इत्यर्थोऽस्त्विति वाच्यम्। अन्यतो ङीषिति सूत्रे सारङ्ग-कल्माषशबलपार्वेनइत्यादिना मध्योदात्ताविति हरदत्तादिग्रन्थविरोधात् क
ल्याण इति। पर्यायेण आदिमध्यावुदात्तौ॥ चतुर्थपादे॥ उपसर्गाश्चाभिवर्जम्। इह। नाभिरित्येव सुवचम्। इतरेषां पूर्वेण सिद्धत्वात्। वस्तुतस्तु तदपि मास्तु। एव
मादिषु अभेः सुपठत्वात्। आवेति मन्त्रे उपसर्गाश्चाभिवर्जमिति वचनात् आनिपदिकान्तोदात्तत्वमित्युक्तामानोमर्त्ता अभिद्रुवन्निति मन्त्रे एवमादीनामन्त इतिवद
ना वेदभाष्यकृता ध्वनितमेतत्। यथेति पदान्ते। यत्तु स्वरमञ्जरीकृता पुराजीवगृभो यथा भ्राजन्तो अग्नयो यथेत्युपन्यस्य लिङ्स्वरमाशङ्क्य आद्यपि कप्रसिद्धिमा
त्रेण सर्वानुदात्तत्वमित्युक्तम्। फिट्सूत्रेषु तुरीयः पादः। इति प्रकृतिस्वरविषयकं द्वितीयं प्रकरणम्॥ अथ प्रत्ययस्वराः कर्तव्या इति। ननु प्रत्ययः परश्चेति वा
न्स्वरितो बाध्यते। ननु तस्यापि आद्युदात्ते शेषनिघाते कृते उदात्तानुदात्तस्येति स्वरितो भवत्येवेति चेन्न त्यङ्कित्यय मसिद्धः तित्स्वरस्तु सिद्ध इति शेषनिघातप्रवृत्त्यप्र
वृत्तिभ्यां महान्फले विशेषः। नत्र तत्स्वरितत्वमेव च शेषनिघातपरिभाषायाः प्रयोजनं शप्रवृत्तौ ज्ञापकमिति ध्येयम्। युच्छतीति। युच्छ प्रमादे। अन्यकेइति। अकच् तन्नः प
रत्वे सति स्वरः। एवं यकेन कदित्यप्यपि। अकच् चित्त्वमेव चर्वितः प्रकृतेरित्युक्तेऽर्थे सिद्धम्। अन्यपानस्यैकाच्छादनर्थकत्वं स्यात्। कौञ्जायना इति। कुञ्जस्यापत्यानि
बहूनि। गोत्रे कुञ्जादिभ्यश्च्फञ्। व्रातच्फञोरस्त्रियामिति ञ्यः। ञ्यादयस्तद्राजाः। बहुषु लुक्। इह च्फञ् च्फञ्कारो व्रातच्फञोरिति विशेषणे च विनार्थः
अकारो वृद्धौ। तत्र ञ्नित्स्वरं बाधित्वा परत्वात् चित्स्वरः प्राप्तः सोऽनेन बाध्यते। तिसृभ्यो जसः। अर्थगतं बहुत्वं शब्दे आरोप्य बहुवचननिर्देशः। आन्तोदात्तस्य त्रि
शब्दस्य आदेशः तिसृ शब्दोऽपि तथा तस्य अचि र ऋतः इति कृते उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं प्राप्तम् अनेन बाध्यते। अन्तोदात्तात्। नित्यशब्दः स्वर्य
तेनाधिकारगतिर्भवतीत्याशयेनाह नित्याधिकारेति। अनित्यसमासे किम्। अग्निचिता। उपपदसमासः कृदुत्तरपदप्रकृतिस्वरेण चित्शब्द उदात्तः। अधि
कारग्रहणं किम्। विग्रहाभावमात्रेण यो नित्यसमासस्तत्र पर्युदासो माभूत्। अवाचा ब्राह्मणेन। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। अत्र विभक्तेर्वैक
ल्पिक उदात्तो भवत्येव। दधीच इति। दध्यञ्चेति दध्यङ् इत्यस्य ऋत्विगादिना क्विन्। शसः परिग्रहार्थमिति। शसादिरित्येव तु नोक्तम्। नपुंसके शसि माभूत्। सुटि च या
स्यादिति। ऊठिति उपधाभूत ऊठ्ग्रहणेन तत्त्यइत्यर्थः। पञ्चमीनिर्देशादन्तस्यैव ग्रहणे प्राप्ते वचनम्। साभ्यामिति। पूर्वार्द्धे चैव भ्रुशब्देनोक्तयोरिह इदमा परामर्शो

स्वरफलभेदः।उपोत्तममिनिचङ्य न्यतरस्यामित्यत्राप्येवमेव।ञ्नित्यादिर्नित्यंपथिमथोः सर्वनामस्थानेइत्यादौनास्तिफलभेदः।नदन्तग्रहणेसत्यसतिचप्रकृतेरा
देरेवउदात्तत्वात्।अतस्तत्रपरसूत्रमेवेमिदिक्।लोलूयनोलोपमिति।लोड्सुदात्तःलूइतिस्वरितःतनघ्नत्वारप्रचयाः।लित्स्वरइति।अत्रोमेडितान्तरगतस्यलूय
दस्योदात्तःनचतस्मिन्कर्तव्येऽल्लोपस्यस्थानिवद्भावःयङ्लुः स्वरितविधौनञ्निषेधात्।शेषनिघातः।अचःकर्तृयकि।इहकीर्यतइत्यादौइत्वेरपरत्वेचसति ञ्यंय।
स्वरइहः तन्निवर्तोऽर्थन्नाम्न्यनुदात्तेतिसूत्रेसमासैकदेशो ष्युपदेशाच्छद्दहानुवर्त्तते।सप्तम्याचविपरिणम्यते।नराह।उपदेशेजनानामिति।नन्वेवंएवद्दा
दशाधाजसेइत्यादाविवानभूतण्यथान्कर्तृकर्मविषयानूजनेलटिजायतेस्वपमेवान्यत्रसषस्वरोनस्यादितिचेन्मैवम्।यइतिविषयसप्तमीमाश्रित्यप्रत्ययोत्पत्तेःप्रा
गेवआत्मप्रत्ययेनेत्याहुः।लूयतइति।आद्यमद्धौपर्यायेणोदात्तौ।माहिचीकरतामिति।अडुपदेशान्तरत्वेनलसार्वधातुकानुदात्तत्वेकृतेचङःसवस्वरेणाप्रेपक्षेधातुका
रउदात्तःउपोत्तमग्रहणानुवर्तनात्तद्वयोर्नोमाहिदधत्।इतिधातुस्वराः।नेचप्रायेणकृतहिनवलेनैवज्ञेयाः।उणादिषुतुउणादिप्रत्ययैः अव्युत्पत्तिपक्षेपिफिट्स्वरैः
।कश्चित्तुविशिष्यविधानादितिविवेकः।अतएवकर्मण्यणितिसूत्रेमांसशब्दस्यनत्विषयस्येतिफिट्स्वरमाशङ्क्यमनेर्दीर्घश्चेत्यौणादिकसप्रत्ययान्तत्वादन्तोदा
त्तताकैयटेनोक्ता।मांसमेकः।पिशतीत्यादौतत्त्रयमपिनश्यैव।यत्तुआज्यशब्दव्युत्पादनावसरेकैयटेननविषयस्येतिसच्चारितत्तत्प्रौढिवादमात्रम्।स्वर
निर्घोरहस्यकण्वन्यक्षपनित्यज्य आङ्पूर्वान्नाजितिपक्षस्यसिद्धान्तितत्वादेवेतिदिक्।कर्षात्त्वतः।ञ्नित्यादिर्नित्यमित्यस्यापवादः।स्थानिवत्वादिति।स्वरविधौनेति
निषेधस्तुनास्ति।लोपाजादेशस्यैवेनियमात्।झल्युपोत्तमम्।षड्त्रिचतुर्भ्योहलादिरित्यस्यापवादः।सर्वस्यसुपि।सर्वशब्दउच्चादिषुअन्तोदात्तोनिपातितःसर्वस्य।
विकारःसार्वेइत्यत्रअनुदात्तादिप्रकृतिकसुवन्तलक्षणोऽत्र यथासादितिङ्याप्सूत्रेभाष्येस्थितम्।श्रवणन्तुसर्वत्रैवआद्युदात्तस्यैव।प्रत्ययलक्षणेनापिसर्वे
स्वरस्यैष्यमाणत्वात्।पथिमथोः।पथिमथिशब्दौउणादिषुइतिप्रत्ययान्तौव्युत्पादितौ।गमेरिनित्यधिकारेमन्थः।पतस्थचेतिसूत्रितत्वात्।तत्रप्रत्ययस्वरे
णान्तोदात्तेप्राप्तेविधिरयम्।स्वेक्षयइति।क्षिनिवासगत्योः।अस्मादधिकरणेघः।निवासेकिम्।व्याधेक्षयः।क्षिक्षये।एरजन्तः।जयोभयइति।जयतेर्घःकर
णेकिम्।जयोग्रासपानाम्।भावेपरत्वं।वृषादीनाञ्च।वृषसेचनेरङ्गुपधलक्षणःकः।आकृतिगणइतिफिट्सूत्रेषुग्रामादीनाञ्चेतिसूत्रितम्।ग्रामादिरप्याकृ

न्वादेशोऽस्त्येव। अन्वादेशश्च कथितानुकथनमात्रम्। नन्विदमाकथितस्येदमेवानुकथनमिति भाष्योक्तेः। नन्वेवमपि सावेकाच इति स्वरः प्राप्नोति न्वचेहान्तोदात्तादित्य
स्यानुवृत्तिसामर्थ्यात्सोऽपि न प्रवर्तत इति वाच्यम्। शसोऽप्यावृत्त्या सामर्थ्यो पक्षयात। नहि शस्सिसावेकाच इति प्राप्नोति। इष्यते च तत्रानुदात्तत्वं यथा ईमेनोउपनोऽस्य
स्य वर्षीन् हतामैनाइति लिखायदब्रवीत्। अन्येरेवान्वकन्यानामभिः स्वरतः। इत्यादौ तथैव पाठात्। तस्मादाभ्यामित्यादेरन्वादेशे कथं सर्वानुदात्तत्वमिति चेत्। उच्यते। ऊ
डिदमिति सूत्रे साकाच इत्यनुवर्तते। पदादिविशेषणार्थम्। अतएव निशापर्यन्ताः षडेव गृह्यन्ते न तु ततः परेऽपि। तेषामनेकाच्त्वात्। तेन ग्रीवायां बद्धोऽपि कस्स आस्
निमस्य नदीन उदनिक्षिपन्नमित्यत्र आसन्युदन्नित्यत्र मध्योदात्तमन्यथा अन्तोदात्तं स्यात्। नचान्तोदात्तत्वमेवेह विभक्तेर्दुर्लभमिति वाच्यम्। स्यान्त्यन्तरतम्येनादे।
शानामप्यन्तोदात्तत्वात्। आस्यशब्दस्य ण्यदन्तत्वात् तित्स्वरितेनास्वरितान्तत्वेऽपि पद्दन्नोमासित्यादिसूत्रे पदाद्यादेशानामन्तोदात्तनिपातनाश्रयणात्। एवं स्थिते शसि स
नादेशः सोऽपि सकारग्रहणेनैव वारितत्वादन्तोदात्तग्रहणस्य सामर्थ्यं निर्बाधम्। तेनाभ्यामित्यादौ सर्वानुदात्तता सुस्थेति। यद्वा सावेकाच इति सूत्रे अन्तोदात्तादि
त्यपकृष्यताम्। तथा च अन्वादेशे कृते न प्रसङ्ग एव नास्तीति दिक्। अष्टनो दीर्घात्। अष्टन्शब्दो घृतादित्वादन्तोदात्तः। तेनोत्तरार्थे तथानुवर्तमानस्यान्तोदात्तादित्य
स्येदापि नान्वयः मण्डूकप्लुतिर्वास्तु। दीर्घात्किम्। अष्टभिः। इह झल्युपोत्तममिति स्वरः। शतुरनुमो नद्यजादी। अशासं त्वा विदुषी यस्मिन्न्। ददन्। यस्यैवं विदुषोऽग्निहोत्रं जु
हति। अत्र वस्वादेशस्य स्थानिवद्भावेन शतृत्वात्ततः परयोर्नदीविभक्त्योरुदात्तः प्राप्तः स नेष्यते। तथा च स्थानिवत्सूत्रे वार्तिककृता स्वरे वस्वादेश इति निषेधः प
ठितः। उदात्तयणो हल्पूर्वात्। उदात्तस्वरितयोरिति स्वरिते प्राप्ते आरम्भः। ह्रस्वनुड्भ्याम्। अस्मण्वन्त इति। छन्दस्यपि दृश्यत इत्यस इ। आतोऽनुडिति नुट्पूर्वेन कार
स्य लोपः नेष्यत इति। हल्स्वरप्राप्ताविति भाष्योक्तेरिति भावः। रेवानिति। रयिरस्यास्तीति मतुप्। रयेर्मतौ बहुलमिति संप्रसारणं पूर्वत्वम्। आद्गुणः। ततो ह्रस्वाभावाद्
चनम्। नामन्य। अग्नीनामित्यादौ। परत्वान्नित्यत्वाच्च दीर्घे कृते ह्रस्वाभावान्नेदं स्यात्। वचनन्तु तिसृणां चतसृणामित्यादौ सावकाशम्। अतआह मतुपीति। प्रथमा
नामनुवृत्तम्। सन्नमपि विपरिणम्यत इति भावः। षट्त्रि। हलादिः किंचन स्त्रः पश्य। तगोष्वन्। इह तानतरस्य प्रतिषेधासंभवात्सर्वेषु षाष्ठिकत्वरस्यायं प्रतिषे।
धइत्याह आगुक्तमिति। एवं च वीरवत्तमिति त्र ह्रस्वनुड्भ्यामनुविति भवति। यनुस्वरमत्र योन्तृनीयादिविभक्तेरुदात्तत्वन्त्र भवतीति तगोष्वन्सूत्रे विवृत्तन्नदनेन प्र

म. स्व. सुकंलस्य विरोधात्। उदात्तनिवृत्तिस्वरस्य तु प्रतिषेधो नेष्यते। देवी कुमारी त्यादी नामन्तोदात्तत्वस्य भाष्ये तत्र तत्र दर्शितत्वात्। वेदेऽपि दर्शनाच्च। तन्निर्वाहार्थं न गोश्व।
१६१ त्रिति सूत्रे अनुदात्तस्य चेत्येतन्न दितरेयामेवानुवृत्त्या निषेध सङ्गेनैव व्याख्येयः। अनुदात्तस्येत्यंशे वाक्यभेदेन पुनर्विधानार्थं इत्थिव्याख्येयम्। शुनश्शेफेत्युयमिति। अ
त्र चिदिति पदं संहितापाठे वा तुल्लकान्। सुनःशेपशब्दस्य मध्ये प्रक्षिप्यते। उक्तं च प्रातिशाख्ये। शुनश्चिच्छेपं नि दितं त्र्यावाश्वं सस्मूषणम्। नराशंसं दैव्यं चेत्येतानुपूर्व्ये
संहितायामिति। पदकाले तु शुनःशेपं चिन्दितम् इति पठ्यते। शेपपुच्छलाङ्गूलेषु शुनः इत्यलुक्। वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः। प्रथमैकेति। नन्विह सावेकाच इत्यत्र
वस्तुपो ग्रहणम्। तत्र यत्तदोस्त्रियामवर्णान्तत्वेऽपि लिङ्गान्तरे सकारान्तत्वादित्यभावः। राट्‌राजा। परमराजा। अडिन्त्वष्टत्वे तेः क्विवन्तस्य सनकारस्य ग्रहणं विवयावधारणा
र्थम्। यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात्। प्राचा प्राङ्भ्यामित्यादौ विभक्त्युदात्तेः स्यादेव। प्राचा प्राचे। कुङ्‌क्विन्नन्तस्य। क्रुञ्चा परमक्रुञ्चा। कृत्। करोतेः कृत्त
तिर्वा क्विवन्तः। यन्निह काशिकायां सुगुना सुगुभ्यामित्युदाहृत्य अन्तोदात्तादुत्तरपदादिति प्राप्तः प्रतिषिद्ध इत्युक्तं तद्भाष्यवार्तिकविरुद्धं स्यादिति सूत्रशेषे द्विगोः पूर्वो
णित्वात्तस्तेर्भिर्तिवार्तिके तद्भाष्ये च स्वरे कर्त्तव्ये निषेधस्य वा गोशब्दस्यादेशोनस्यानिवदिति निर्णीतम्। द्युभिरिति। सावेकाच इति ऊडिदमिति वा प्राप्तः स्वसरो
निषिद्ध्यते। नृ च। अत्र झलादिरिति प्राचा शिताज्झलङ्गत्यस्यानुवृत्तिमाश्रित्योक्तम्। वस्तुतस्तु झलीति नानुवर्तते। तेन य एकङ्न्त्यः पौसीन्यत्र नरीत्यस्यानुदात्तत्वं
सङ्गच्छते। स एवं सति दिवो झलिति सूत्रमपि शक्यमकर्तुं तथाहि। इत्थं सूत्यतां स्पष्टं नोदीर्घान्। दिवो जादिः। शतु स्तुमोदद्यौ चेति। किंचैवं उडिदमिति सूत्रे दिवो ग्रहणं
मास्त्विति परलाघवं यत्तु हरदत्तेन नमोऽन्त्यिति सूत्रे नरीत्यस्यानोदात्तत्वमुक्तं दिवो झलिति सूत्रे च झल्ग्रहणसामर्थ्यात्स्वरकृत्त्वमुक्तम्। तदुभयं चिन्त्यम्। ति
स्त्र्वितम्। कृतदूतूदेशोक्तेति। सूत्रद्वयेऽपि औदिति सूत्रे च तकारउच्चारणार्थः। अनेनेदं प्रवर्तते। विसर्गः शब्दकौस्तुभे बोध्यः। नास्त्यनुदात्तेत्। नास्यादीनां
समाहारद्वन्द्वः। उपदिश्यते इत्युपदेशः डिदिति कर्मधारयः। इत्संज्ञकङकारेण च उपदिश्यमानस्य विशेषणात्तदन्तविधिः। कर्त्तेति। लुट्। आत्मनेपदप्रत्य राम.
यस्य डारौरसः। तासिः सक वचनेन उदात्तनिवृत्तिस्वरेऽपि द्वन्तरयोः फलविशेषः। डितेड्इति। अस्याप्युपदेशविशेषणत्वान्नेह। श्रृणुतं ज्वारित्तुर्द्दवम्। सुतुन आच। १६१
भावत। अत्राश्रुत निदेशेन डिन्नन्त्वनुबन्धानामनेकान्तत्वात्। वस्थितेऽपि कथंऽनन्तत्वं इति चेत् विशेषणसामर्थ्यादिष्यति। अथ वा डिन्देशेन तदन्तत्वस्य वा॥

थिमत्वर्थे मत्वलस्यते। चनस्यतइति चनोत्वम्। तदात्मनइच्छतइत्यर्थः कान्चूलोऽयससम्। शप्। सचानुबन्धसानेकान्तत्वाददुपदेशः। विस्वरोपीति। परत्वादिति भा
वः। हतइति अनुदात्तोपदेशेति नलोपे कृते इति हस्वतः ननूपदेशे। यलि च। आदिर्णमुलीति सूत्रादन्यतरस्यामित्यनुवर्तमाने याग्रहणम्। कार्यिविकल्पार्थं सत् आदे
रपि कार्यं प्रापयतीत्याह। आदिर्वेति। त्रयाणामप्येषामुदात्तो भवति ननु युगपत्। अत्रश्चत्वेयुगपदित्यादौ युगपद्ग्रहणाल्लिङ्गात्। एवं स्थिते। अन्यतरस्यामि
त्यनुवृत्तेः फलमाह। यदेति। सेवेति किं पपाथ। इड्ग्रहणन्तु यदा इडागमः। तदा तस्योदात्तार्थं स्यात्। ततश्च यथा तुलवित्येत्यादौ चतुर्णामुदात्तत्वे पपिथेत्यत्र त्र
याणां भवति एवमिडभावेपि स्यात्। आहवनीयइति। बाहुलकादधिकरणे अनीयर्। प्रीणनार्थात् कर्मणि वा। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः। इतिप्रत्ययस्वर
प्रकरणं तृतीयम्। नपर्यायेणेव यज्ञश्रियमिति। षष्ठीतत्पुरुषः। श्रीशब्दे कारस्य उदात्ते कृते आनन्तर्यात् इकारोप्युदात्तः। चित्रेति। श्रूयतइति श्रवः कीर्तिः। चित्रं
श्रवो यस्य चित्रश्रवाः। ततस्तमप्। समपादइति समशब्दः त्वत्समसिमेत्यनुदात्तानीति फिट्सूत्रेणानुदात्तः। हरदत्तस्त्वाह। सुओंडमविति। पादशब्दोवृषादि
त्वादाद्युदात्तः। मन्दयत्सखमिति। मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु। ण्यन्तात् लट्। शत्रादेशः तस्य छन्दस्युभयथेत्यार्द्धधातुकत्वेन शवभावादुपदेशादि
ति निघातेन। अतः प्रत्ययाद्युदात्तत्वमेव णेरनिटीति णिलोपस्तु न। तत्प्रति सार्वधातुकत्वाश्रयणात्। नचैवमपीत्समापादनीयम्। छन्दसि दृष्टानुविधानात्।
इत्यं मन्दयकुत्सोनोदात्तः। तत्पुरुषइति। स्यादेतत्। परमङ्गारकं इत्यत्रातिप्रसङ्गः। द्वितीयातृतीयासप्तम्यन्तपूर्वपदत्वात्। नहि विशेषणसमासः। प्रथमा।
नानामेवेति नियमोसौ त्यसत्कृदुक्तत्वात्। सत्यनत्त्वलक्षण प्रतिपदोक्तपरिभाषया तृतीयादिशब्दोच्चारणपूर्वकं विहितस्यैव समासस्येह ग्रहणान्नोक्तदो
षः। अव्ययइति। निपातत्वादेवसिद्धे तत्र ग्रहणपरस्यापि वाधनार्थम्। तेनअकरणिरित्यादौ कृत्स्वरेण। अव्ययीत्यत्रापि एवम्। किञ्च अतिस्वइत्यत्रति
सृभ्योजसइति शिष्टोपि विभक्तिस्वरोतत्स्वरेण वाध्यते। अपिच। अचत्वारः। अनड्वाहः इत्यत्र सतिशिष्टोपि आमउदात्तोवाध्यत इति वोध्यम्। कु ग्रहणन्तु वा
दिषु पाठाभावाद् हस्तु नम्नु वादिष्वेव कुःपाठः। इह तु नपाठः। एवञ्च अव्ययत्वमपि तस्य सिध्यति। स्नात्वेति। मयूरव्यंसकादिरयम्। नन्वेवमत्रैवान्तोदात्तत्वं ति
पात्पतामिति चेन्नैवम्। सामितकृतस्य यथौत मित्यादि वारणायेह परिगणनस्यावश्यकत्वात्। सदृशप्रतिरूपयोः। ननु पित्रा सदृश इति विग्रहे तृतीया॥

स॰स्व॰ नं पूर्वपदं तत्र तत्पुरुषे तुल्यार्थमित्येव सिद्धम्। न च तुल्यार्थयोगे षष्ठ्या अविविहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यम्। तस्यानभिधानात् षष्ठीसमासो नेत्यपि सुवचत्वादिति
१९६२ कैयटेनैवम्। अलुक्समासानुरोधेन षष्ठीसमासस्वीकारावश्यकत्वात्। तद्यथा। दास्याः सदृशः वृषल्याः सदृशः षष्ठ्या आक्रोशे इत्यलुक्। दासीवृषलीशब्दयोरन्तोदात्त
योरुदात्तयणो हल्पूर्वादिति विभक्तिरुदात्ता। तत्सादृश्यमिति। यत्र हि प्रतियोगिविशेषसम पेणार्थम्पूर्वपदम्। तत्रैव सादृश्यस्य समासार्थत्वेनेति सादृश्यग्रहणम्।
सामर्थ्याद्दाक्षीयतइति भावः। गृहपतिरिति। गेहे कइति कप्रत्ययस्वरेण गृहशब्दोन्तोदात्तः। पञ्चारत्निरिति। पञ्च अरत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः प्रमा
णे लो द्विगोर्नित्यमिति मात्रचो लोपः। संख्याइ हराजन्य बहुवचने निष्पूर्वसूत्रात् द्वन्द्व इत्यनुवर्तते। कार्त्ते। कुभूमिः तत्र जाताः कुजाः तान्यातिकुजयः। कुतस्य कुज
यस्य च अपत्यमित्यर्थेऋष्यणन्ता वेतौ। कुरुगार्हपते। इह पण्यकम्बलान्ताः सप्तसमासाः। तत्र आदितो द्वयोः षष्ठ्याः सौत्रो लुक्। इतरेषां पञ्चानां ष
ष्ठ्याः स्थाने प्रथमैकवचनम्। दासीभाराणामिति बहुवचननिर्देशादाद्यर्थो वगम्यते तदाह। राघामिति। कुरूणां गार्हपतम्। कुरुशब्दोन्तोदात्तः। कृग्रोरुच्चे
त्युप्रत्ययान्तत्वात्। रिक्तो गुर्वादयः कर्मधारयाः श्रीयस्यास्तितत्श्लीलम्। सिध्मादेराकृतिगणत्वाल्लच्। कपोरोलइत्यत्र कपिलकादीनामुपसंख्या नाल्लं
त्वम्। तश्लीलेतितत्समासे आद्युदात्तोश्लीलशब्दः। अश्लीला वासौ दृढरूपा चला वेण्यरहितापि कुजत्वादिरहितत्वात्संस्थानमात्रेण दृढेत्यर्थः। पारेवडवेव॥
निपातनादिवार्थे समासः विभक्त्यलोपश्च। पारशब्दो घृतादिः। तिलशब्दान्मत्वर्थीयइति। पृषोदरादित्वात्तिशब्दस्य द्विर्वचनम्। तितिलितोऽपत्यम्। अण्। तस्तद्धि
तइतिदिलोपः। तैतिलानां कद्रूः पण्यशब्दोत्र वध्यपण्येति यदन्तत्वादाद्युदात्तः। न च द्वितीयाकृत्याइत्येव सिद्धमिति वाच्यम्। प्रतिपदोक्ते कृत्यतुल्याख्या
अजात्येति समासेनतु प्रवृत्तेः इह तु विशेषणं विशेष्येणेति समासः। ननु अजात्येति प्रतिषेधसामर्थ्यादिदं लभ्यासाविति चेत्। अत्राहुः अजात्येति नजाति प्रा राम॰
तिषेधार्थे द्विः। स्तुत्या प्रसिद्धार्थोनुवादमात्रम्। न चानुवादस्य सर्वथा नैष्फल्यं गुणक्रियाचाचिनाम् नियमेन पूर्वनिपातप्रसङ्गे कृत्यान्तस्य पूर्वनिपातनना १९६२
र्थकत्वमिति। स्तुत्यादने न च रितार्थत्वात्। दासासेभारो दासीभारः। यूपदार्विति। यूपशब्दआद्युदात्तः। कुसुभ्यां वित्यत्र नितीत्यनुवृत्तेः। त्वो नासइति। त्वयाकृ
ताः रक्षिताः त्वोनासः। प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्य त्वादेशे दकारलोपश्छान्दसः। अचत्तेः क्तः। ज्वरत्वरेत्यूठ्। राल्येधत्यूठ् क्तिति वृद्धेरिडागमस्य वाभाव

न्तः। पूर्वपदप्रकृतिस्वरे कृते एकादेश उदात्तेनोदात्तः। ततः स्वरितप्रचयौ। गतिरनन्तरः। गतिशब्दः क्तिजन्तः नतु क्तिन्नन्तः। अनन्तर इति पुल्लिङ्गनिर्देशात्
निपातनाद्वा आनुनासिकलोपः। पुरोहितमिति। अत्र समासान्तोदात्तत्वं अव्ययपूर्वपदप्रकृतिस्वरत्वं कृत्स्वरः थाथादिस्वरः इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरो
नेन विधीयते। पूर्वपदस्त्वेहान्तोदात्तत्वम्। पूर्वाधरावराणामसीति असिप्रत्ययस्वरेण। अनन्तर इति किम्। अभ्युद्धृतः। इह धृतशब्दस्य उच्छब्देन स
मासे पुरोहितमित्यत्रेव गतिस्वरेण आद्युदात्तः॥ उद्धृतशब्दः तस्य पुनरभिशब्देन समासः। तत्र च कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया उ
द्धृतशब्दः क्तान्त उत्तरपदम्। एवं स्थिते समासान्तोदात्तं कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वे अभेस्तदानन्तर्यस्य सत्त्वादिति चेन्नैवम्। तत्त्वे प्राप्ते तद
पवादे कृत्स्वरे तदपवादस्थाथादिस्वरः प्राप्तः तमपोद्याभेर्गतिस्वरः स्यात्। सोऽनन्तरग्रहणेन वार्यते। तेन त्वनन्तरग्रहणेनापि द्वयोरेव। अनन्तरग्रहणसामर्थ्यात्
द्विधातोरनन्तरो गतिराश्रीयते अभिश्चानन्तर इति नन्वेवम्मा भूदभेः स्वरः इष्टसिद्धिस्तु कथम्। अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते। संसृष्टं धनमुभयं समा
कृतम्। इति मन्त्रे समासकृतशब्दस्याङः स्वरदर्शनात्। न चासौ प्रकृतसूत्रेण सिद्ध्यति। प्रथमसमासे नन्वप्रवृत्तावपि द्वितीयसमासे थाथादिस्वरस्य
प्राप्तेरुक्तत्वात्। न च तं बाधित्वा गतिस्वरः प्रवर्तत इति वाच्यम्। द्वितीयसमासे उदः पूर्वपदत्वाभावात्। अत्रोच्यते। धातोरनन्तर इति व्याख्यानादेव पू
र्वपदत्वं विनापि स्वरस्य प्रवर्तनं न हि कृत्प्रकृतिभूतधातुं प्रति पूर्वपदत्वं उद्धृतेः संभवति। तस्मादभ्युद्धृतं समाहृतमित्यादिना वस्तुस्थम्। इदं त्वव शिष्यते उक्तरी
त्या दूरादागत इत्यादौ कारकपूर्वोऽपि गतिस्वरः स्यात्। इष्यते तु थाथादिस्वरः तदर्थं ङ्करकादत्र श्रुतयोरिति सूत्रे —— कारकादिति योगो विभज्यते। कृद्ग्रहणं चा ति
ग्रहणं चानुवर्तते। कारकात्परं क्तान्तमगतिकमुत्तरपदं अन्तोदात्तं स्यादित्यर्थः। तत्र दूरादागत इत्यादौ थाथादिसूत्रेणैव सिद्धत्वात्। दूरादागत इत्यादौ गतिरनन्त
र इत्यस्य बाधनार्थमेवेदं सूत्रमिति दिक्। तादौ च। ननु कृतीति व्यर्थम्। तथाहि। गतेरयं स्वरो विधीयते। गतिसंज्ञा च धातुमाक्षिपति स च प्रत्ययविशिष्ट एव प्र
योगार्हः। प्रत्ययश्चेह परिशेषात् कृत एवेति चेन्मैवम्। कृद्ग्रहणं ह्यन्त्याप्रकृतिकालोपलक्षणम्। तेन कृदुपदेशे तादित्वलाभात्। प्रलपितादित्यादि सिद्ध्यति
स्वरप्रवृत्तिवेलायां तादित्वाभावेऽपि पूर्वं तत्सत्त्वात्। आदिग्रहणं तु शक्यमकर्तुम्। यस्मिन्विधिस्तदादाविति सिद्धेः। अनाविति किम्। आगतः। स्वादितम्। अनाविति।

म.स्व. पर्युदासः किंतु एवोचितः। नविग्भ्ये अस्वसुष्टुतिम्। सुहवां सुष्टुतीहुवे। वृष्णो वोदस्वसुष्टुतिम्। यास्तेराके सुमतयः। इत्यादौ गतिस्वरादर्शनादिति चेन्मैवम्। उ
१६३ दाहृतः प्रयोगेषु। उपायानन्तस्यैवानुसर्तव्यत्वात्। नह्युक्ताविति पर्युदासमात्रेण तन्निर्वाहः। कृदुत्तरपदप्रकृतिस्वरेण धातोरुदात्ततापत्तेः। अन्तोदात्ततायाः
श्चानन्तेष्टत्वात्। किंच। भनाविति किंतु पर्युदासे प्रभृतौ सकृदूतिमित्यादौ गतिस्वरो न सिद्ध्येत्। तस्मात् नञ् एवायं पर्युदासः। इति स्थितम्। का तर्हि सुष्टुते गति
रिति चेत् शृणु। स्तोत्रकरणीभूताया ऋचः साध्वसिद्धिर्न तु नीतिवत्कर्तृत्वविवक्षायां किं जन्यमिदं तत्तु किं त्वन्तम्। यत्तु केचित्। मतः किंतु व्याख्याने
त्यादिना अन्तोदात्तमित्याहुस्तच्च। नञ्कारकादित्यस्य वृत्तिकृतानुवर्तितत्वात्। प्रभृताविन्यादि सिद्धये तदनुवृत्तेरावश्यकत्वाच्चेति दिक्। नवे च। कृत्स्व।
रापवादोयम्। अन्तउदात्तइति। यद्यपि उदात्तग्रहणं नानुवर्तते। तथापि गतिः। प्रकृत्या भवतीत्युक्ते उदात्तो बुद्धिमारोहतीति स एवान्तस्य भवतीति
भावः। प्रत्यभ्वइति। कृदुत्तरपदप्रकृतिस्वरः परत्वादिति। चुस्वरस्यावकाशः साकद्रीची अस्यावकाशः। येपराञ्चः। उभयप्रसङ्गे परत्वादयमित्यर्थः।
ननु चुस्वरः सतिशिष्टः। भसन्ज्ञायामल्लोपे च कृते प्राप्तत्वात्तन्नायम्। नायमपि प्रतिषेधः किंतर्हि इष्टिरेवेति हरदत्तः। चौरनिगतोञ्चेतावप्रत्ययइतिवार्ति
कग्रन्थोपि इष्टिपरतयैव व्याख्येय इति तदाशयः। इहापि मूलपरत्वादित्यस्य इष्टत्वादित्यर्थः। न्यङ्ङिति। उदात्तस्वरितयोर्यण इति स्वरितः। दिवोदासायेति
। दिवश्च दासेइति षष्ठ्या अलुक्। नञो जरमरमित्रमृताः। नञ् सुभ्यामित्यस्यापवादः। जरणं ज्वरः। ऋदोरप्। मरणं मरः। अस्मादेव निपातनाद्या।
त्रिभिस्त्वेहनोत्रः। मित्रम्। मृङ्गेन पुंसके भावे क्तः। सूत्रे नुशब्दपरत्वात्सुत्वम्। अमित्रमिति। मद्योदात्तोयम्। एतेन अमित्रस्य व्यथयामसत्तु मित्र
इत्यादि व्याख्यातम्। भूमेर्दूषितो नीतिदुत्पच्चान्त्यये तु अन्तोदात्तउक्तः। नन्नुनत्सुरूपत्वाद्युदात्तापि। न च नस्य परवल्लिङ्गतापत्तिः। भृत्याऽमित्रवृत्त्रमे।
ष्ठा। पुंसीतिल्लिङ्गानुशासनात्। एवञ्चेदृश्वरीशाकद्यादिशब्दवदमित्रशब्दोपि त्रिविधः। यत्तु द्विषोऽमित्र इति सूत्रे हरदत्तेन दोषद्वयमुक्तं क्लीबत्वमाद्यु राम.
दात्तत्वं च स्यादिति। तदापाततएवेत्यवधेयम्। सौमनसौ। सुकर्माणइत्यादि। यद्यपि आद्युदात्तं द्व्यच्छन्दसीत्यनेन सिद्धमिदम्। तथापि सुप्रयिमे १६३
त्यादि बह्वजर्थमच्छन्दोर्थं च सूत्रमिति बोध्यम्। गतिकारकोपपदात्कृत्। इह शिनेनित्याबह्वज्झन्दुब्रीहावभसान्। इति पूर्वसूत्रस्य बहुव्रीहिग्रहणं॥

नानुवर्तनेस्वरितत्वात्। किंतुव्यवहितमपितत्पुरुषग्रहणंतत्पुरुषेशालायांनपुंसकइतिसूत्रादनुवर्ततइत्याह। तत्पुरुषइति। प्रकारकइति। कुगतीति स
मासः। स्तिस्वरेणोत्तरपदमाद्युदात्तम्। नृवाहमिति। नॄन्वहतःइतिविग्रहःअवसेणिदितिसूत्राण्णिदित्यनुवृत्तेः असुनोणित्वादुपधावृद्धिः। णित्स्वरेणोत्तरप
दमाद्युदात्तम्। उञ्छेकारमितिणमुलन्तिधावुञ्छेरित्युपपदम्। इहकृद्ग्रहणमाकरेप्रत्याख्यातम्। नयाचवार्तिकम्। गत्यादिभ्यःप्रकृतिस्वरत्वेकृद्ग्रहणानर्थ
क्यमन्त्यस्योत्तरपदस्याभावादिति। तत्रेदंविचार्यते। तिङन्तसमासेअयंस्वरोभवतिनवेति। आद्योयःशंवरम्। शंवरद्यन्वविन्दतयोजातःपर्यभूषणतइत्यादि
प्रयोगाणांसौष्ठवेपि। यत्रानरोदेवयन्तोयुगानिवितन्वतइत्यत्रश्रूयमाणमन्तोदात्तत्वंनसङ्गच्छेत कृद्ग्रहणञ्चवंनासूत्रकृताविरोधश्च। सहेतियोगंविभज्यत
त्पुरुषसत्त्वात् प्रागेवतिङ्समासकृतवतोभाष्यकृतोप्रतिकूलमिदमितिदोषत्रयम्। द्वितीयेतुसमासान्तोदात्तत्वेनचितत्वंचतइत्यस्यसिद्धावपि। अन्तवि
त्वत्। पर्यभूषतइत्यादौउत्तरपदाद्युदात्तत्वमसिद्धमेव। कृद्ग्रहणंप्रत्याचक्षाणेनतत्पुरुषाधिकारेतिङ्समासविरोधनाकात्यायनेनविरोधश्चेतिद्वौदोषौ। किंच
कैयटहरदत्तादयोप्यत्रउत्तरपदप्रकृतिस्वरस्यवार्तामप्यकृत्वासमासान्तोदात्तत्वमात्रंभवतिनवेतिसंदिग्धमेवव्यवजह्रुः। तथाचसहसुपेत्यत्रकैयटः॥
अनुव्यचलदित्यत्रसमासमुत्साद्याकृतप्रतिषेधनत्फलमभिधायसमासान्तोदात्तत्वन्तुनभवतितिङ्इतिनिघातेनबाधितत्वादितिकेचिदाहुरित्युक्त्वाएवं
सति अनुप्राविशदित्युदाहरणंभाष्योक्तंनिष्फलंस्यात्। तस्मात्सतिशिष्टत्वात्समासान्तोदात्तत्वेनभाव्यमित्यपरइत्युक्त्वा तत्रतिङ्ग्रहणस्यकृतत्वान्त्यप्रसिद्धपरि
कल्पेपिसुवन्तस्यतिङिस्वत्वा अन्येत्तिसुपत्वव्यवच्छेनग्रहणादुक्त्येकत्वसाधनमनिहतत्वाद्यादिलोपंचाविधायतइपदिष्टंभाष्यम्। अतएवैकपद्यादामनु
प्राविशदेवदत्तेत्यामन्त्रितान्तरमामन्त्रितमितिनिघातप्रतिषेधःसङ्गतायाःप्रयोजनमस्त्येवेतितिङन्तनिघातवादिनआहुरित्युपसञ्जहार। हरद
त्तोप्येवंकैयटोक्तिमात्रमन्ववादीत्। एवंहिवदताकिंपरत्वाच्चिघातउतसतिशिष्टत्वात्समासान्तोदात्तइतिनावधारितम्। तदापिअनुव्यचलद
दित्यादौयघाततयात्वपोजातइत्यादौतुपदद्वयान्तित्यमितिनिघातेनिषिद्धेसमासान्तोदात्तत्वंकेनवार्यताम्। किंचद्वितीयपक्षेअन्यायाहिशब्दनोवयन्तेइ
त्यत्रआङउदात्तःकथंनिर्वाह्यः। अपिचपुत्रधेयदिव्यानआसुधान्तघायमानानिरिणानीत्यत्रचमिशब्दोनिरन्यंतेवितन्वतइत्यत्रविशब्दश्चेतिनावन्ति

म॰ स्व॰ र्विवादन्मासमासान्तोदात्तत्वं तु विरिणातीत्यत्र नानन्वनद्द्यत्र तु भवतीति वैषम्यं तु रूपपादमिति महत्सङ्कटम्। अत्रेदं तत्त्वम्। वार्त्तिकमते तावदाद्य एव पक्षः म
९६४ कृद्ग्रहणस्य प्रत्याख्यानात्। तत्पुरुषत्वाभ्युपगमाच्च विनन्वनद्द्यत्र तु न्यचकारित्वाद न्तोदात्तत्वं कल्प्यम्। अत्या याहीत्यत्र तु निङ्ङ्। निङ् इति निघाते आङ्गसमा
मासः उत्तरपदस्याद्युदात्तमूल्यतया गतिस्वराभावादव्ययपूर्वपदप्रकृतिस्वरेण आङुदात्तः। ततो अनिशब्देन समासे कृते कृद्ग्रहणप्रत्याख्यानात् उत्तरपदप्रकृ
तिस्वरेणेष्टसिद्धिः विरिणीनीत्यत्र तु यच्छन्दयोगे निघातनिषेधात्पूर्ववद्वेष्टसिद्धम्। भाष्यमते तु तत्पुरुषत्वाभावात्। गतिस्वरस्याव्ययपूर्वपदप्रकृतिस्वरस्य
वाभावे समासान्तोदात्तत्वे नैव विनन्वनद्द्रुतिसिद्धम्। अन्वविन्दत् निरिणातीत्यादौ उत्तरपदप्रकृतिस्वरत्वं तु बाहुलकात्समाधेयम्। नित्यंक्रीडेत्यत्र नित्यमितियो
गविभज्यलक्ष्यानुरोधेन क्वचित्तत्पुरुषता वासीकर्त्तव्या। अतएवोदात्तवत्त्वेत्यस्य भाष्ये द्विःपाठः सङ्गच्छते। अमस्तनिराग्रभभिः। उपप्रेत कुशिकाद्द्यादौ तु
समासो न कृतः। गतिर्गता विनितु सर्वविधीनां छन्दसि विकल्पाच्च कृतम्। अपदादाविन्यधिकाराद्वेति दिक्। इह छन्दसीति। अन्तोदात्तो ह्यसौ। इन्द्रं कृतु हि
नेहहनद्द्यादौन यादर्शनात्। ननूनपादिति। ननूशब्दो नोदात्तः तस्य हायुदात्तत्वं निपात्यते। गर्भ आसुरद्द्यादौन यादर्शनात्। ननूनपान्पथ ऋतस्येत्यत्र
नुपाश्च आमन्त्रितस्वरो बोध्यः। नराशंसं शंसन्तीति नराशंसः। नृनये। अस्मादप्। शंसतेर्घञ्। नोत्तरपदे। इह एथिव्यापर्युदासोज्ञापयति। स्वरविधौ व्यञ्जन
मविद्यमानवदिति। तेनाग्निमीळे इत्यादौ स्वरितः सिद्ध्यति। घायघञ्। आवसथः प्रभेदः दूरादागतः प्रत्ययः प्रबलः प्रलविक्रम्। प्रविषः। पुरुधितिः।
तृतीयानत्पुरुषे तु तृतीया कर्मणीति सूत्रेण कर्मणि क्तान्ते उत्तरपदे तृतीयान्तस्य पूर्वपदस्य प्रकृतिस्वरः स्यादिति भावः। दशोनेवद्वयवोदेशः। वद्गुजरः इह नत्रो
जरेत्यस्यत्वनदन्तिदिशते। वराविश्कुन्दसि बहुलम्। उरुक्षयेति। उरूणाम्बहूनाङ्क्षयो यस्योनिवासद्द्याद्युदात्तः क्षयशब्दः। समासस्यान्तोदात्तत्वं बाधित्वा
कृद्वुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तन्न्याय्यादिस्वरेण वाधितम्। अतो बाहुलके नोत्तरपदाद्युदात्तत्वमिति वेदभाष्ये स्थितम्। एतच्चक्षिनिवा राम
सगत्यारिति धानोबाहुलकादधिकरणे रजिति माधवमते नोक्तं। वस्तुतस्तु घप्रत्ययान्तः क्षयशब्द इति दरदनो तकरीन्याय्यादिस्वरस्येष्टप्राप्त्या कृदु ९६४
त्तरपदप्रकृतिस्वरेणे वेदसिद्धमापरादिश्चेत्यस्योदाहरणं तु चोदयित्री सूनृतानामिति बोध्यम्। ऊनपरिहाणे। चुरादिषन्तः। णिच्। क्विप्। सुत॥

रामूनयस्यप्रियमितिनिसहनप्रियम्।निहतम्भ्वसहनम्। अयस्मयादीनिइतिभत्वान्नलोपोन।मुष्टिहत्यधेति।मुष्ट्याहननंमुष्टिहत्या।हनस्तचेतिसवन्तउपप
देक्यप्।कृदुत्तरपदस्वरोत्रप्राप्तः।त्रिचक्रइति।वहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरःप्राप्तः।विश्वायुरिति।विश्वमायुर्यस्मिन्धनेइतिवहुव्रीहिः।विश्वशब्दःकृन्न
न्त्यघातः।पूर्वपदप्रकृतिस्वरेणाद्युदात्तमिष्टंप्राप्तम्।इतिसमाससस्वरप्रकरणम्।तिङ्ङतिङः।अतिङः।किम्।पचतिभवति।पाकोभवतीत्यर्थः।वक्तनसुत्र
तिङ्ग्रहणमव्ययेम।समानवाक्याधिकारस्यवार्तिकोक्तस्यावश्यकत्वात्।निपातैः।यदित्यादीनांयत्रेत्यन्तानांद्वन्द्वेतृतीयायाः सौत्रोलुक्ननुयुक्तशब्दे
नसमासः।निपातैरितिविशेषणस्यानन्वयापत्तेः।यद्यपदार्थेचहेतौचविचारेयदिचेच्चणः।हन्तहर्षेनुकम्पायांवाक्यारम्भविषादयोः।कच्चिदप्यर्थेनन्निषे
धेप्रशंसायांकुविस्मृतः।यत्रेत्याधारंतत्रमूलेकेचिदुदाहृताः।अन्येपूह्याः यथाहन्तकरोति।कथंतर्हि हन्ताहंपृथिवीमिमांनिदधानीहवेहवा।अत्रद
धानीतितिङन्तस्यनिघातनिषेधःप्राप्तोनिसत्यंवाहुलकान्निघातःएतेनहन्तोनुकिमाससेइतिव्याख्यातम्।हन्तोइत्यखण्डनिपातोवावोध्यः।तथे
वपदकारैःपाठात्।नेच्चेत्।चेन्निपातसमाहारात्मकोनेदेवमायुजन्नत्रदेवाः।अन्यश्चेन्नाभिगच्छति।अत्रनञ्चवाभ्यांविच्छिद्यइच्छुच्चस्यपद
कालपाठात्।चणिति।चेदर्थेचणिति।समुच्चयादौत्वणितः।इन्द्रश्चमृडयातिनः।इन्द्रश्चेद्दस्मात्सुखयेदित्यर्थः।तव्युतामनोवसोजीवातुन्नमराम
हे।हेसोमत्वंव्रतेनोजीवातुंवशः।वश्यःकामयथाद्रूस्यर्थः।निपातैःकिम्।यत्कूजतिशाकटम्।यतीतियत्।इणःशतरि।इणोयणितियण्।ननुप्र
निपदोपकत्वापरत्वादिभिःसाहचर्याद्यनिपातस्यैवग्रहीष्यतेतत्सत्यम्।ज्ञापनार्थमिदम्।अत्रप्रकरणेउक्तनिपातसङ्घोचोनेति तेनयावद्यथाभ्यामितिसूत्रे
यत्तदेतेभ्यइतिवचनेनापियावच्छव्दोगृह्यते।तथाचप्रयुज्यते।तावदुभाराघो अस्मभ्यंरास्वयावत्स्तोतृभ्योअरदोगृणाना।अत्रारदइत्यद्धस्वरेणा।
द्युदात्तम्।यत्तुग्रहणाद्धिम् अन्यान्वितेमाभूत्।यत्रकन्नमनोदसरधसउत्तरम्।इहयत्रेत्यस्योत्तरमित्यनेनसाक्षात्संवंधः।दधधारणेअनुदा
त्तेत्।भोसमइति।अहृपदेशात्परत्वात्सेडित्यस्यानिघातः।मध्योदात्तंपदम्।किंवृत्तंच।इहजात्वपूर्वमितिपूर्वसूत्रादपूर्वग्रहणमनुवर्त्तते तद्यचष्टेअ
विद्यमानेति।तेनेहन।देवदत्तः किंचित्पचति।नान्येषितियदिहेत्यादि भिरित्यर्थः।उत्तरयोर्वाक्ययोरिति।दिवोवापार्थिवादधि।इन्द्रमहोवारजसः। इ

मेनयोरित्यर्थः। इन्द्रं प्रतिसानिं धनदानं अधीमहे। आधिकेन याचामहे। वैदिकनिघण्टौ याच्ञाकर्मसु महे इति पाठात्। कस्माल्लोकादित्याकाङ्क्षाया
माह। इतो स्मात्पार्थिवात् वा दिवो वा महो महतः। प्रौढात् रजसो रञ्जकात्। अन्तरिक्षलोकादिति मन्त्रार्थः। ननु श्रुतस्यैव तिङन्तस्योत्तरत्रानुषा
ङ्गऽनुकर्षं प्राधान्यमिति चेत् अनुषक्तस्यापि औपाधिकभेदं पुरस्कृत्य प्राधान्याश्रयणेन निघातनिषेधस्य छन्दसि बहुशो दृष्टत्वात्। एतच्चेहैव मन्त्रे
निघनमुष्टिहत्ययेति मन्त्रे च वेदभाष्ये स्पष्टत्वात्। इन्द्र वाजेषु नोऽवेति। अवेति तिङन्तस्येह निघातः। निघाताभावस्य तु उदाहरणान्तरं बोध्यम्। यद्वा
नाम्नित्यम्। यद्वा नान्तरमिति अन्वयबाधानाशङ्क्य नेहापेक्ष्यते। तेन योजा नत एव पर्य्यभूषत्। इत्यादौ निघातनिषेधः सिध्यति। अत्र प्रमाणन्तु पूजना
त्पूजितमिति सूत्रे पूजितग्रहणम्। तथा हि। पूजनात्पूजितमनुदात्तमिति सूत्रेण काष्ठाध्यापकः दारुणाध्यापकः परमाध्यापक इत्यादौ अनुदात्तता विधी
यते तत्र काष्ठादिभ्य इति वार्त्तिकम्। इति कृतासूत्रावयवत्वेन पठितम्। उदाहरणेषु मयूरव्यंसकादित्वात्समास इति हि निमतम्। असमासे एवं क्रि
याविशेषणीभूतानां दारुणमित्यादीनां मलोपो निपात्यत इति भाष्यवार्त्तिकयोः स्वरसः। कैय्यटादयोऽप्येवम्। उभयथापि पूजनादित्येव पूजितपरिग्रहे
सिद्धे पूजितग्रहणमनन्तरप्रतिपन्नार्थं सत् ज्ञापयति। इह प्रकरणे पञ्चमीनिर्देशे प्यानन्तर्य्यं नाश्रीयत इति। इति तिङन्तस्वरनिरूपणप्रकरणं पञ्चम
म्। संहितायामित्विति। तयोर्य्वावचि संहितायामिति सूत्रे संहिताग्रहणस्याशास्त्रसमाप्तेरधिकृतत्वात्। स्वरितविधेस्तु न दूरभूतत्वादिति भावः। नन्वसंहि
तायाङ्कालव्यवायादेव स्वरितो न भविष्यति तत्किमुक्तेन संहिताधिकारेणेति चेत्। मैवम्। संहिताधिकारवद्भिर्भूतानां कालव्यवायेऽपि प्रवृत्तिं ज्ञापयि
तुं तदारम्भात्। तेनाग्नाविष्णू इत्यग्राविष्णू इत्यादाववग्रहेऽपि स्यान्नङ्गादयः पदविभागे च स्वसादयः। अग्निमीळ इत्यत्र पदविभागेऽपि निघातस्य सिद्धा
ति। संहिताधिकारस्य तु यणादिकं स्वरितप्रचयादिकं न चेति विवेकः। नन्वेवं पुरः अहितमिति विग्रहे हिशब्दस्य स्वरितत्वं च कुञ्चैः पठ्यमानत्वासि
द्धेरिति चेन्मैवम्। तदीयप्रातिशाख्ये विशिष्य विधानात्। उक्तं हि यथासन्धीयमानानामनेकीभवतां स्वरः। उपदिष्टस्तथा विद्यादक्षराणाम
वग्रह इति। नन्वेवमुपगन्तवै अन्तेत्तवा इत्यादिनामवग्रहे उत्तरखण्डस्य वर्णस्य प्रचयः स्यादिति चेन्न। पदादींस्त्वनुदात्तानामसंहित॥ ६॥

वद्गुनरानिति विशेषणवचनात् । एवं रत्नधाममम् । अन्नलाभवतीरित्यादीनां क्रमकालेऽइति शब्दो नरभागे प्रचयो चर्यते । परिग्रहे त्वनार्षत्वा
नेन चैकाक्षरीकृतात् । परे घान्यासमाचारं व्याप्तिसौ चेत्स्वरोपरा विनिवचनात् । इत्यमन्यत्रापि मुनित्रयवचांसि नतत्प्रातिशाख्यानि तद्व्याख्यातृगि
रो निरुक्तादिग्रन्थांश्च पर्यालोच्य नत्त्वनिर्णेयम् । तदाह । यथाशास्त्रमुपपन्नेयमिति । अखण्डमपि यत्सर्वं द्वन्द्वातु तद्धितपरंपरम् । अशेषशास्त्रसंवे
द्यमस्मरन्तदुपास्महे ॥१॥ सिद्धान्तकौमुदीव्याख्यासेयं प्रौढमनोरमा ॥ भट्टोजिदीक्षितकृतिर्भूयादिष्टवशानुष्टये ॥२॥ इति पदवाक्यप्रमाण
द्रु श्रीलक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन रचितायां प्रौढमनोरमायामुत्तरार्द्धं समाप्तम् ॥ शुभम् ॥ श्रीसम्वत् १९४३॥ श्रावणशुक्ले १५ शनौ ॥

विद्योदयो निराकुर्यादविद्यातिमिरं सदा ॥
सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥१॥

श्रीकाशीपुर्यां स्वस्तिश्री ५ विनीयास्यनगराधिराजमहाराजइन्द्रकिशोरवहादुरसूनुश्रीमन्महाराजहरीन्द्रकिशोरवहादुरा
णां निकेतने श्रीमहृदुकनायभट्टेन संशोधितं शब्दरत्नसहितमनोरमा पुस्तकं गोवर्धनदासाभिधेयेन मया हरिहररत्
नाकराख्यस्वीययन्त्रालये मुद्रितं येषां महाशयानामपेक्षा भवेत् तेषां कुंजमत्स्त्रीति प्रथितपण्यवीथिकायाः पश्चिम
द्वारनिकटवर्तिनि मदीयपण्यालये संमिलिष्यति ॥
छापाकारी गरबीसेसर

॥ इतिशब्दरत्नसहितमनोरमासंवलितउत्तरार्द्धंसमाप्तः ॥